Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

Svachchhanda

vol II
chaps 5–9

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

Fumigated : OCT 1993

But thought nor word can seize eternal truth

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

SVACHCHHANDA TANTRA

VOL. III.

CHAPTERS 5-9

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

दीक्षादीक्षणनिर्माणनानोपायप्रदर्शनः ।
जघन्यानुग्रहैकान्तविश्रान्तः परमेश्वरः ॥

अथ पटलसङ्गतिं कुर्वती उक्तकलादीक्षानुवादपूर्वं तत्त्वदीक्षां प्रस्तावयितुं श्रीदेव्युवाच —

'कलादीक्षा सुरेशान कथिता परमेश्वर ।
तत्त्वदीक्षां समासेन कथयस्व प्रसादतः ॥ १ ॥'

सुरेशानः ब्रह्मादीनां स्वामी परमेश्वरस्तु परभैरवसत्तानुप्रवेशनात्, समासेनेति संक्षेपेण, विधिविस्तरस्य कलादीक्षायामुक्तत्वात् ॥

एवमभ्यर्थितः श्रीभैरव उवाच —

'समासात्कथयिष्यामि तत्त्वप्रियार्थं वरानने ।
तत्त्वदीक्षां नानाभेदभिन्नाम् ॥

तत्र —

'षट्त्रिंशत्तत्त्वमुख्यानि यथा शोध्यानि पार्वति २
पृथिव्यादिशिवान्तानि स्वव्याप्त्यानुगुणैः सह ।
यथा शुद्ध्यन्ति देवेशि तथा ते कथयाम्यहम् ॥ ३ ॥'

तत्त्वदीक्षायां तत्त्वानामन्तर्भावितावान्तरापेक्षं प्राधान्यमेव व्याप्तिरवान्तराणां तु गुणभावमेवमन्यत्र येन प्रकारेण शोध्यानि शोधनीयानि यथा शुद्ध्यन्ति तथा शोधकशोध्यगतं प्रकारं तवानुग्रहैकपरायाः कथयामीति प्रतिज्ञा ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्र -

'विद्यानादस्य ये वर्णाः नवसंख्योपलक्षिताः ।
वाचकास्ते च तत्त्वानां'

प्रबोधत्वेनोपस्थाप्यानाम् ॥

यथा भवन्ति तथा -

'वर्णयाम्यनुपूर्वशः' ४ ॥

तत्र -

'पृथिव्यादिप्रधानान्तमूकारो वाचकः स्मृतः' ।
'पुरुषस्य यकारो वै रागतत्त्वान्वितस्य च' ५

इति श्रीश्रीकण्ठेन प्रोक्तस्तु तेनैव वर्णेन प्रणवनवात्मोच्चारपूर्वं तत्तत्तत्त्वं कलोपस्थापनवदुपस्थाप्य शुद्धसन्धानादिमुद्राशुद्धतत्त्वानुसन्धानं सर्वं पूर्ववत्कर्तव्यम् एवं सर्वत्र पुरुषस्य स्पृहात्मकत्वाद्रागतत्त्वान्वितस्येत्युक्तम् ।

'नियामिकां वकारेण विद्यातत्त्वे समन्वितम् ।
कालं कलां लकारेण कलयेत्तु वरानने' ६ ।

किञ्चिद्वेदनात्मनोऽशुद्धविद्यायाः किञ्चिदंशो नियमात्प्रवेशान्नियत्या सह निर्देशः कलायास्तु किञ्चित्कर्तृत्वात्मकक्रियाविशिष्टायाः कलानुवेधस्यावश्यम्भावात्कालेन सह निर्देशः सहनिर्देशश्चायं वाच्यवाचकभावदर्शनाय प्रबोधनं तु पृथगेव ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

किञ्च —

'मायातत्त्वं मकारेण[1] विद्यातत्त्वं शकारतः ६ ॥
रेफेण चेश्वरं तत्त्वं हकारेण सदाशिवः ।
प्रणवेन तथा शक्तिर्न्यसितव्या वरानने' ७ ॥

प्रणवेन बिन्दुना शक्तिरिति शक्तितत्त्वमपरशिवरूपम् ॥

अत एव —

'व्यापिनीं समनां चोर्ध्वे तत्रैव तु विशोधयेत्' ।

तत्रैवेति शिवतत्त्वे प्रणवेनैव ॥

एतच्च सर्वं पूर्वोक्तेन सर्वेण[2] विधिना —

'शोधयित्वा क्रमेणैव मूलमन्त्रेण सुव्रते । ८
योज्य आत्मा परे तत्त्वे उन्मनातीतसर्वगे ।
निराभासे परे शान्ते ईशाने चाव्यये त्वजे ९' ॥

शिष्यदेहे पादाद्गुल्फान्तं पृथ्वी, गुल्फान्नाभ्यन्तं जलादि प्रधानान्तानि त्रयोविंशतिः ततस्तालन्तं पुमादिमायान्तानि सप्त, ततो ब्रह्मबिलोपान्तं विद्यादिसदाशिवान्तं त्रयं, तदुपरि समनान्तं शक्तितत्त्वसमनान्तं [illegible]तं शिवतत्त्वमिति तत्त्वानि विन्यस्य दीक्ष्यस्य तानि सर्वाणि क्रमेण पूर्वोक्तविधिना प्रोक्तनवात्मावयवैः शोधयित्वा आत्मा परे तत्त्वे परमशिवे मूलमन्त्रेणेति अवयवापेक्षया समग्रेण नवात्मना योज्यः कीदृशे उन्मनां अतीते तदनुप्रवेशान्तरलभ्ये

(१) वकारेणेति पाठः ९ २ ख° ५
(२) सर्वेणेति पाठोऽधिकः ४

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शुद्धिमदात्मनि सर्वगे व्यापके, ईषद्वासनान्वित्वात् सर्वभोक्तृ
त्वापके च निःशेषभेदोपशमात्मके शुद्धे ईशाने विशेषके
अव्यये अजे चेति नित्ये

तदेतद्षमेकैकं शोधनीयत्वेन —

'षड्विंशत्तत्त्वमाख्यातम्'

पात्रादित्वात् समाहारे स्त्रीप्रत्ययाभावः

अथ —

'नवतत्त्वं प्रचक्ष्महे'

तत्र —

'प्रकृतिः पुरुषश्चैव नियतिः काल एव च १०
माया विद्या तथेशश्च सदाशिवशिवौ तथा'।

एतानि मुख्यानि नवतत्त्वानि नवभिर्नवात्मकैः ।

प्रातिलोम्येन पूर्वोक्तविधिना —

'शोधयित्वा तु विधिवद्वामात्मानं नियोजयेत्' ११ ॥

शिष्यस्य प्राधान्येन तु —

'पञ्चतत्त्वी यदा शोध्या'

तदा —

'वक्त्रमन्त्रस्तु वाचकः'

तैश्च सद्योजातादिक्रमेण —

'धरित्र्यादिखपर्यन्तं शोधयेत्तु क्रमेण तु'। १२ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्त्वपञ्चकस्याशेषाध्वशुद्ध्यनुगुणां निवृत्त्यादिकलाव्याप्ति-
माह—

'कलानां यावतीव्याप्तिस्तत्त्वानां तद्वदेव हि'

एवं च वदन्कलादीक्षोक्तोऽत्र सर्वो विधिः, केवलं कलापस्था-
पनाद्यवसरे सद्योजातादिमन्त्रैर्धरादितत्त्वापस्थापनादि कार्यम्।
अनेन तत्त्वपञ्चकमेतद्भगवद्वक्त्रमन्त्रस्फारसारतया परमेश्वर-
मयमेवेति। तदभेदव्याप्तिरेव परं शुद्धिसाधनमिति शिक्षयति—

अथ—

'त्रितत्त्वमधुना वक्ष्ये यथा शोध्यं वरानने' १३॥

आत्मविद्याशिवाख्यं मेयमानमातृरूपम्॥

अस्य वाचकव्याप्तिमाह—

'अकार आत्मतत्त्वस्य वाचकः परिकीर्तितः।
मायान्तं तद्विजानीयात्'।

अकार इति प्रणवसंहितः। मायान्तमेकत्रिंशत्तत्त्वैरप-
रिवर्जित आत्मा शिवभागरूपो मेय इति तावत्येवास्य व्याप्तिः।

'विद्याख्यस्याप्युकारकः १४
सकलावधि तज्ज्ञेयं'।

विद्याज्ञानक्रियात्मा शक्तिः शुद्धविद्येश्वरसदाशिवव्या-
प्तिका सकलः सदाशिवः। तदुपरि शक्तिव्यापिनी समना शक्तिव्यापक एव शि० शिवतत्त्व तु मकारकः [illegible]

'परस्तु तदूर्ध्वगो बिन्दुरुन्मनाव्याप्तिसत्तत्त्वः।
स्वरः'

पं॰ १४ तत्र पु॰ त्रिपुरातीतात् तत्त्वैः परिवर्जित इति पाठः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

एवं भगवत्कायं स्मरति प्राप्नोति सः भगवत्कायात्मा ।

अत एव —

'ब्रह्मरूपस्य शिवतत्त्वस्य वाचकः' १६ ॥

तदित्थमेतदनुसन्धाय प्रणवदयोपस्थापनपूर्वम् —

'योगधारयित्वा क्रमेणैव'

शिष्यात्मानम् ।—

'परे तत्त्वे नियोजयेत्'

स्वसंवेदनव्याप्तिमात्रेण प्रभावेन ।

तदित्थमत्र —

'तत्त्वदीक्षा समाख्याता चतुर्भेदव्यवस्थिता' १७ ॥

एवं तु योजनिकाग्रन्थान्ते एकतत्त्वदीक्षाप्युक्तेति दर्शितमेव ॥

एवं प्रश्नितां तत्त्वदीक्षामुक्त्वा तज्जिज्ञासोर्भगवत्या अभिप्राय-
परितोषाय प्रश्नितामपि पददीक्षां निरूपयिष्यन्भगवानाह —

'पददीक्षां प्रवक्ष्यामि यथावदनुपूर्वशः' ।

वर्णमन्त्रदीक्षाभ्यां तत्त्वतेतिकर्तव्यतां भुवनदीक्षां तदव-
सर एव संक्षेपेण प्रतिपादयिष्यति विस्तरेण तु दशमप-
टले ततः पददीक्षामेव तावदाह —

तत्र —

'विद्याराजे तु ये वर्णा नवसंख्योपलक्षिताः १८
पृथग्भेदेन तेषां तु विन्यासं कथयामि ते' ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

एवं पताकामुं स्वरति मूर्च्छयति सः मरा

तत्र—

नवनाभं पुरं कृत्वा नवपद्मोपलक्षितम्' ॥ ॥

कथम्—

'नवहस्ते लिखेद्वृत्तम् अष्टपर्वाधिकं बुधः' ।

वेष्टम मण्डलक्षेत्रं अष्टभिः पर्वभिरङ्गुलैराधिक्यं सर्वेम-
तत्क्षेत्रं अङ्गुलमानद्वयं चतुर्विंशत्यधिकं भुवनाभ्रप्रतिबिम्ब-
रूपं भवति तस्मिन्सर्वतः सप्तभागकल्पनयैकैकस्य भागस्य
द्वात्रिंशदङ्गुलं जायते इति तदर्थमङ्गुलाष्टकदानम् ॥

अथ—

'सप्तभागीकृतं तत्तु'

भूर्यात् ॥

किं कृत्वा—

'दक्षिणोत्तरभाजितम् १०

चतुरस्रं विभज्यादौ मत्स्यैश्चैवात्र चिह्नितम्' ।

भावितीत्या ब्रह्मस्थानात्पूर्वापरदिशो अङ्कयित्वा किञ्चि-
दूनेन चतुर्भागेन क्षेत्रमानेन सूत्रेण पूर्वापराङ्कयोर्मध्य-
स्थप्रतिबन्धेन दक्षकरगताग्रभागेन पार्श्वयोर्मत्स्यबन्धाकारं
रेखाद्वयमुत्पाद्य तन्मध्ये सूत्रमास्फाल्य दक्षिणोत्तरभाजि-
तं क्षेत्रं कृत्वा क्षेत्रार्धमानेन सूत्रेण पार्श्वगतमध्याङ्कप्रति-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

बन्धेन कोणेषु मत्स्यबन्धचतुष्कमुत्पाद्य तत्र सूत्रास्फा-
लनेन चतुरश्रं विभज्येत्यत्र पिण्डार्थः ॥

एवं चतुरश्रक्षेत्रे पूर्वापरायतैः सूत्रैः सप्तधा विभक्ते तु

‘कोष्ठकैकोनपञ्चाशत्सूत्रेण तु समालिखेत्’ २१

दक्षिणोत्तरायतैर्मध्यगतैः षड्भिः सूत्रैरेकोनपञ्चाशत्
कोष्ठकानुत्पादयेत् ।

एवं कृत्वा —

मध्यमे कोष्ठके सूत्रं द्वात्रिंशदङ्गुलसंमितम् ।
समालिख्य महादेवि चतुर्भागविभाजिते’ २२ ।

ब्रह्मस्थानाच्चतुर्भिः समभागैर्भ्रमैः पद्मनाभव्योमरेखाव-
कायुं परिकल्प्य विभक्ते च इत्यर्थः ॥

तत्र भागचतुष्टयमध्यात् —

‘प्रथमे कर्णिकां कुर्यात्केसराणि द्वितीयके ।
तृतीये दलसन्धींश्च दलाग्राणि चतुर्थके’ २३ ।

यत्र दलानि तदग्रैः सन्धीयन्ते दलसन्धयः ॥

पूर्वोक्तेषु चतुर्षु भागेषु द्वारवर्तनविधिमाह —

‘दिक्षु रेखाष्टकं दत्त्वा प्रतिदिक्षु तथैव च ।
भ्रामयेच्चतुरो वृत्तांश्चतुरङ्गुलसम्मितान्’ २४ ॥

दिक्ष्वष्टौ तन्मध्ये चाष्टौ सूत्राणि दत्त्वा ब्रह्मस्थाना-
त्पूर्वविभागादिषु चतुरो भ्रमान्कुर्यात् ॥

पं १ त पु. कोष्ठके पञ्चमिति पाठः ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ऽग्र —

'द्वाभ्यां प्रतिदिग्रेखाभ्यां मध्ये सूत्रं निधाय तम् ।
सूत्राग्रं तु ततो भ्राम्यमर्धचन्द्रविधानतः ' २५ ॥

प्रतिदलसन्धि ऽर्धचन्द्रद्वयविधानाय पूर्वदिग्रेखायाः पार्श्वरेखाभ्यां उपलक्षिते मध्ये मध्यद्वये वामेन करेण सूत्रं रुद्ध्वा दक्षिणेन सूत्राग्रं पार्श्वरेखाभ्यां मध्यंगतं भ्रामयेत अत्र चैकैकपार्श्वरेखा ऽग्रायामतो मध्याद्विम- र्ध्व्यायामेन संसक्तदलता भवति ॥

ऽर्धचन्द्रयोरुत्पत्तिहेतुप्रतिदिग्रेखयोर्मध्यद्वयमध्य- ग्रहणाय केसरसिद्ध्यर्थम् —

'मध्यसूत्रं च दातव्यं किञ्जल्कस्य विपश्चिता' ।

किञ्जल्के केसरे तन्निमित्तं तिष्ठति तेनैकैकार्धचन्द्रम- ध्यानुसारदलमध्यस्थोत्पन्नकिञ्जल्कस्य पार्श्वयोः कि- ञ्जल्कद्वयोत्पादनाय ऽर्धचन्द्रद्वयोत्पत्त्यर्थं मध्यलाभं चादावेव सूत्रद्वयं देयं चैवं साकल्येन द्वात्रिंशत्सूत्रा- ग्रेणैतानि भवन्ति ॥

एतदुपसंहरन्नन्यत्राप्यतिदिशति —

'पूर्वपत्रं प्रसाध्यैवमितराण्येवमेव हि ' २६ ॥
प्रसाधयेत् ॥ २६ ॥

(१) — सूत्राग्रमिति पाठः ग १ ख ५०
(२) — ऽग्रयोः [illegible] ग ६ ख ५०

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तत्र च —

केसराणि च संलिख्य चतुर्विंशतिसंख्यया ।

पत्राग्रतो न्यसेत्तेषां वर्तुलं तु सुशोभनाम् ’ २७ ।

प्रतिदलं त्रीणि केसराणि पत्राग्रत इति दलान्युन्ना-
द्य तद्बहिः सुशोभनं सम्पूर्णम् ॥

किञ्च —

‘ तस्यान्ते चतुरस्रं तु कर्तव्यं तु प्रमाणतः ’ ।

तस्येति हृत्सरोजान्तस्य पद्मस्य तत्प्रमाणात इति चतु-
लं रेखाप्रमाणरेखम् ॥

सर्वस्यास्य विधेर्भित्तिभूतमाद्यं विधिं वक्तुमाह —

‘ पूर्वं ब्रह्म प्रसाध्यं तु विषुवत्स्थेन हेलिना ’ २८ ।

हेलिना ब्रह्ममध्यस्थाने हेलिः सूर्यः ॥

तत्रादौ —

‘ पूर्वपश्चात्तु तं सूत्रं शङ्कुना साधयेत्प्रिये ।

द्वादशाङ्गुलमानेन ’ ।

शङ्कुः कीलकम् ॥

कथम् —

‘ मध्ये शङ्कुं प्ररोप्य तम् २९ ॥

पार्श्वेषु भ्रामयेद्रेखां षोडशाङ्गुलसम्मिताम् ’ ।

शङ्कुक्षेत्रान्षोडशाङ्गुलं भ्रमं द्वात्रिंशाङ्गुलपद्मार्थं दद्यात्
एतच्च जिघृक्षितक्षेत्रोपलक्षणपरम् ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तत्र च —

'पूर्वाह्णे ग्राहयेच्छायामपरस्यामचिह्निताम् ।३०
अपरस्येन सूर्येण प्राक्छायां लाञ्छयेत्प्रिये' ।

एवं भ्रमरेखच्छायापृष्ठे पूर्वापरदिगङ्कनां कृत्वा —

'ध्रुवेणोत्तरदक्षस्थां लाञ्छयेत्तु वरानने' ॥ ३१ ॥

ध्रुवेण शङ्कुना हेतुभूतेन पूर्वनिर्णीतदिक्सुस्थापितमत्स्यद्वयमध्यसूत्रेणोत्तरदक्षस्थां भ्रमरेखां लाञ्छयेत यद्वा क्वचिद्रात्रौ क्वचिद्रात्रौ एव विधातव्ये याग ध्रुवेणेति चतुर्दशतारकात्मकशार्वरेण ध्रुवनाम्ना निश्चलेन तारकेणोदा 'उत्तरदक्षिणादिक्सिद्धिं कुर्यात् ॥

'तत्र चैवमामनन्ति यथा स्वापुरनाडिका' ।

सुखेन येऽपि मुखतारामुत्तरदिकस्थां लक्ष्यीकृत्य तन्नाडिकानुसारेणोत्तरां दिशमङ्कयित्वा ध्रुवनाडितारानुसारेण मध्यं तत्पुच्छतारानुसारेण च दक्षिणमङ्कयेत ततो मत्स्यतारान्ध्रानुसारं पूर्वापरेऽप्यङ्कयेत् अत एवान्यत्र (ध्रुववेदेन वोदीचीमित्युक्तम् । यत्तु तत्र (प्राची वा ध्रुवतारया) इत्युक्तं तत्र ध्रुवतारासाम्येन मध्यं कल्पयित्वा तदनुसारं प्राचीं गृहीत्वा तदनुसारमितरां व्यवस्थापयेदिति बोध्यम् । ध्रुवं ध्रुवस्थानग्रहणचतुरस्रीकरणपूर्वमेकोनपञ्चाशद्भागानां मध्यभागे पूर्वोक्तक्रमेण पद्मं कुर्यादिति ।

(१) अपरस्यां सचिह्नितां- इति पाठः । [illegible]
(२) मध्येति पाठान्तरम् । [illegible]
(३) पूर्वापराभ्यां इति पाठः । [illegible]

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

उपसंहरति —

'ततः समालिखेत्पद्ममष्टपत्रं सकर्णिकम्' ३२ ।

अथ —

'दिक्कोष्ठकांस्तु सङ्गृह्य अष्टसंख्योपलक्षिताम् ।

शोभारोप्या वर्जयेद्धि एकान्तरितयोगतः' ३३ ॥

चतुर्दिक्कं द्वारार्थं बहिःकोष्ठकपङ्क्तिं त्यक्त्वा मध्यपद्मानुसारं दिक्षु प्रतिदिक्षु चैकैककोष्ठकलोपान्तरितकोष्ठकाष्टकं पद्माष्टकार्थं गृह्णीयात् एवं च मध्यवीथ्या पद्माष्टकक्षेत्रस्य द्वारवीथ्यंशैकेनैव ग्रन्थेन स्वीकार उक्तः एष चाष्टसु कोष्ठेषु ।

'पद्माष्टकं ततो दिक्षु' ।

कुर्यात् ।

अथ —

'बाह्ये द्वाराणि चालिखेत्' ।

कथं च —

'वीथ्यर्धसम्मितो देवि शोभां चैव प्रकल्पयेत् ३४

उपशोभां च तन्मानां कपोलान्तं समालिखेत् ।

तथा च कण्ठं तन्मानं द्वारमेतत्प्रकीर्तितम्' ३५ ॥

बाह्यवीथ्या मध्यदेशे सूत्रं दत्त्वा अर्धार्धं वीथीं कृत्वा परार्धं कल्पितवीथिक्षेत्रादूर्ध्वतोऽर्धमानां शोभां द्वारीयकण्ठपार्श्वोत्पद्यमानां विपुलमवयवमुपशोभां च तदधोगतं सूक्ष्मं भागं कल्पयेत् कपोलं द्वारस्याग्रे विपुलो भागः,

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

कर्णस्तु कपोलपुरःसरो भागः तं च तन्मानमिति निरू-
पितवीथ्यर्धमानं दैर्घ्याच्चैव वैपुल्याच्चैव कल्पयेत् कपोल-
स्यात्रमानं यद्यप्यर्थसिद्धत्वान्नोक्तं, तथा तद्दैर्घ्याद्वीथ्यमानं
वैपुल्यात्तदर्धमानमिति संहितान्तरादवसितमित्येतद्भा-
गनिष्पत्त्या द्वारं निष्पद्यते । इत्यर्थः ।

तदित्थम् —

'द्वारशृङ्कविभागेन नवनाभं पुरं स्मृतम्' ।

विदिक्षु द्वारस्यास्तानन्तत्वात्प्रतिदिक्षु पद्मत्रयात्मगल-
द्वारद्वयं कुर्यात् । एवं च द्वारशृङ्कविभक्तं नवनाभं नव-
नाभिस्थानस्थनवपद्ममेतत्पुरमण्डलम् अत्र च देवसम्मु-
खं द्वारमपिहितं कार्यम् । यथोक्तं लक्ष्मीकौलार्णवे —

'द्वारत्रयं पिधातव्यं पश्चिमं न पिधापयेत् ।
तच्च पूर्वं विजानीयाद्देव्या देवस्य सम्मुखम् ॥
पूर्वं तु पश्चिमं ज्ञेयं पश्चिमं पूर्वसंज्ञितम् ।
उत्तरं दक्षिणं ज्ञेयं दक्षिणं चोत्तरं तथा ॥
सामान्यः सर्वमन्त्राणां क्रमोऽयं शिवभाषितः ।
गोपनीयः प्रयत्नेन शिष्याणां दुष्टचेतसाम् ॥'

इत्युक्तः इति गुरुपारम्पर्येणायातम् । तद्यथा —

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मूलाद्याधिपद्मप्रलीनतनुगह्वारापृक्तोर्ध्वोन्मने
घोरादिचितयत्रयात्मविकचज्योतिर्नवाब्जद्युतिम् ।
मूलादिग्रहतत्त्वपर्वभुवनाभेदप्रथं भैरवं
स्वं वन्दे नवनाभमण्डलवहः सारं नवात्मेश्वरम् इति ॥

अस्यायमर्थन्यासेऽत्र (धाम्ना तु रजसां पातमिता ध्याश्वा गमोदित) इति पूर्वमुक्तत्वादागमान्तरोक्तविभागोऽनुसन्धेयः । सच —

लेख्या चात्र सिता रेखा प्राग्लिपिभूरता पुरः ।
हरिद्रावर्णसंमिश्रा कर्णिका पीतपत्रगा ॥
सितपीतारुणानां स्यात्केसराणां त्रयं दले ।
तानि शुक्लानि वा कुर्याद्धरितान्यरुणानि वा ॥
कोणा रक्ताः सितं पीठं प्रतिरेखा सिताद्रुता । इति ।

तथा स्वरूपः शक्तिमान्बिन्दुरुक्तसोऽङ्कुलयः कलाः ।
तदाधारं रजःकृत्वा शक्तिस्पर्शा च विन्दुना ॥
पातयेच्छक्तिगर्भं तत्तेन तच्छक्तिमण्डलम् । इति ।

श्रीपराधामस्ति । अथ वा —

सितं पद्मं विजानीयात्केसराणि विचिन्तयेत् ।
सितान्पीतांस्तथा रक्तान्मूलमध्याग्रतः क्रमात् ॥
कर्णिका हेमसङ्काशाः पुष्कराः हरिताः स्मृताः

पं १२ पं ५ पटिरे ल इति पाठः ।

पं. १६ [illegible]

प-१-पं

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इति इहार्त्ययोगोक्तध्यानानुसारं रजःपातः कार्यः ॥

अथ —

'स्नात्वा तु विधिवद्देवि प्रविश्योद्भवनं'

ह्यगार्चां कृत्वा —

'गुरुः' ।

ततः —

'पूर्वोक्तेन विधानेन सकलीकरणादिकम्' ।

कुर्यात् ।

'ततः संपूजयेद्देवं भैरवं परमेश्वरम्'

केन —

'प्रणवेन'

नवात्मसत्कबिन्दूपलक्षितसमग्रार्थव्याप्तिमतानेनेत्यर्थः ।

किं कृत्वेत्याह —

'ह्यासनं दत्त्वा शिवान्तं वरवर्णिनि' ।

प्रणवेनेति काकाक्षिवदिहापि योज्यं तेन पूर्वोक्तानन्ताद्यानन्तमध्यानन्तान्तव्याप्तिना प्रणवेनासनं तेनैवोन्मनान्तव्याप्तिना तत्कनामिनपरमशिववादिना भैरवं पूजयेदित्यत्रार्थः । वरमुत्कृष्टं परं तत्त्वं वर्णयति परामृशतीति तच्छीला वरवर्णिनी ।

क किं कथं पूजयेदित्याह —

'मध्ये संपूजयेद्देवं स्वच्छन्दं परमेश्वरम् ।
पूर्वोक्तेन विधानेन षडङ्गसद्गुसमन्वितम् ॥'

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पद्म/

मध्य इति कर्णिकायां विधानम् आवाहनादि मुद्रा-
पर्यन्तं सर्वम् । पद्मान्यपि अत्र पूर्णवर्णैव मनाम्नाऽत्या-
नेन नवात्मनावयवभेदेन मन्त्रात्मकाद्यायोगात
एवं पद्मान्तरेष्वपि वक्ष्यमाणकपालीपुरादिभेदेन तदङ्ग-
पूजा मन्तव्या तदेव पद्ममध्ये कर्णिकायां वर्णितद्वाच्य-
देवतान्यासाङ्कौ ॥



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तत्पत्रेष्वप्याह —

"पत्राग्रे न्यसेद्वर्णान्पूर्वादीशांस्ततः क्रमात्" ।

तत्र —

"सदाशिवं हकारेणैवमादि वरानने
प्रकृत्यन्ते विजानीयान्मध्ये पीठस्य कल्पना" । (१)

पीठस्य स्वच्छन्दनाथं मध्यकर्णिकायां शिवतत्त्वाधिष्ठायकं विन्यस्य सृष्टिक्रमेण नवात्मसम्बन्धि हरक्षमलवरय-ऊकारैः पूर्वादीशानदलाग्रे कपालेश-शिखिवाहन-क्रोधराज-विकराल-मन्मथ-मेघनाद-सोमराज-विद्याराजान् सदाशिवेश्वरविद्यामायाकलानियतिपुरुषप्रकृतितत्त्वाधिष्ठायिनो विन्यस्य अर्चयेदित्यर्थः ॥

मध्यपद्मे विधिमुक्त्वा पूर्वादिपद्मेषु सङ्क्षेपेण निरूपयति—

"दिक्पद्मकर्णिकासंस्थानष्टौ देवान्प्रपूजयेत्" ।

मध्यपद्मे पूर्वादिदलेषु यैरेव हकारादिभिर्वर्णैर्ये कपालेशादयो भैरवास्तानेव तैरेव वर्णैः पूर्वादिदिक्पद्मकर्णिकासु पूजयेत् ॥

पूर्वादिपद्मेषु स्वच्छन्दनाथस्य स्थानमाह —

"तत्स्थाने भैरवः पूज्यः" ।

भैरवेणैव पूर्वोक्तेन पूर्वपद्मस्य मध्ये हकारेण कपालेशः प्रणवेन तु पूर्वदले स्वच्छन्दः आग्नेयपद्मस्य मध्ये रेफेण

(१) ख० पु० तत्त्वाधिष्ठायिकमिति पाठः [illegible]

~~[illegible]~~

पं २४ [illegible] प्रणवेनैव पूर्वदले इति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शिखिवाहनः शिखिवाहनस्थाने आग्नेयपत्रे प्राग्वेन स्वच्छन्दनाथ एवमन्यत ॥

एवं चैकैकभैरवस्थाने पर्यायेण स्वच्छन्दनाथस्य विन्यस्तत्वात् तद्भेदव्याप्तिसारता सर्वभैरवाणां तदधिष्ठेयानां च सर्वतत्त्वानां शिवतत्त्वव्याप्तिमयतैव दर्शितेति परमाद्वयमयतया महारहस्यसारतास्यानुष्ठानस्य प्रकटिता।

अग्र किंचि नास्ति

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अनन्तश्च सर्वतः सर्वम् इति रूपाविशेषेण मन्त्रपदार्थः स्फुटीभूतो जात इत्यलम् ॥

पूर्वादिदलानां कपालेशादिसम्पुटेश्वरदलव्यतिरिक्तेषु(१) दलेषु मध्यपद्मदलेष्वेव न्यासादिविधिरित्याह —

'शोध्या वर्णैर्यथाक्रमम्' ।

एष च वर्णन्यासः पूर्वमेवास्माभिः प्रस्तारेण दर्शितः अत्र च पृथक्पृथक्पद्मस्थित्या नव सामस्त्येन चैक इति दश देवगृहजाताः भगवतो विद्याराजस्य बिन्दुसन्तत्त्वात्तदवयवानाम् । अपि पूजाकाले बिन्दुयोगेनावस्थं भावी एकैकोऽपि च वर्णः प्रदर्शितक्रमव्याप्त्या संपूर्णविद्याराजस्फार एव यदुक्तमिति —

यतः सर्वगतो देवः सर्वस्थानगतः स्मृतः
तस्मिन्विभक्तिदातासौ न वर्णः परमार्थतः ॥ इति ॥

एवं सृष्टिक्रमेण न्यासमुक्त्वा संहारक्रमेण दीक्षामाह —

'शोधयेच्च प्रकृत्याद्यं शिवान्तं सुरसुन्दरि' ।

प्रकृतिवाच्यरूपा भूम्यादिः शिवश्चान्ते यस्य तत्त्वजातस्य तच्छोधयेत् ।

कथम् —

'ईशानदिशमारभ्य मध्यपीठं विशोधयेत्' ।

(१) ख· ग· घ· ङ· च· संपुटीश्वर इति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ईशानादिकाशगतेशानादिकपञ्चात्मूर्वोक्तरादिदिक्क्रमेण प्रण-
वाद्यूकारान्तं पदनवकं प्रणवादिव्याप्तजोच्चारपूर्वकं मन्त्राद्यं प्रकृ-
तितत्त्वस्य अनाश्रितशिवान्तादिगुणतत्त्वान्ततत्त्वमानस्य पूर्व-
वदन्तमूर्तेनतमध्यप्रपञ्चस्य चात्मान्तभावं भावयित्वा
'पदनवकाय नमः' इत्यनेन मन्त्रेणावस्थानादि पूर्वोक्तं
सर्वं विधिं कुर्यात् ॥

एवमनेन क्रमेण पदानि तावद्विशोधयेत् यावच्छिवत-
त्त्वव्यापकं मध्यपदगगनमूकारादिप्रणवान्तं पदनवकम्।
यस्तु 'प्रकृतितत्त्वरूपादि पदनवकाय नमः' इति केनचि-
त्क्रमो दर्शितः स न युक्तः, कलादीक्षायां पदक्रमस्य[1] नवा-
त्मवर्णगतप्रातिलोम्यक्रमोच्चारस्य च युक्त्या प्रसिद्धस्या-
युक्त्याभावापत्तेः पूर्वस्य[2] संहारक्रमस्य चोपेक्षणात्।
अत्र पददीक्षायां नवतत्त्वदीक्षावदाध्वकाद्यनाश्रितान्ते
स्थाननवके पद्मनवकगतवर्णकाद्यीतेन्यासः कार्यः ॥

एवं पदाध्वानं प्रशोधयित्वा—
'योजयेत्तु परे तत्त्वे शिवे परमकारणे'।
वर्णादिदीक्षामपि निर्देशनादतिदिशति —
'एवं वर्णांस्तथा मन्त्रान्भुवनानि विशोधयेत्'।
किमवधीत्याह —

(१) धर्मक्रमस्य इति पाठः [illegible]
(२) पूर्णस्येति पाठः [illegible]

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

'कालाग्न्यादि शिवान्तं तु'।
कथं वर्णमन्त्रभुवनदीक्षाः कुर्यादित्याह –
'कलावधि समाश्रयेत्'।

कलादीक्षोक्तप्रथहतकपंचकानुसारेण वर्णादीनप्यन्येवं विभज्येत्यर्थः। अत्र कलादीक्षावन्मन्त्रा अधिक्रियन्ते इह च वर्णानां 'शक्तयामसकृत्यस्य' इति नीत्या वाचकत्वं, पदमन्त्राणां तु तत्तद्भिन्नाभिन्नतत्त्वं[१] वाचकत्वेन यथा च मन्त्राणां शोध्यत्वेपि शोधकत्वं तन्निर्णीतमेवेति तदेवेह सम्नेयम, तदेवमिह त्रिपञ्चनवषड्विंशद्भेदेन चतुष्प्रकारा तत्त्वदीक्षा पदमन्त्रवर्णभुवनदीक्षाश्चोक्ताः तत्र षष्ठ दीक्षायां कलानां यावती व्याप्तिरित्यतिदेशात वर्णमन्त्रभुवनदीक्षासु च कलावधि[२]समाश्रयादित्युक्तत्वात्कलावदथपञ्चकान्तर्भावश्चिन्त्यः। पददीक्षायां तु नवधा विभक्तायां प्रथमे प्रकृते प्रवायुकारान्ते पदानां नवके निवृत्तिप्रतिष्ठे कले पृथिव्यादीनि प्रधानान्तानि पञ्चविंशतितत्त्वानि भुवनानां कालाग्न्यादियोगाष्टकान्तं शतं चतुष्षष्ट्याधिकं क्षादिटान्ताश्चतुर्विंशति वर्णाः सद्योजातवामदेवहृदयशिरःशिखाः पञ्च मन्त्राश्चान्तर्गताः १ ॥

(१) भिन्नाभिन्नतत्त्ववाचकेन इति समस्तः पाठः

(२) कलादीक्षाविधि इति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पौरुषे ॐकारादियकारान्ते नवके विद्याकला पुरुषगोचा
तत्त्वे लघिमसिद्धि भुवने ऽणिमादिपुरुषाम्यष्टि-त्रयनाडीवि-
ग्रहात्मकदेहयाप्रागल्भगणेशाविद्येशायाम्या भुवनानि दशाम्
हृष्टादिरुद्रदशकस्य कल्याणयोदशमरुशिष्यदशकस्य भुव-
नमिति चतुर्दश भुवनानि ञमौ वर्णौ मन्त्रावयोग-
कवचौ ॥ २॥

ॐकारादिवकारान्ते नैवते नवके कलामन्त्रौ प्रागुक्त एवमु-
त्तरत्रापि नियतितत्त्वं विद्ये तत्त्वे वामदेवाद्यष्टकभुवनं वामा-
दिनवकं भुवनं च जझौ वर्णौ ३॥

ॐकारादिलकारान्ते कालीये नवके कालकाले तत्त्वे
शुद्धादिदशकभुवनं महादेवादिभुवनत्रयं च चझौ वर्णौ ४॥

ॐकारादिमकारान्ते विद्यापदनवके मायीये नवके माया
तत्त्वे गोपत्यादि अनन्तान्तानि सप्त भुवनानि घवर्णः ५॥

ॐकारादिक्षकारान्ते विद्यापदनवके विद्यातत्त्वं त्रिगु-(२)
णादिविद्याराज्ञीभुवनमेकं पूर्णा कला तत्पुरुषास्त्र-
मन्त्रौ गवर्णः ६॥

ॐकारादिरेफान्ते ऐश्वरे नवके कलामन्त्रौ प्रागुक्त ऐश्व-
रं तत्त्वं ईश्वरभुवनादिज्ञानक्रियाभुवनान्तं भुवनपञ्चद
शकं खवर्णः ७॥

(१) ख·ग·पु· ञझौ इति पाठः

(२) ख·ग·घ·पु· त्रिगुणादीति इति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

उकारादिहकारान्ते सादाशिवे नवके सदाशिवं तत्त्वं सदाशिव
मेव सुशिवाद्यनन्तभुवनव्यापकमेकं भुवनं कवर्गः ८ ॥
उकारादिप्रणवान्ते शैवे नवके शान्त्यतीता कलाशक्तितत्त्वाभि-
न्नं शिवतत्त्वं शान्त्यतीताभुवनादिकानि शिवभुवनान्तानि
षोडशभुवनानि नेत्राभिन्नमूर्तिः ईशानमन्त्रः विसर्गाद्या हका-
रान्ताः षोडशवर्णाः ॥ ९ ॥
षडध्वदीक्षावन्नवतत्त्वदीक्षा तत्र पदस्थाने प्रकृत्यादितत्त्वाना-
नि उपस्थाप्यानि तत्त्वस्थाने तु महान्यन्तर्भाव्यानि इति वि-
शेषः त्रितत्त्वदीक्षायां तु आत्मतत्त्वे क्षित्यादिमायान्तान्ये-
कत्रिंशत्तत्त्वानि । निवृत्तिः प्रतिष्ठा विद्या कलाः । काला-
ग्न्याद्यनन्तान्तं भुवनानां शतमेकनवत्यधिकं । प्रकृतिकोष्ठ
केशादिगतप्रणवात्प्रभृति पूर्वपद्मगतयाम्यक्षकारान्तं पदा-
न्येकोनविंशति सप्तति सद्योजातवामदेवाघोरहृदयशिरःशि-
खाकवचाः सप्तमन्त्राः क्षादिघान्ता एकत्रिंशद्वर्णाः । १ ॥
विद्यातत्त्वे शान्ताकला विद्याईश्वरसदाशिवाख्यतत्त्वानि ।
विद्याराज्यादिसदाशिवभुवनानि सप्तदश भुवनानि । पदा-
नि पूर्वपद्मगत व औं ह इति त्रीणि मध्यपद्मादूकाराद्या
हकारान्ता अष्टौ इत्येकादश तत्पुरुषास्त्रे मन्त्रौ गखकवर्णाः २ ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शिवतत्त्वे शान्त्यतीतो तत्त्वं पदं प्रणवः भुवनादि प्रागुक्त ३ ॥
षट्त्रिंशत्तत्त्वदीक्षायां तु पृथिव्यां निवृत्तिः कला अष्टोत्तरशतं
भुवनानां प्रकृतिपदात्प्राङ्नव पदानि प्रकृत्यन्तं तेषामेव निवृ-
त्त्यात्मसद्यो हृदये मन्त्रौ हवर्णः ॥ १ ॥

जले प्रतिष्ठा कला वामदेवशिरःशिखाऽघोरा मन्त्राः पदानि
पूर्वोक्तानि नव एतानि मन्त्रकलापदानि प्रकृत्यन्तं यावत्
एवमेव हवर्णः भुवनानि लकुलीशादीन्यमरान्तान्यष्टौ २ ॥
तेजसि सवर्णः भैरवादीनि हरिश्चन्द्रान्तानि अष्टौ भुवनानि ३ ॥
वायौ षवर्णः भीमादि गयान्तानि अष्टौ भुवनानि ४ ॥
खे शवर्णः स्थाण्वादिवस्त्रापदान्तानि भुवनानि अष्टौ ५ ॥

गन्धे ववर्णः शार्वं भुवनम् ६
रसे लवर्णः भुवनं भवस्य ७
रूपे रवर्णः भुवनं पशुपतेः ८
स्पर्शे यवर्णः ईशानभुवनम् ९
श्रोत्रे मवर्णः भीमभुवनम् १०
उपस्थे भवर्णः कपुग्रभुवनम् ११
पायौ बवर्णः मित्रस्य भुवनम् १२
पादे फवर्णः विष्णोर्भुवनम् १३
पाणौ पवर्णः इन्द्रस्य भुवनम् १४
वाचि नवर्णः अग्नेर्भुवनम् १५

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

घ्राणे धवर्णः पृथ्व्या भुवनम् १७
जिह्वायां दवर्णः वरुणस्य भुवनं १८
चक्षुषि थवर्णः रवेर्भुवनम् १९
त्वचि तवर्णः वायोर्भुवनं २०
श्रोत्रे णवर्णः दिशां भुवनं २१
मनसि ढवर्णः चन्द्रस्य भुवनं २२

अहङ्कारे डवर्णः स्थलेश्वरादिकपालान्तानि भुवनाष्टौ २३
बुद्धौ ठवर्णः देवयोनिक्रोधतेजो योगाष्टकानि चत्वारि भुवनानि ।
अत्रान्तर्गतगुणतत्त्वे प्रधाने टवर्णः गुरुपङ्क्तित्रयाद्याद्यानां
शिवशक्तियोगकृतां त्रीणि भुवनानि क्रोधेश्वराष्टकभुवनं
प्रकृतिभुवनं चेति पञ्च भुवनानि एतावत्पर्यन्तं कलामन्त्र-
पदानि प्राग्वत् २४ ॥

पुंसि विद्या कला अघोरकवचौ मन्त्रौ मायान्ते षट् कला-
मन्त्रा एवमेव ऊकारादिघकारान्तम् उत्तरादिकपद्मगतं
पदनवकं ञवर्णः तुष्टिसिद्धिगुरुशिष्यपङ्क्तित्रयनाडीविग्रहा-
ष्टकदेहपाशगन्धर्वगाणपत्यवैद्येशामायाभुवनानि द्वादश २५

नियतौ वायव्ये पद्मगतं ऊकारादि वकारान्तं पदनवकं
ङवर्णः वामदेवाद्यष्टकभुवनम् २६ ॥

कालतत्त्वे ऊकारादिलान्तं वारुणपद्मगतं पदनवकं जवर्णः
शुद्धादिशम्भ्वाद्यन्तशिवदशकभुवनानि २७ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रागे पौरुषमेव पदनवकं छवर्णः सहस्राद्रिरुद्रदशकस्य भुवनं कल्याणादेश्च गुरुशिष्यदशकस्य भुवनम् २८

अशुद्धविद्यायां नैधनमेव पदनवकं चवर्णः वामादिमनोन्मनान्तं भुवननवकम् २९ ॥

कलायां पदनवकं कालीयमेव ङवर्णः महादेवमहातेजोमहाज्योतिषां भुवनत्रयम् ३० ॥

मायायां निवृत्तिपञ्चादूकाराद्दिमान्तं पदनवकं यवर्णः गोपत्याद्यनन्तानि सप्त भुवनानि ३१ ॥

शुद्धविद्यायां याम्यपञ्चादूकाराद्दिक्षान्तं पदनवकं शिष्टं पददीक्षावत् ३२ ॥

ईश्वरतत्त्वे आग्नेयपञ्चादूकाराद्दिरेफान्तं पदनवकं शिष्टं पददीक्षावत् ॥ ३३ ॥

सदाशिवतत्त्वे प्राक्पञ्चादूकाराद्दिहान्तं पदनवकं शिष्टं पददीक्षावत् ३४ ॥

शक्तिभिन्ने शिवतत्त्वे मध्यपञ्चादूकाराद्दिप्रणवान्तं पदनवकं शिष्टं पददीक्षावत् । ३५ ॥

अध्वव्याप्तिरियं ग्रन्थे सूचिता[1] न स्फुटीकृता ।
सम्यग्दीक्षाविधिस्तत्र धीः सुधीभिर्निधीयताम् ॥

(१) सूचिताप्यस्फुटीकृतेति पाठः [illegible]

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

एवमीदृगेकतमप्रकारकृतं दीक्ष्यं निर्बीजदीक्षादीक्षितवर्जं शिष्यं —
'समयाञ्छ्रावयेत्पश्चात्तत्त्वाम्नायोत्थितान्प्रिये' ।
तत्स्वरूपादित आम्नायादुत्थितानित्यनेन सांनो भेदेन समयानां भिन्नाभिन्नरूपत्वेनेति सूचयति ।

नानाह —
'न निन्देद्भैरवं देवं पुराणं वान्यसम्भवम्' ।
लौकिकीं भेददर्शनवासनां च हित्वा तत्सम्भवानि अन्यान्यपि तत्तद्व्याचारणान्यपि भैरवपुराणानि तदुक्तं तत्तदुपास्योपास्यं च तं तं देवविशेषं परभैरववद्भक्त्यैव पश्येत इत्यर्थः ॥

किं च —
'सांख्यं योगं पाञ्चरात्रं वेदांश्चैव न निन्दयेत्' ।
तद्दर्शनस्थांस्तदनुपपत्तिदर्शनेन प्रयोजकव्यापारेण न तन्निन्दायां प्रयुञ्जीतेत्यर्थः ॥

अत्र हेतुः —
'यतः शिवोद्भवाः सर्वे ह्यपवर्गफलप्रदाः' ।
तत्तत्स्वोचितमुक्तिकारिणः तावन्मात्रविश्रान्तानां वाक्यैकवाक्यतया परिपूर्णव्याप्तिविदां सद्यो(८) मुक्तिदा अपि 'अहङ्कृविग्रहाच्छान्तादिति' भाविनीत्या नानारूपाच्छिवात्सर्वपुराणानां उत्पन्नत्वेन तदभिन्नव्याप्तिकत्वात् । अनेनैवाशयेन

(८) ख.ग.घ. सत्यमुक्तिदेति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

यतः शिवोद्भवं सर्वं शिवधामफलप्रदम्) इति पाठं पुराणपुस्तक-
दृष्टमिह केचित्पठन्ति । पूर्णव्याप्ति)मयवेद्याभिप्रायेण तु -
(सर्वान्भ्रमयते माया ह्यमेक्षो मोक्षलिप्सया) इत्यादि वक्ष्यति ।

किं च -

'स्मार्तं धर्मं न निन्देत्तु आचारपददर्शकम्' ।
तदाचाररतानां तु बुद्धिभेदं कुर्यादित्यर्थः ॥

'ब्रह्मादिदेवता याश्च मातरस्त्र्यम्बको शिवः ।
वीरांश्चैव भगिन्यश्च गावो भूतगणास्तथा' ॥

ब्रह्मादीन्युल्लंघनीयान्यपि कारणानि मातरो लौकिकाचार-
तो ब्राह्म्याद्याः चुम्बन्ति वक्त्रपारम्पर्येण शिष्यं प्रबोधयन्ति
रहस्यार्थं यः स गुरुः शिविव शिविमन्त्राराधनादावपि ततः
साधकः वीरः रहस्यचर्यानिष्ठाः भगिन्यो मातृभक्ता योगि-
न्यो गावः पशुपुरुषप्रतिपादितपवित्रभावाः भूतानि
पिशाचापस्मारादीनि गणाः प्रमथाः एतान्सर्वान्न निन्द-
त इति सम्बन्धः ।

किं च -

'देवद्रव्यं न हिंस्याच्च सिद्धान्ते यद्व्यवस्थितम्' ।
सिद्धान्ते निश्चये यद्व्यवस्थितं तद्देवार्थमेवेदं द्रव्यमिति
तन्न हिंस्यात् ।

किं च -

'गुरोरन्नं न भुञ्जीत स्वदत्तं परमेश्वरि' ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गुरूणां यत्र प्रसादीकृतं तत्तदीयमन्नमपि नाश्नीयात् ।

'मद्यं मांसं तथा मत्स्यानन्यानि च वरानने ।

साचारांश्च निराचारांल्लिङ्गिनो न जुगुप्सयेत्' ॥

अन्यानीति वीरद्रव्याणि निराचारानिति तद्रूपेण निह्नुतत्त-
त्स्वरूपाणां सिद्धानामपि भावात् न जुगुप्सीत ।

'चरुकं प्राशयेन्नित्यं'

स्वेष्टदेवतायै दत्तम् ।

'गुरूंस्संपूजयेत्सदा' ।

अन्यथा नित्यार्चाधिकाराभावात् ।

'उपस्करान्महादेवि पादेन तु न संस्पृशेत्' ।

उपस्करान् दृषदुलूखलमुसलादीनि गृहोपकरणादीनि तेषां
मन्त्रसंस्कारेषु नवयागविधौ देवतासङ्केतस्थानत्वेनाम्नातत्वात् ।

'संहितां चिन्तयेन्नित्यं'

संहितां पूर्वं प्रागुक्तम् ।

'भक्तानां श्रावयेत्सदा' ।

गुरुस्तदनुज्ञातोऽन्योऽपि वा अतः प्राधान्येनायं गुरोरेव स-
मयः ॥

'आह्निके न विलम्बेत सन्ध्याकर्म वरानने' ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

आह्निकं पूजादिनित्यकर्म सन्ध्यां सन्ध्याकालसम्पाद्यां मन्त्रो-
पासाम् ॥

'अदीक्षितानां पुरतो नोच्चरेच्छास्त्रपद्धतिम्'।

शास्त्रपद्धतिं पारमेश्वरागमशास्त्रप्रक्रियाम् ॥

साधकविषयमाह —

'त्रिकालं पूजयेद्देवं जपध्यानरतः सदा'।

प्रातर्मध्याह्ने सायं च।

तदेतान्यथायोगं पुत्रकादिः ॥

'समयान्पालयेन्नित्यमुभयार्थफलेप्सया'।

उभयार्थमैहिकमामुष्मिकं च फलं भोगो मोक्षश्च ॥

तदित्थं समयश्रवणान्तां क्रियादीक्षामुक्त्वा ज्ञानदीक्षां
निरूपयितुमाह —

'अतो विज्ञानदीक्षां तु प्रवक्ष्याम्यनुपूर्वशः।
अध्यात्मगतिचारेण केवलेन विशुद्धिकाम्'॥

अनुपूर्वशो वक्ष्यमाणेन ज्ञानक्रमेणाध्यात्ममात्मनि गत्या
ज्ञानेन यश्चारः सौषुम्णमार्गारोहस्तेन केवलेन होमादिहीनेन ॥

तत्र —

'शिष्यात्मानं गृहीत्वा तमात्मप्राणे नियोजयेत्।
अभिमानं तथोच्चार्य कुर्याद्वै सर्ववत्तदा'॥

अभिमानं अहमेव परो हंस इति उक्तरूपम् ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

एतत्सर्वं पूर्वोक्तमनूद्य विशेषमाह —

'उद्घातैश्च ततोऽध्वानं शिवस्य तु विशोधयेत् ।
ततः समुच्चरंस्तत्त्वं पृथिव्याद्यं तु सप्तते' ॥

तत्त्वे निष्कलस्वरूपं पूर्वोक्तमुद्घातयुक्त्या सम्यगुच्चरन्पृथिव्या-
द्यमध्वानं भावनया विन्यस्तं विशोधयेत् ।

कथमित्याह —

'भिन्नाभिन्नस्वरूपेण एकैकं तु यथाक्रमम् ।
सस्वरं त्र्यक्षरोच्चारं देवताभिः समन्वितम्' ॥

मन्त्रकलाख्यामया भिन्नेनाविकल्पविमर्शैकात्म्याभिन्नेन स्वरूपेणो-
पलक्षितं तत एव देवताभिर्ब्रह्माद्याभिः सम्यगभेदव्याप्त्यान्वि-
तमेकैकमकारोकारमकारादिरूपमक्षरं सस्वरमित्यानेनोच्चारव-
त्यपूर्णाविमर्शप्रधानम् अत एव चाक्षरोच्चारमविचलितमन्त्र-
ध्वनिरूपं कुर्वन्निति शेषः ॥

तदत्र —

'आब्रह्मरन्ध्रं भ्रूमध्यात्सन्ति यत्र धरादयः' ।
'ग्रन्थयः करणैः सार्धं तान्भित्त्वा प्राप्यते शिव' इत्याम्नायानुसा-
रोक्त्या भ्रूमध्यादिपदावस्थितसूक्ष्मपृथिव्यादिग्रन्थिपञ्चकभे-
दमुद्घातयुक्त्या प्रादिशति देवः ।

'बिन्दुना शक्तिसंयोगादुद्घातः प्रथमः स्मृतः'
देवतात्रयनिर्मुक्तः'

पूर्ववच्छिष्यचैतन्यं स्वप्राणे लीनं कृत्वा पूर्वोक्तकरणबन्धपुरः-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ररं हृदयान्मध्यमान्तःप्रसरद्युक्त्याहतनवविमर्शमात्रं मन्त्रमुच्चरन्मान्त्र-विमर्शप्रधानाद्यास्तस्याः प्राक्तैर्बिन्दुना संयोगादिति भ्रूमध्ये वज्र-लाञ्छितपीतवर्णचतुरस्रपार्थिवमण्डलमध्यध्यानबिन्दुतेजसा सम्य-गिति ऊर्ध्वोच्चारक्रमेण योगानन्दानुभवात्प्रथमोऽयमुद्घातो ब्रह्मवि-ष्णुरुद्राख्यदेवतात्रयेणनिर्मुक्तः ईश्वराख्यमन्त्रदेवतासमापत्त्यात्मा मन्त्रगुणपृथ्वीतत्त्वगतगन्धाख्यगुणसंशोधनरूप इत्यर्थः ॥

रसाख्यगुणशुद्ध्यर्थं द्वितीयमाह —

'चतुर्थान्तसमन्वितः ।
उद्घातः स तु देवेशि द्वितीयः परिकीर्तितः' ॥

चतुर्थस्य बिन्दुस्थानस्यान्तोऽर्धचन्द्रः तेन प्रागुक्तसम्यगन्वितः तदनुभवावेशरूप इत्यर्थः ॥

रूपगुणशुद्ध्यर्थं तृतीयमाह —

'हंसाक्षरसमुच्चारः सदीर्घो बिन्दुसंयुतः ।
अर्धचन्द्रान्निरोधिन्या उद्घातस्तु तृतीयकः' ॥

हंसपदस्य हंसरूपस्य चाक्षरस्य निष्कलमन्त्रस्य सम्यगिति पूर्वो-क्तयुक्त्या उच्चारः सदीर्घो ह्रस्वं दीर्घं प्लुतं सूक्ष्ममिति भावितत्वा मकारान्ते प्लुतस्तेनापि प्रथमोद्घातावधिना बिन्दुना सूक्ष्मरूपेण सम्यग्युतस्तद्विश्रान्तस्तथार्धचन्द्राद्द्वितीयोद्घातविश्रान्त्यवधेर्निरो-धिकास्थानान्तं प्रसरं तृतीय इति पार्थिवरूपगुणशुद्धिकृदित्यर्थः ॥

स्पर्शगुणशुद्ध्यर्थं चतुर्थमाह —

(2) [illegible]

[illegible]

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अकारोकारमकारान्तानामन्तं बिन्दुस्थानम् । सर्वमपि व्या-
प्तित्वात्तानुप्रवेशप्रणात्मकोद्धातपञ्चकाच्छब्दान्तगुणपञ्चकसंशुद्धियु-
क्त्या पृथ्वीतत्त्वशोधनादित्यर्थः नान्यथेति हुतिदीक्षायामेव
तत्त्वशुद्धिर्भवतीति भेदवादिवन्नास्यां ज्ञानदीक्षायां संप्रापित-
व्यं हुतिदीक्षायामपि ज्ञानस्यैव प्राधान्यादिति निर्णीतत्वात् ।
उक्तं च श्रीमतङ्गपारमेश्वरेपि 'यस्य ज्ञानान्न संप्राप्तिः क्रि-
या तस्य विधीयते' इति ॥

तदित्थम् —

'शुद्धेऽथ पार्थिवे तत्त्वे चिन्तितव्यं तु योगिभिः ।
जलीभूतं तदैवैतदात्मना सह योगतः' ॥

अथ प्राह्: क्रमं सूचयति स च शुद्धतत्त्वाच्छिष्यचैतन्यस्यो-
द्धरणं ततस्तत्स्थीकरणं तत्र आत्मप्राणे योजनं मन्त्रप्राण
शिष्यात्मस्वात्मनां सामरस्यभावनमित्यादिरूपः तदैवेति
पार्थिवं तत्त्वं जलीभूतमित्युक्त्या शुद्धाशुद्धतत्त्वानुसन्धान-
मुक्तं योगिभिः । योगत इत्यनेनायोगिनोत्र नाधिकारो
जातुचिदिति दर्शितम् । एतदात्मना सहेति शिष्यात्मान-
मपि जलतत्त्वभोगाय तदैकात्मतामिव प्राप्तं चिन्तयेत् ।
अत्र चावसरे अर्धचन्द्रस्थाने पद्मलाञ्छितसितवर्णार्धचन्द्र
मण्डलमध्यगतजलबिन्दुरूपं जलतत्त्वधारणं बध्नीया-
दित्याम्नायः ॥

अथ पार्थिवे तत्त्वे शिष्यात्मनि च यथोक्तभावनया —

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

'जलीभूते पुनर्मन्त्री नादेन च गुरूक्तेन ।
बिन्दुत्वधारणायुक्तं '

नादेनेति निष्कलस्वरूपं मन्त्रीति लब्धसामरस्यः बिन्दुत्वमर्धचन्द्रस्थाने धारणा व्याख्याता चन्द्रमिति पूर्वोक्तयुक्त्यार्धचन्द्रनिरोधिनादव्यापिनीपदेषु क्रमेण विश्रान्तिरूपांश्चतुरुद्घातान्दद्यादित्यर्थः । पुनरुक्तेरेदितिपाठे चतुष्पुष्पसंख्यार्थाद्योज्या ॥

तदित्थं जलतत्त्वं संपूर्याथ पूर्वोक्तं सामरस्यान्तं क्रमं श्रित्वा तज्जलतत्त्वात् —

'शिवाद्यादात्मनि चिन्तयेत्' ।

अन्तश्च —

'पूर्णात्मिते तोयसंघाते तेजोभूतं विचिन्तयेत्' ।

अर्थोऽत्रेदेव [योज्यम्] तोयं शिवाद्यात्मना संहृत्यादि प्राग्वत् ॥

अत्र च निरोधिकास्थाने पूर्वोक्तलाञ्छितरक्तवर्णत्रिकोण-मण्डलादिरूपां तेजस्तत्त्वधारणां बद्ध्वा निरोधिनादव्यापिनी स्थानेषु मात्राविश्रान्तिरूपाः ॥ —

'तेजोद्घातास्त्रयस्तेषु निरोधनमवस्थिताः'

तेजोद्घात इत्येषः पाठः निरोधनं कृत्वा तत्र तेजोधारणां बद्ध्वा इत्यर्थः । पूर्ववत्तस्यात्मत्वादि कृत्वा तेजः पूर्णत्वं विभाव्य नादस्थाने षट्कोणबिन्दुलाञ्छितनीलवर्णमण्डलादि रूपां वायुधारणां बद्ध्वा नादव्यापिनीस्थानयोर्मात्राविश्रान्त्यात्म-नोद्घातद्वयेन वायुतत्त्वं शिवाद्यात्मना भोगस्थानं प्रेरयेत् ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अथ —
'आकाशे लीयमाने तमुद्घातेन तु चिन्तयेत्'।
तं वायुम् ॥
एतदुक्तम् —
'नष्टे वायौ ततः शून्यमुद्घातेनैकेन योजयेत्'।
नष्टे इति आकाशांशीभूतत्वाच्छिष्यात्मनो बन्धकत्वाच्चलिते
तत इति सूक्ष्मतममाकाशतत्त्वमन्तर्भूतेनताध्यपञ्चकमुद्घातेनैके-
नेति आकाशस्यैकगुणत्वात् ।
यच्चैतत्सूक्ष्मतमं शून्यम् —
'व्यापिनी सा तु विज्ञेया पञ्चमान्ते व्यवस्थिता'।
पञ्चमं व्योमतत्त्वात्मन्यन्ते व्यवस्थिता तेनाचान्तःशून्यसू-
क्ष्मप्रायूलाञ्छितपरिवर्तुलमण्डलाकारं व्योमधारणां बद्ध्वा मन्त्रो-
च्चारणाभिज्ञो गुरुः शिष्यात्मना सहात्रैव विश्राम्यन्परतत्त्वोन्मय-
तामनुसंदध्यात् । एवं चात्र ज्ञानदीक्षामाहात्म्येन चरितार्थतया
पुनर्भोगप्रदत्वाभावेनाबन्धकत्वात्स्वैरैव भोगभूः शिष्यस्य
योगाधिता भवति यतश्चिदानन्देच्छाज्ञानक्रियाख्यशक्तिपञ्चकसा-
मरस्यसतत्त्वः श्रीस्वच्छन्दभट्टारकशिवादिशक्तिप्रधानाशिवशक्ति-
सदाशिवेश्वरविद्याख्यतत्त्वपञ्चकात्मना षडङ्गितामपि व्यापिन्या-
दिबिन्द्वन्तग्रन्थिपञ्चकस्वरूपोन्मनात्मकमहामायाशक्त्याच्छाद-
यन् मायादिक्षित्यन्तां क्रमात्क्रममधिकाधिकसङ्कोचां तत्त्वत्रिंशा-
ते षड्भिः पञ्चकप्रघट्टकैरन्योन्यं व्याप्तिव्यापकात्मकव्याप्यव्यापक-
भावभिरासूत्रितवान्सङ्कुचितप्रमातृभूमिकायामिति तदनुग्रह-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

प्राप्ततत्त्वरूपेण योगिना गुरुणा शिष्यात्मनैकीभूय यथोक्ता-ध्वतत्त्वव्याप्तियुक्त्या शिष्यचैतन्यस्य समग्रां भोगभूमिं विलाप्य ज्ञानदीक्षया चिदादिशक्तिपञ्चात्मकत्वमेवापादयितव्यम् ।

अत एव पञ्चत्रिंशत्तत्त्वव्याप्तिसारस्वसूक्ष्मपृथिव्यादीनि इत्थं संशोध्यापि तत्संस्कारमयं समनापदमपि शोधयितुमाह —

ना, 'समनां ततो ह्यात्मा' ।

स्वसूक्ष्मतमतत्त्वप्रपञ्चमननमात्ररूपायां समनायामुक्तो गुरुणा शिष्यात्मा तावन्मात्रभेदसंस्कारनिवृत्त्यर्थं योज्य इत्यर्थः ॥

एवं च —

'तत्त्वव्यापी स उच्यते' ।

अशेषतत्त्वप्रथमासूत्रणारूपे यत्समनाख्यं तत्त्वं तद्व्यापक इत्यर्थः ।

इयति च संस्कारपर्यन्ते तत्त्वजाते संशुद्धे शुद्धात्मतां आ-श्नोतीत्याह —

'आत्मव्यापी ततश्चोर्ध्वे' ।

भवतीति शेषः ।

एवमासादितपरशुद्धात्मस्वरूपोऽपि शिष्यात्मा ततोऽपि परां चिदात्मशक्त्यभेदसारां परभैरवरूपतां समनन्तरवक्ष्यमाणयोज-निकाक्रमेणेत्याह —

'सर्वव्यापी ततः पुनः'

भवतीति शेषः ।

अत्र योजनिकामासूत्रयितुमेकोद्घातरूपां युक्तिमाह —

'तत्त्वान्तसंस्थिते ह्यात्मा उद्घातेकेन योगवित् ।
योजयेत्परमे तत्त्वे उन्मनातीतसर्वगे' ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्त्वानामन्तः समनाद्यामूर्ध्वं परं उन्मनातीत इति । तदनु भवानुप्रवेशेन मुक्तिमत्स्वरूपासादनम् ॥

योजयेदित्युक्तिं स्फुटयति —

'योजनां तु परे तत्त्वे शृणु देवि वदाम्यहम् ।

अनयोक्त्यास्यार्थस्यावधाने गम्यत्वं दर्शयति —

तत्र—

'मन्त्रमुच्चारयेद्द्रेवि ह्रस्वं दीर्घं प्लुतं परम् ।

परापरविभागेन यावत्तत्त्वं परं गतम्' ॥

ह्रस्वं दीर्घं प्लुतं सूक्ष्ममतिसूक्ष्ममिति समनन्तरमेव मन्त्रप्रणवाधिकारे अकारोकारमकारबिन्दुनादमन्त्राणां प्रत्येकं प्रणवैकदेशभूतानामपि प्रदेशेऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्त' इति स्थित्या प्रणवत्वमिति वक्ष्यति ततो ह्रस्वं मन्त्रमुच्चारयेत् इत्यादिसामानाधिकरण्यं युक्तमेव परापरविभागेनेति सूक्ष्मातिसूक्ष्मभेदेनेत्यर्थः परं गतमुन्मनातीतं प्राप्तम् ॥

तदत्र —

'त्रिदेवं बिन्दुसंयुक्तमर्धचन्द्रं निरोधिकाम् ।

नादं च शक्तिसंयुक्तं व्यापिनीसमनोन्मनाः' ।

ज्ञानीयादिति शेषः त्रयाणां ब्रह्मादीनां देवानां समाहारो यत्राकारोकारमकारात्मनि कलात्रये तत्तथा ।

किञ्च—

'उन्मना च परश्चैव सर्वव्यापी शिवोऽव्ययः' ।

ज्ञातव्य इति शेषः यथा चात्र ज्ञानं याद्रूप्यं च तत्सर्वं पूर्वमेव चिन्तय निर्णीतम् ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तदित्थम् —

'ज्ञात्वा सर्वमशेषेण विधिमेषां यथाक्रमम् ।
तदा तु योजयेन्मन्त्री अन्यथा नैव योजयेत्' ॥

सर्वमिति पूर्वोक्ताचारप्रमाणादिपरिष्कृतमेषां मातृप्रमेयानां विधिं सम्यगुच्चारणम् अशेषेण निश्चयनिरूपणानुभवेन एव मन्त्री सम्यङ्मन्त्रसतत्त्ववित् ।

तमेव विधिं स्फुटयति —

'बिन्दुस्थं त्रितयं प्राह्ने'

मातृप्रमेयानां यन्मकारान्तं त्रितयं तद्बिन्दुस्थं बिन्दूनुभवात्मता मापादितं सत् प्राह्ने नादात्मनि कुर्यात्तन्मयत्वमापादयम् ।

यस्मात् —

'चतुर्थो बिन्दुरेव हि'

तस्मात्तद्विश्रान्तिपुरःसरमेव नादविश्रान्तं मकारान्तं त्रयं कुर्यात् ।

तदेतत्त्रयम् —

'ब्रह्मा विष्णुस्तथा रुद्रः'

वाच्यभेदात् ॥

एतच्च —

'त्रिमात्रं वर्ण उच्यते'

मात्रात्रयमेतदुच्चारणक्रियात्मकतया वर्ण इत्यक्षररूपतया स्थूलमित्यर्थः ॥

चतुर्थस्तु —

'ईश्वरो बिन्दुदेवस्तु' ।

तत्परामर्शमय इत्यर्थः ॥

तदित्थं मन्त्रोच्चारं यः करोति ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

'कण्ठे शब्दः प्रवर्तते'

तस्य हृदयादुच्चरन्नादकलात्मकमव्यक्ततत्त्वरूपः शब्दः कण्ठे प्रकर्षेण वर्तते ततः प्रभृति पञ्चप्रणवादिकान्वक्ष्यमाणानीत्या उच्चार्यतामासादयतीत्यर्थः ॥

स च —

'तत्र शब्दः क्रियान्तस्थः'

उच्चारणक्रियान्तर्गतः प्रयत्नात्मकशब्दरूपो न तु मध्यावेखरीव्यङ्ग्य इत्यर्थः ॥

अत एवासौ —

'क्रियाशक्तिरिति स्मृता' ।

तदित्थमुच्चारणप्रयत्नगतः । —

'स शब्दस्तालुके देवि ईरितः संप्रवर्तते ।

तस्य'

ततोऽपि —

'किञ्चिद्गतः शब्दो नासिकान्ते प्रवर्तते' ।

नासिकान्तो भ्रूमध्यं तदेतावत्पर्यन्ता मात्री क्रियाशक्तिव्याप्तिः ।

अथ —

'ज्ञानशक्तिस्तु विज्ञेया यत्नतः परमेश्वरि ।

मूर्धस्थानगतः शब्दो ललाटान्तमवस्थितः' ।

यदा स एव शब्दो योगिनः पूर्वोक्तान्नासाग्रादिप्रयोगरूपायत्नान्मूर्धस्थानतोऽर्धचन्द्रादिस्थानाद्योक्तोद्गतशक्त्यावेहं ललाटान्तमवस्थितो भवति तदा सूक्ष्मरूपतोपसंहारादनुभवप्रकर्षमापन्नो ज्ञानरूपतामेतीत्यर्थः ॥

पं० १२ स्त० ३ प्रयोगरूपायत्नेतिपाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तदित्थं बिन्द्वादिरूपतामासाद्याकारोकारमकारात्मा —

'वर्णः शान्ततः'

शान्तं नादात्मतां गतः तद्रूपतामाप्तः ।

तथा भूतस्य —

'तेषामुद्गातः स तु कीर्तितः' ।

तेषामिति बिन्द्वादीनां स एव नादकलानुभवात्मा शब्दः पञ्चादिभेदेन भिन्न उद्गातः पूर्वमुक्तो न त्वन्यः कश्चित् ।

एवमियतीं भूमिं मान्त्रीमाश्रित्यापि —

'तत्रस्था विनिवर्तते' ।

ये ऊर्ध्वां शाक्त्यादिसोपानमालिकामनारुह्य तत्रैव सन्तिष्ठन्ति ये ते —

'शिवज्ञानविवर्जिताः' ।

नादतुष्टाः परमानन्दमयशिवव्याप्तिसाधकतमां मान्त्रीमिच्छाशक्तिमेव नाविशन्ति कुतस्तु शिवमत्र उक्तेनैतत्पदारोहे यत्नः कार्य इत्यर्थः ॥

अथात्रैव बिन्द्वादिपादेषु सूक्ष्मतमानुभवगम्यं भावितमेवान्तरं प्रविभागं दर्शयितुमाह —

'पञ्चधावस्थितो बिन्दुरर्धचन्द्रनिरोधिका' ।

भुवनाध्वनि बिन्द्वावरणस्य निरूपणावसरे वक्ष्यति —

'निवृत्तिश्च प्रतिष्ठा च विद्या शान्तिस्तथैव च ।
परिवारः स्मृतस्तस्य शान्त्यतीतस्य सुव्रते ।
तस्य वामदिग्भागे शान्त्यतीता व्यवस्थिता' इति ।

तथा —

'ज्योत्स्ना ज्योत्स्नावती कान्तिः सुप्रभा विमला शिवा ।
अर्धचन्द्रे स्मृता ह्येता निरोध्यंशे तु सुव्रते ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

रुन्धनी रोधनी रौद्री ज्ञानबोधा तमोपहा' इति
एवमेषां पञ्चधावस्थितत्वम्।

अथ —

'तस्यातीतो भवेन्नादः'।

तस्येति निरोधान्तभवपर्यन्तव्याप्तिकबिन्दुदेवस्य तं बिन्दुदेवमतीतः सन् स वर्णो नादो भवति नादात्मरूपतामेति तमिति वक्तव्ये तस्येत्युक्तिः बिन्दुदेवेऽयं नादरूपतामयतिः एवमुत्तरत्रापि पूर्वपूर्वावस्थैवेत्तरोत्तरं प्रकर्षमित्याशयेन षष्ठी योज्या।

एतदनुभवे युक्तिमाह —

स्व। 'अवच्छिन्नरसो भवेत्।
ईषत्प्रसारितो वक्त्रे'

पूर्वोक्तदिव्यकरणबन्धेनावच्छिन्नतामेतीत्यर्थः॥

एष च —

'देवदेवः सदाशिवः'

देवस्य द्योतनमनन्तस्य बिन्दोरपि देवः शान्तिप्रायदीप्तः प्रभुश्च।

एष च नादरूपः —

'चतुर्विधो भवेच्छब्दो यः सर्वेगवहः स्मृतः'।

नादावरणे वक्ष्यति —

'इन्धिका दीपिका चैव रोधिका मोचिका तथा' इति।

एताभिः युक्तिभिरस्य चतुर्विधत्वम्।

ननु च 'ऊर्ध्वगा तु समाख्याता कला तासां तु पञ्चमीति' भविष्यति तत्कथमस्य चातुर्विध्यं सत्यं तस्यास्तु न शब्दव्याप्तिरित्याह —

'पञ्चमो न वहेच्छब्दः'

पं १० ते. पु., प्रकाशित इति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यः पञ्चमः प्रकारो नासौ शक्तिरूपतया वहतीत्यर्थः ॥
कथं तर्हि भवतीत्याह —
सौ 'ऊर्ध्वगामिन्यसौ स्मृता'
नादोर्ध्वगतेश्चाव्याप्त्यवस्थितो यः शक्तेः संस्पर्शस्तदभिन्नत एव
नादान्तः अव्यक्तध्वनिरिति चोच्यते इत्यर्थः ॥
अथ —
'तस्यातीता भवेच्छक्तिः'
तमपि नादयतीत्यर्थः ।
सा च —
'पञ्चधा तु व्यवस्थिता'
तद्दृश्याति ऊर्ध्वे तु संस्थिता शक्तिः प्रसुप्तभुजगाकृतिरित्युपक्रम्य
(सूक्ष्मा चैव सुसूक्ष्मा च तथा चैवामृतामिता । व्यापिनी' ति ।
अत्र शक्तिव्याप्तेः क्षीणत्वात्कीदृगनुभव इत्याह —
'स्पर्शस्तत्र भवेद्देवि'
ह्लादात्मेति शेषः ।
किं च —
'आत्मवित्तत्र पूर्ववत्' ।
तत्र शक्तिपदे य आत्मवित् शक्त्यनुभवतुष्टः स पूर्ववदिति
शिवपदं प्राप्नोतीति यावत् एवमुत्तरत्रापि योज्यम् ।
अथातः
'व्यापिनी परतश्चैव पञ्चधा तु व्यवस्थिता' ।
सोऽपि स्पर्शस्तदूर्ध्वं पदमारुरुक्षोर्योगिनो व्याप्तिमयात्व्यापिनी-
रूपो भवति तत्र च (व्यापिनी व्योमरूपा चानन्तानाथाप्यनाश्रिते)
ति वक्ष्यमाणसूक्ष्मतमशक्तिपञ्चकानुभवोऽस्ति ।

पं १४ [illegible] नाप्नोतीति पाठः

पं (४) [illegible] शक्तेः संस्पर्शस्तदभिन्नत' इति पाठः ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अत्र च –

‘बालाग्रमात्रितं स्पर्शं कदाचिद्वेत्ति वा न वा’ ।

कदाचिदिति तत्पदारोहावसरे तत्स्पर्शस्पर्शं वेत्ति नवेति तदारोहप्रकर्षे व्याप्तिमात्रमेवानुभवति न तु पृथक्स्पर्शमित्यर्थः ॥

तदित्थम् –

‘व्यापिनी सा समुद्दिष्टा न ज्ञानं परमेश्वरि’ ।

यदेतत्स्पर्शं वेत्ति न वेत्त्युक्तं सा व्यापिनीत्युपसंहृतम् । न ज्ञानमिति नैषा ज्ञानशक्तिरपि त्विच्छाशक्तिरित्यर्थः ॥

अथ –

‘तस्यापि समनातीता’ ।

तदपि व्यापिनीज्ञानमतिक्रम्य स्थितेत्यर्थः ॥

समनं क्रमविज्ञानं उन्मनं युगपदित्युक्तत्वादुन्मनानुभवं प्रविविक्षुः –

‘मनस्तत्र न कारयेत्’ ।

न तत्रैव तुष्येदित्यर्थः ।

तदियतीयमिच्छाशक्तिर्व्याप्तिमात्रीत्यवसेयं समनाद्यां भावाभावात्मनो विश्वस्य भेदस्यासत्त्वगमात् हेयत्वमस्ति इति तामतिक्रम्य –

‘उन्मना परमारोहन्’ ।

मध्ये केवलात्मतामनुभवतीत्याह –

‘शुद्धात्मा तु ततो भवेत्’

तदित्थं शुद्धचैतन्यस्वरूपसामरस्यापन्नम् । ‘शिष्यात्मानं गुरुवर उन्मन्यन्ते नियोजयेत्’

उन्मन्यामन्ते चेति समासः स्वातन्त्र्यशक्तिसामरस्यात्मनि स्वतन्त्रभट्टारकसंवेदने विश्रमयेत् तत्समावेशभाजं इत्यर्थः ॥

एवं च –

‘तत्र युक्तः परे शान्ते महाशान्तिमवाप्नुयात्’ ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मुक्तौ एकत्वं प्राप्तः समस्तस्य भेदकलङ्कस्य गलनात्परं शान्तत्वम् ।

तदित्थम् —

'गुरुपारम्पर्यायातः सम्प्रदायः प्रकाशितः'

परम्परैव पारम्पर्यं गुरूणां शक्तिसदाशिवश्रीकण्ठादीनां पारम्पर्येणायातो ब्रह्मस्थानुभवसञ्चारक्रमेण मया विदितः सम्यग्दीक्षणादिपूर्वं शक्तिपातभाजां प्रदीयत इति सम्प्रदायः प्रकाशितः तथापि सङ्क्रमणयुक्तिपूर्वं मया कथित इत्यर्थः तदेव गुरुतो लब्धोऽपि सम्प्रदायो यथा रूढिमायतो गुरुवर्तनैः शिष्याणां सम्पाद्यते ।

तत्र —

'योजने तु परे तत्त्वे उपायः कथितस्तव ।

ज्ञात्वाचारप्रमाणं तु प्राणसञ्चारमेव तु, इत्यादिना

चतुर्थपटल एवेत्यर्थः ॥

तदित्थं सर्वोक्तमभिमं सम्प्रदायम् —

'एवं ज्ञात्वा वरारोहे सर्वकर्माणि कारयेत्'

सर्वास्तु व्यवहारदशास्तु परिणाममाहात्म्य एव तिष्ठतीति यावत् आचार्यसाधकादीस्तु स्वोचितेषु कर्मस्वेतज्ज्ञानपूर्वकमेव प्रयुञ्जीतेत्यर्थः वरारोहे इति प्राग्वत् ॥

एवं तत्त्वदीक्षाप्रसङ्गाच्छेयं दीक्षा अन्याध्वदीक्षास्वपि कर्तव्या इति भङ्ग्या शिक्षां ददाति — ज्ञान

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

'तत्त्वाध्वानं कलाध्वानं भुवनाध्वानमेव च ।
वर्णमन्त्रपदाध्वानं कृत्वैवं प्रउध्यति प्रिये'।

यथात्क्रमोविनापराध्वपञ्चकं तत्त्वाध्वानमेवं कृत्वेत्युद्धानपूर्वं परे तत्त्वे योजयित्वा प्रउद्यति परभैरवतामाप्नोति गुरुः शिष्यात्मना सह तथान्यमप्यध्वानमेव कृत्वा प्राद्यनीत्यर्थः ।

उपसंहरति—
'एषा वै धारणादीक्षा'।

विज्ञानदीक्षामित्युपक्रम्यापि प्रोक्तधारणाक्रमेण क्रियमाणत्वाद्धारणादीक्षेत्युपसंहारेपि न दोषः ।

नैषा सर्वेण गुरुणा कार्येत्यभिदधद्धावियटलमप्यवतितारयिषुः पाटलिकीं सङ्गतिं करोति—

'कर्तव्या योगिनात्र तु ।
मन्त्रसिद्धेन वा देवि'।

योगिना परसमावेशयुक्तेन यदि वात्र तन्त्रे समनन्तरपटलवक्ष्यमाणसाधनक्रमेण यो मन्त्रसिद्धस्तेन कर्तव्या द्वयोरप्यत्र सामर्थ्याविशेषात्तदन्यस्य त्वनधिकारात् ।

इत्यभियम —
'कृता वै सफला भवेत्'।

सम्यङ्निवृत्तिमासादयन्त्येव ॥

तदेवं चतुर्थपटले कलादीक्षोक्ता श्वसमुद्दिष्टिनयुक्त्या एक तत्त्वदीक्षा च' इह तु त्रिपञ्चनवषड्द्विषड्भेदाच्च्छक्तसमस्तदीक्षा

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

पददीक्षा च तत्त्वदीक्षावत् वर्णमन्त्रभुवनदीक्षाश्च तिस्रः कलादी-
क्षावत् दशमे च वितता भुवनदीक्षा भविष्यतीत्येवम् एकादश्या अ-
ध्ववैचित्र्येण दीक्षाः, ज्ञानदीक्षा चोद्धानयुक्त्या द्वादश इत्येताः
सबीजनिर्बीजसद्योनिर्वाणभेदात्पुत्रकविषये षट्त्रिंशद्भवन्ति । आ-
चार्ये तु सबीजैव द्वादशभेदाः, साधके शिवधर्मिलोकधर्मिभेदा
द्विविधो, पूर्ववच्चतुर्विंशतिभेदाः, समयिनि त्वध्वन्यासस्याभाव-
त्वात् ज्ञानक्रियाभ्यां हृदादिग्रन्थिभेदनतो द्विविधेति चतुःस-
प्ततिरिह संक्षेपतो दीक्षाभेदाः तत्रापि सकलनिष्कलाघोरै-
श्वर्याद्यनुष्ठानभेदात् लोकधर्मिसाधकस्य चावान्तरवैचित्र्या-
द्भौतिकनैष्ठिकाचार्यभेदाच्च बहुप्रकारा भवन्ति । तदत्र दीक्षा-
यामेव प्रत्यवतिष्ठन्ते सौगताः । इह दीक्षया किमात्मनः
संस्कारः क्रियते बुद्धेः । किमात्मग्रहादीनां मलानां किं वा
कर्मणाम् आद्यात्मनः आपातशक्तिपातस्य तदितरस्य वा ।
शक्तिपातोऽक्षीणमलस्यान्यस्य वा । कश्च आत्मनः संस्कारः
कर्मनिवृत्तिः सुखदुःखसंवित्तिनिवृत्तिः । प्रकृत्यादिविवेकदर्श-
ने स्वस्वरूपज्ञानं अद्वैतदृष्टिर्वा ॥ बुद्धेरपि कः संस्कारः
किमिन्द्रियप्रेरणसामर्थ्यं रागादिहान्याधारसमुन्मूलनं वा ।
मलानामपि किं तदेव कार्यप्रसवसामर्थ्यं मरणापेक्षो संस्कारः ।
एवं च कर्मणाम् । स च किमागमैकप्रमाणको युक्तिसिद्धोऽपि
वा । तत्र शक्तिपातादात्मग्रहादिमलक्षयः मलक्षयाच्च श-
क्तिपात इत्यन्योन्याश्रयः । अक्षीणमलस्य शक्तिपाते सर्वमा-
साम्यात् । मलक्षयोऽन्यतः कुतश्चिद्यदि तत एव तर्ह्यात्मनः

पं० [illegible] आचार्ये तु इति पाठः
पं० (७) प्रसरण इति पाठः [illegible]

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

संस्कारो भविष्यतीति किं मुक्तिप्रापकहेतुकेन दीक्षाविधानेन ।
आत्मनश्च नित्यैकस्वभावस्य कर्मतद्भोगनिवृत्त्यनिवृत्त्योरविशि-
ष्टस्य एकः संस्कारः । वैशिष्ट्ये नित्यताहानिः कर्मभोगयोर्व्य-
तिरिक्तयोर्नाशो तस्य किं कृतम् तत्समवायोऽस्य नित्य इति
चेत् सोऽपि कर्मादिवत्स्वात्मन्येवेति आत्मनो न भोक्तृत्वकर्तृत्वे
नापि तद्रूपमुक्तात्मा मुक्तिः स्यात् । प्रकृत्यादिविवेकस्वरूप-
दर्शनपक्षे प्रागनन्तस्वभावतयास्य भेदमानयनः । आत्मदर्श-
नमात्मीयादिदर्शनस्य तन्मूलानां रागादीनां च हेतुरिति
ततोऽस्य बन्ध एव । अद्वैतदृष्टावपरस्य कस्याप्यभावात् क्रिया-
भोगानुपपत्तेः कर्तृत्वज्ञातृत्वतत्त्वैश्वर्यप्रविलयो मुक्तात्मनां
स्यात् । बुद्धेरक्षयेरणसामर्थ्याधाना दीक्षितस्य न निवर्तन्ते ।
बुद्धेरुन्मूलने दीक्षानन्तरं देहपातप्राप्तिः मलानां तेनैव साम-
र्थ्यसाधने प्रवृत्तिस्थित्या मरणापेक्षसामर्थ्याधानमिति प-
लायनमार्गः । मृत्यवसरे च दीक्षितस्यात्मादिग्रहः प्रागदेवो-
पलक्ष्यते एवं कर्मस्वपि वाच्यम् आरब्धकार्यकर्मसंशोधने
दीक्षाया न सामर्थ्यमिति चेत् अत्रापि क आश्वासः । आग-
मप्रामाण्यकमेतदिति चेदागमस्य तदनर्थकः प्रतिबन्धः मन्त्र-
प्रतिबन्धाद्यथा बीजमङ्कुरं न सूते तद्वत्कर्मबीजान्यपि न संसा-
रं सुवते इति बीजादिसंसिद्धयुक्त्या बीजादिवद्दीक्षितस्य तैला-
भ्यङ्गदाहादयोऽप्यसामर्थ्याधानहेतवः क्रियन्तामसूर्तत्वात्
कर्मणामभ्यङ्गादयो न सन्तीति तानि दीक्षैव क्षपयति तथा च
धटदीक्षादीक्षितस्य लाघवमप्युपलभ्यते इति चेन्न नामूर्तस्य
पापादेर्गुरुत्वाभावात् तस्मात्क्षणिकत्वादिभावनापूर्विका

मु/ पं १२ ख० पु० प्रवृत्तिस्थित्या इति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

नैरात्म्यदृष्टिरेव मोक्ष इति अत्रोच्यते –

इहात्मसंस्कार एव दीक्षा तथा ह्ययमात्मा संकोचाभासतत्त्वापूर्णम्मन्यतात्मनेहाभिलाषप्राद्योतितेनाणवेन मलेन शुभाशुभवासनात्मना विविधजन्मायुर्भोगदेन कार्मेण, तत्प्रभवेन च कञ्चुकपुर्यष्टकस्थूलभूतात्मनानाजातिकत्रिविधदेहतदाश्रयविचित्रभुवनभोक्तृत्वार्थसार्थश्रुतीतिभाजा मायाख्येन मलेन च वर्जितः यतः सर्वस्यैव संकुचित ....
भिषङ्कादिमध्यान्तरुल्लेखशून्याकीर्णः इत्यागोपालादिरूपो मुहुरिदं जानामीत्यादिप्रतीतिसिद्ध एवायमर्थः तदीदृशस्यास्यानन्तजन्मसहस्रायत्तेऽवसानस्याप्याकस्मिकगुरुप्रियासिभक्त्यादिवशोन्नीतविदितशक्तिपातानुसारनिर्वर्त्यमानया दीक्षया –

(दीयते ज्ञानसद्भावः क्षीयते पशुवासना ।

दानक्षपणसंयुक्ता दीक्षा तेनेह कीर्तिता) इत्याम्नायनिरूपितस्थित्या एवादिपाशप्रशमनशिवत्वाभिव्यक्तियोग्यतात्मा संस्कारः क्रियते पाशानां च प्रशमनमचिन्त्यमन्त्रशक्तिवशाद्बीजानामिव पुनः प्ररोहादानासामर्थ्यं । यत्तु (नालं बीजादि संसिद्धौ विधिः पुंसामजन्मने तैलाभ्यङ्गाग्निदाहादावपि शक्तिप्रसङ्गत) इत्युक्तं तैलत्वेषामेवोपहास्यतामाविष्करोति यतः स्थावरजङ्गमकृत्रिमाद्यात्मनो विषयस्य स्वकार्यकारणशक्तिप्रशमनं बीजवद्यन्मन्त्रैः क्रियते तत्राप्येतदुक्तं प्रायम अथ तैलाभ्यङ्गादेर्बीज एव शक्तिनिरोधकत्वं मन्त्राणां न तु तथा यीत्युच्यते तर्ह्यचिन्त्यप्रभावत्वात्तेषां पाशप्रशमनेऽपि सामर्थ्यं किं न सह्यते । अथ दोषाः सबीजसन्ताना दीक्षितेष्वनिवारिता दृश्यन्ते इति किमस्य मन्त्रैः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कृतमित्युच्यते तदत्राप्युच्यते प्राक्तनपापप्रशान्तिप्रतिबन्धनं मन्त्रैः
क्रियतेऽस्य न तु रागद्वेषादिप्रशमनं, यथा, यदि विरूपस्य वैरूप्यमः
निवर्त्यापि लोकान्तरगमनीयवशीकरणं मन्त्रैः क्रियते तद्वदेहारम्भ-
कर्मप्ररोधनात्कृतमानदेहे रागाद्यनिवृत्तावपि भाविप्ररोहप्रतिरो-
धनं पापानां कुर्वतां मन्त्राणां किमायातम् । तीव्रतमशक्ति-
पातपूतानां च दीक्षानन्तरं रागद्वेषादिप्रशमः शान्तयोऽपि दृ-
श्यन्ते सद्योनिर्वाणदीक्षायां च त्रैकालिकपापप्ररोधनात्
तदैव देहादिविगलनं शिवत्वाभिव्यक्तिश्च भवत्येव शिवत्वा-
भिव्यक्तावत्र किं प्रमाणमिति चेत् मन्त्रप्रभावसम्पादिततात्का-
लिकदेहदर्शनप्रशमनेऽद्भुतमनुमानं च यथा पुनस्त्याप्य
वशीकारदाहोच्चाटनप्रेयणमारणादि मन्त्रसामर्थ्याद्भवत्येव
तथा दीक्षाफलमपि भवत्येवेति चेतसि निवेशयताम् ।
तत्कालमेव दीक्षातः शिवत्वाभिव्यक्तिः किं न भवतीति चेत्
प्रकृष्टज्ञानशालिभिः क्रियमाणायां सहस्रशो भवति अस्माद-
पि दृश्यत एव । अथोच्यते नित्यस्यात्मनो दीक्षातः संस्का-
रोत्पत्तौ संस्कृतत्वासंस्कृतत्वभेदाद्भेदः स्यादिति चेत् न तत्त-
त्प्रतिभासभेदेऽपि अस्याहन्ताकाहंविमर्शैक्येनैकत्वसिद्धेः दूरा-
सन्नादौ देवकुलादेरिव तद्विमर्शैक्याद्विमर्शनवशादेव च सर्व-
व्यवस्था इति प्रत्यभिज्ञायां निर्णीतं । एतेन भोक्तृत्वकर्तृ-
त्वाद्यन्यस्य समर्थितमेव नैद्विधयभेदेऽपि आत्माव्यतिरिक्ते ना-
स्य स्फुरणम् । यत्क्रमात्मदर्शनं न मुक्तिरपि तु बन्ध इति त-
च्छरीरप्राणपुर्यष्टकशून्येष्वनात्मस्वेवमेव । यत्तु सत्यरूपे
चिदात्मन्यहंविमर्शपरमार्थतया स्वीकृताप्येषज्ञानक्रियाप्र-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्र तथात्मदर्शनं
ह्येव सत्यतोक्ते तत्र केवलमत्रात्मा

मार्थे तत्रात्मदर्शनं मिथ्याज्ञानरूपो बन्धो यावदात्मनि अपि
पूर्णप्रकाशाहंविमर्शपरमार्थात्मप्रबोधविश्रमये विश्वत्रापि च चिदा-
त्मैकपरमार्थे यदनात्मतया ज्ञानं तदपि बन्ध एवेति सर्वथा
विगलितसङ्कोचचिदेकघनविश्वैकात्म्यमयप्रथावत्त्वाभिव्यक्तिरेव
मुक्तिः तत्र चाभेदसारं सर्वं ज्ञात्वा समाप्तमेवेति । तत्प्राप्त्यर्थमेव
दीक्षाप्रवृत्तिः । तदेवमुक्तनीत्या मलानां भेदेन प्रतिपादितत्वा-
त्पृथक् न तत्संस्कारपक्षः कश्चिदित्यात्मन एवाक्तरूपः संस्का-
रो दीक्षया क्रियते अहृद्यमेवास्य स्वरूपमिति स्वरूपादर्शनंद्वय-
दर्शनपक्षयोर्नास्ति भेदः । सद्योनिर्वाणदीक्षायां त्वस्य कर्मस्वभावा-
दिसंविन्निवृत्तिरपि क्रियते इति प्रतिपादितम् । असद्यो निर्वा-
णदीक्षास्तु देहारम्भककर्मशुद्धिर्भगवदाज्ञातो न क्रियते न त्व-
सामर्थ्यात् अतोऽत्रापि यदुक्तं गतिप्रतीत्योः कारणान्याश्रय-
त्वान्यदृष्टतः अदृष्टत्वाप्तुगाल्ल गतिर्दीक्षितस्येति तदप्यदूषणमेव
प्रवृत्त्यादिविवेकदृष्टिबुद्धिसंस्कारपक्षौ अनभ्युपगमपराहतौ
ततो यदुक्तं धारणाप्रकरणक्षोभनिरोधाश्च तेनावश्यं न शक्तेया-
मसामर्थ्ये तस्यादीक्षाद्यनन्तरमिति तददूषणमेव । यदुक्तं पापस्य
गुरुत्वाभावात्प्रत्यवायवती तु कलादीक्षा नोपपद्यते इति तदविदि-
ताभिप्रायतया न सम्यक् यतस्तमोमयपापाद्व्यतिहेतुके देहे
गुरुत्वं तुलादीक्षया घटशुद्धिवत्कारणनिवृत्तिद्वारेण निवर्त्यते ।
तथा च स्मृतिकारः (अधर्मात्तु समे देहे गुरुत्वं यत्क्षयस्य तु ।
धर्मतो लघुतोऽत्यादावुद्गतः संप्रतीयते) इति तथैवेतत्
यः पुनरुक्तमनाद्यनवाप्तिपातस्य दीक्षात्वाभावाच्छक्तिपात-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

एव दीक्षायाः शक्तिपातो मलक्षयात्म च शक्तिपातादितरेतराश्रयः अक्षीणमलस्य शक्तिपाते सर्वस्याप्यसाम्यात् । अथ मलक्षयस्य शक्तिपातादन्यो हेतुः कश्चित्स एव तर्हि शक्तिपाते हेतुरस्तु किं मलक्षयेणेति सत्यमेतत् । किन्तु निरर्गलपारमेश्वरविचित्रशक्तिपातवतो दीक्षितत्वमस्माभिरिष्यते न तु मलपरिपाकादियुक्तस्येति न कश्चिद्दुतचोद्यावस्करसंस्पर्शः इत्युपपन्नमिव दीक्षयात्मसंस्करणम् । अपि च सकलव्यवहारप्राणितभूतसर्वाभ्युपगममाविगीतप्रसिद्धिमद्सर्वज्ञमहेश्वरप्रणीतत्वप्रतीतप्रामाण्ये प्रेक्षापूर्वकार्याचार्यपरम्परानुष्ठीयमानानुष्ठानप्रकटिततत्तत्सर्वनिर्वाणाद्याप्यायनादिनानाफललब्धसंवादे पारमेश्वरे शास्त्रे यद्यथाभिधीयते तत्तथैव । ततश्च यदुक्तं (आगमस्य तथाभावनिबन्धनमप्रयुक्तनाम् युक्तिमार्गमनागेण वदतः परितोषकृत) इति (तदसदेव वस्तुनः) (तस्मादनादिसन्तानतुल्यजातीयबीजिकाम् उत्खातमूलां कुरुत सत्त्वदृष्टिं मुमुक्षवः) इत्युक्त्या आत्मदृष्टेरहन्ताविकल्पवासनात्मकत्वं तद्वितारणमात्रमेव यतः शिरो निर्देशप्रख्याकृतकाहंविमर्शमयत्वमात्मन्यङ्गुलिनिर्देशप्रख्यासङ्केतिकेदंविमृश्यत्वमिव विषयेषु स्वसंवेदने [illegible] यते [illegible] अन्यथा प्रथमसङ्केतग्रहणमेव न कस्यापि घटेत । तन्व [illegible] र्तिते विकल्पवासनामूलत्वमुक्तं तत्कथं यतो यो विकल्पो ज्ञानसन्तानमहन्तयाभिमन्यते स किं स्वात्मनोऽभेदेन तं तथाध्यवस्यति स्वात्मभेदेन वा । भेदपक्ष इदमिति ज्ञानसन्तानस्याध्यवसायः स्यान्न त्वहमिति । अभेदपक्षे तु विकल्पस्य स्वात्माऽपि विकल्पः प्रोक्तो नच तद्युक्तं स्वात्मन्यविकल्पकत्वा-

१७ ख० ग० पु० [illegible] इति पाठः

[illegible]

[illegible]

२४ ख० ग० पु० [illegible] पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

द्विकल्पानाम् । अथ विकल्पस्तात्मनो ज्ञानान्तरैः सह भेदं नाध्यवस्यति न त्वभेदमध्यवस्यतीति उच्यते तर्ह्यध्यवसाये प्रतिषेधः प्रसक्तः इत्यनध्यवसायव्यापार एव स्यात् । अथात्मनो ज्ञानान्तरैः सह भेदमनध्यवस्यद्वात्मनाप्यभेदं नाध्यवस्यति तर्हि येनात्मना सह एषां ज्ञानानां भेदो नाध्यवसितस्तेषामभेदाध्यवसाये तस्यात्मनोऽप्यभेदाध्यवसायः प्राप्तः आत्मवत्तु तेषामप्यप्राप्तोऽन्यथात्मना सह कस्तेषां भेदो न व्यवसायो भेदाध्यवसाय एव ह्यापमितं स्यात् । किञ्चानुभवसंस्कारोद्बोधादात्मनो रूपवैचित्र्यमनुभवतापि विकल्पेन निवृत्तपूर्वोऽप्यनुभवात्मतामध्यवसातुं शक्यते तत्रास्य नारिकेलद्वीपनिवासितुल्यत्वात् न चास्य प्रकाशातिविक्ताध्यवसायसमारोपाभिमाननिश्चयादिपदवाच्याभिप्रायेणाभेदवाच्यः कश्चिदन्यो व्यापारो व्यवस्थापकः परदर्शने सङ्गत इत्यास्ताम् । अतिगहनमेतत्प्रत्यभिज्ञायां विततमस्तीह तु प्रतन्यमानं सुकुमारहृदयानायासयेत् तत्स्थितमेतत् तत्तदसद्भासभेदेपि अखण्डाहंविमर्शसिद्धैक्यपरमार्थोयमात्मेति ॥

ननु च श्रीमत्खेटपालाचार्येण मलपरिपाकहेतुकः शक्तिपातोऽभ्युपगतः स्वतन्त्रशक्तिपातपक्षश्च दूषितः तत्कथं स्वतन्त्रशक्तिपातपक्षाश्रयणेनैतत्प्रतिसमाहितम् अत्रोच्यते अत्रार्थे यदि विवदिषास्ति तदेतदपि निर्णीयते । श्रूयताम्—

अथानादिर्मलः पुंसां पशुत्वं परिकीर्तितम् ।
तुषकम्बुकवद्विज्ञेयं मायाजमङ्कुरस्य तु ॥ इति श्रीस्वायम्भुवसूत्रे मल इति पुंसामिति चोक्तिपर्यालोचनेनैकोऽप्यसौ बहुशक्तिकः अन्यथा बद्धावरकत्वमस्य न घटते एकमुक्तौ च सर्वे मुच्येरन्

पं. ८ ग. घ. [illegible]
पं. १० [illegible]
पं. १३ ख. ग. घ. [illegible] इति पाठः
पं. १० ख. ग. घ. प्रकृति इति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कर्मभिश्च सह परिणमति अमिमस्य परिणामयोगात् परिणामेषु कालविशेषात्केचित्पुनः कथंचित्तीव्रमध्यादिभेदाद्यदा परिपच्यते तदा पुंसां कर्मविपाकमिवापेक्ष्य शक्तिपातं करोति महेश्वरः यावच्च मलस्य परिपाको न जातः तावत्तत्सम्बन्धकार्येणैव तं परिणमति यदा तु कृतकार्यत्वात्मनि पक्वे पच्यति स्वशक्तिपातान्मलशक्तिं निरुणद्धि शामय
द्वा प्रसौ यथा च स्वतन्त्रशक्तिपातनादिपक्षे प्रतिपुरुषं किंचिदेव कर्म कदाचिदेव देवः परिपाच्य भोगयोग्यं करोति न तु सर्वाण्यपि सर्वं युगपत् तत्त्वानि च नियतकार्यकारणभावभाञ्जि दर्शयति मायाप्रकृत्यादि च स्वापप्रबोधयोरचिन्त्येन परिणमयतीति नास्य सर्वत्राविशेषेण कर्तृत्वं तथा मलपरिपाकमपेक्ष्यैति कर्मणो मलस्य च वैचित्र्य विचित्रं परिपाकमपेक्ष्य नियतानुग्रहं पुंसां करोति परमेश्वरो न त्वेवमेव तस्याप्रेक्षापूर्वकारित्वप्रसङ्गादिति तावत् श्रीमत्खेटपालाचार्यमतम् । यदाह भोगकारिकासु (अनाद्यनादिसम्बन्धो मलः साधारणोऽक्षयः । प्रतिपुं नियतस्वस्वकालव्यावृत्तशक्तिक) इति, तथा (शक्ता निरोधिकाः शक्ती नान्यो धर्मोऽस्य विद्यते कर्मसाम्यसमेतस्य हेतुत्वं च भवार्णव) इति, तदत्र यदि स्वातन्त्र्यान्मलो बन्धकः शिवमुक्तानामन्यपि स्यात् । अथ शिवेच्छानच्छिवस्य वीतरागद्वेषत्वान्मुक्तानामन्यपि मलशक्तिप्रेरकत्वं स्यात्, तेषां स्वस्वरूपाभिव्यक्तेर्न तथेति चेत् नेतरेषामपि स्वस्वरूपस्य तथात्वात् । अनादिमलनिरोधात्तु तथात्वं इत्ययुक्ते तन्निरोधस्यैव विचारयितुं प्रक्रान्तत्वात् यदि चानादिर्निरोधः कृतं शिवशक्तिनिरोधस्याधिष्ठानेन, तदप्यनादि चेत्किमुभाभ्यां मलशक्तिकृतनिरोधस्यानादित्वमात्रेणैव स्वलभेनान्तरेण नियतपुंविषयत्व-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

शुद्धानाम् एवमस्त्विति चेन्न शिवस्य सर्वत्राधिष्ठातृत्वं स्यात्, ततश्च
मलसंसर्गात्तद्वत् तेषामप्यतो हि शिववशीकारः पशुस्ततोऽन्यः
किमर्थमप्युक्तम् । अत एव शिवस्य मलपाशाद्यधिष्ठातृत्वमभीष्टम् इति चे-
त् सत्यं इष्यते न तु सिध्यति तद्योगानादित्वेनान्वयव्यतिरेकेणाभावा-
त्प्रयोजनमात्रवशेन च भावव्यवस्थानुपपत्तेः । अस्तु वा नैवं तथापि
पाश्वतिनिरोधाय शिवोऽलं प्रयुङ्क्ते इति शिवतुल्यत्वाद्बहुत्वाच्च प्रत्यु-
त शिवमेव प्रहितं प्रयुञ्जीरन् भूयसानेकापेक्षया सामर्थ्यातिशया-
त् । किञ्च मलशक्तिर्यदि सन्निधिमात्रेण निरोधिका तच्छिवस-
काशे मुक्तात्मस्वपि स्यात् । अथ ज्ञातृत्वकर्तृत्वात्मकस्वरूपावा-
रकेण तर्ह्यात्मनां विकारिता प्राप्ता स्वरूपनाशो वा तेषां
तदतिरिक्तस्य धर्मिरूपस्य वैशेषिकवदाशैवेनाभ्युपगमात् ।
न च[2] मूर्तेन मलेनात्मनाम् चित्स्वरूपाणामावरणं घटते चक्षुः
सूर्यादिरश्मीनां तु भौतिकत्वात्पटलादिभिस्तद्युज्यत एव ।
यद्यपि मद्यविषादेर्जीवशक्त्यावरकत्वं तत्सङ्कोचं प्राणादि-
सर्वं प्रति न शुद्धचिदात्मानं मलसङ्कोच एव तयं प्राथमिको
विचार्यो वर्तते इति स कथं शुद्धचिदात्मनः आवारकः स्यात्
प्रत्युत व्यवायातो मलोऽस्य वेद्यः स्यात् इति सर्वज्ञो भवेत् ।
मलश्च यद्यव्यापकस्तदस्य व्यापकात्मावारकता न स्यात्
व्यापकत्वे तु शिवस्याप्यावरणप्रसङ्गात् । तेषां जीवानां च
सर्वदेशाक्रान्त्यात्मनो व्यापकत्वस्याविशेषात् तस्य च प्रत्येकं
व्यापकेन मलेनाच्छादनात् । आत्ममलयोश्च न संयोगः सम्ब-
न्धः तस्य व्याप्यवृत्तित्वात्तयोश्च व्यापकत्वात् ~~न समवायो~~

(१) ख· ग· घ· पु· व्यतिरेकाभ्यामभावादिति पाठः पं४ ख· ग· पु·

(२) मूर्तेनामूर्तेन मलेनेति पाठः ग· ख· ग· पु·

पं१३ ख· ग· पु· पटलाद्यादिभिरिति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

न समवायो नित्यद्रव्ययोस्तया योगात् । अत एव न कार्यकारण-
भावः नापि तादात्म्यं भिन्नत्वात् आधाराधेयकतापि घटपटादौ न
संयोगाद्व्यतिरिक्ता भवितुमर्हति । किञ्च मलस्य नित्यत्वं व्यापकत्व-
मेकत्वमनेकप्रावृतित्वं शिवस्वभावात्मा दृक्क्रियानिरोधनेन निरोधपरि-
पचने च स्वातन्त्र्यं शिवस्य च मलाच्छिवेभ्योऽणुभ्यश्च भिन्नत्वमत
एवाव्यापकत्वमविश्वप्रावृतित्वं च कर्मफलपरिपाकादिमुखप्रेक्षित-
या च पारतन्त्र्यमित्यादिभेदवादादिकृतं शिवमलयोर्विपर्यस्तत्व-
स्वरूपप्रतिपादनमिति सुभाषितम् । यच्च मलस्य परिणामित्वमु-
च्यते तेनैतदमिश्रस्यास्य कथं स्यात् । कर्मभिः सहितस्य भविष्यती-
ति चेत् न तानि मलस्यान्तः विशन्तीति कास्य तैः सह मिश्रता,
यद्यपि मायाविकारयोगे कर्म यतः 'कारणं मलो भवितो' इ-
त्युक्तं भवद्भिः तथापि विज्ञानकेवलिनां मलस्य कर्मसाहित्या-
भावात्परिणामायोगे शुद्धभावः स्यात् मन्त्रमन्त्रेश्वरादीनां च
योग्यमधिकारबन्धो नामो सहजमलकृतस्तस्य मायोर्ध्वभावा-
दिति तदित्थं मलान्तरमभ्युपगन्तव्यम् । तेषां माहेश्वर्या महा-
मायाप्रावृत्त्यैव तावत्तांशेन बन्धकत्वं न तु व्यतिरिक्तेनान्येन
मलेनेति चेदणूनामपि मायाप्रावृत्त्या सङ्कुचितत्वाभासनं बन्धन-
मस्तु किमनुपपन्नव्यतिरिक्तमलाभ्युपगमेनानुबन्धो मन्त्रादीना-
मपि तादृशेण व्यतिरिक्तो मलोऽभ्युपगम्यताम् । किञ्चायं मलो
ध्वनि न क्वाप्यनुप्रविष्टः इति कथमस्य षडध्वदीक्षायामन्तर्भा-
व्यशुद्धिः क्रियते । कर्मवत्पुंस्तत्त्वान्तर्भावोऽस्येति चेत् न कर्ता-
त्मनः पुंसः कर्माणि संस्कारात्मतयान्तर्भवन्तीति युक्तानि कर्तृ-

(१) तद्योगादिति पाठः ख०
(२) ख०घ०पु० भेदवादादीति पाठः [illegible]
(३) प्रति सुभाषितम् इति पाठः (४) रिक्तोऽभ्योऽमत इति पाठः [illegible]
[illegible]

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

कनिष्ठत्रियमाणं मलस्य तु व्यतिभिन्नस्य कथं तदन्तर्भावः किञ्च नावारकेण पटादिना घटादेः स्वरूपं तिरोधीयते अपि तु तद्विषयं ज्ञातृज्ञानं विहन्यते तथा भावमुक्तात्मनामपि न स मलः स्यात् । तेषां मलेन पुंविषयज्ञानावरणादिति मलस्यावारकत्वं तावदयुक्तं (१) यस्य मलस्य परिपाकोऽभिधीयते स किं तस्य शक्तेर्वा विनाशः उत निरोधप्रतिबन्धः । आद्ये पक्षे एकत्र तत्परिपाके सर्वे मुक्ताः स्युः तच्छक्तेरनेकत्वाभ्युपगमेऽपि सहभूतानां शक्तीनामव्यतिरेकादेष (२) प्रसङ्गः । फलभेदारोपितभेदा हि पदार्थात्मैव शक्तिस्वरूपः । न चानादेर्वस्तुभूतस्य मलशक्तिनिरोधस्य नाशो युक्तः प्रागभावस्य वस्तुत्वात् भवतु नाम शक्तिनिरोधप्रतिबन्धोऽपि विषवह्निशक्तिप्रतिबन्धवत्सर्वानेव प्रति स्यात् तद्वदेव च प्रतिबन्धकनिवृत्तौ तन्निरोधः पुनरुन्मज्जेत परिपाकश्चास्य यद्वहेतुकः प्रथममेव स्यात् । यदि हि कालहेतुकः तत्कालदवधिः सर्वेषां च मलानादित्वस्य तुल्यत्वात् वृक्षफलानामिव तौ मलशक्तीनां सममेव वा समनन्तर्येण वा परिपाकः स्यात् नात्यन्तदूरकालव्यवधानेन 'अथ प्रबलरोधं कुर्वन्त्ययति हि सम्बा शक्तिसाफल्यं दृष्ट्वा च तन्निवृत्त्यै योग्यं शुद्धेऽन्यतमस्य करणं' इत्युक्तनीत्या मलः स्वकार्यं कृत्वा पच्यते तत्पुंनिरोधानन्तरमेव पच्यते । अथ यदर्थं पुंनिरोधः तस्मिन्कलादिक्षित्यन्ततत्त्वोदये भोगे भुक्ते सति पच्यते तदत्र तद्भोगो यदि सामान्येन तदेकत्र शरीरे कलादिक्षित्यन्तमध्ये तत्कार्यस्य भोगस्य सम्पन्नत्वात्तदनन्त-

१ ... कर्तृनिष्ठत्रियमाणमिति पाठः

(१) ... - इति पाठः ख. ग. पु.

(२) ख. घ. ग. पु. एव पाठोऽधिकः ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

रमेव मलपरिपाकः स्यात् । अथ वियोगेण तत्र कदाचिदपि भावि-
कलात्मनो वियोगस्य कर्मजभोगवैचित्र्यस्य तदुक्तत्वात् । अथेश्वरे-
च्छातो मलस्य परिपाकस्तदीयेच्छा यद्यनियमिता तर्हि तत्रः सर्वा-
णूनां स्यादित्युक्तमेव । अथ भोगपर्यायतः कदाचिद्विरुद्धे सम-
बले कर्मणि परिपक्वे अपि विरोधादुदासते कर्माणि तानि चाप-
रिपक्वत्वाद्भोगाय नोन्मुखीभवन्ति इति तं कालमवेक्ष्य भगवान्म-
लं रुणद्धि स च कालो दुःखसुखरहितः स्वयमुपलभ्यतापि
कैश्चिदिति पक्षः ॥

तदत्रापि ब्रूमहे कर्मणां क्रमानुभूतानां क्रमिकफलानां
कथं तावद्युगपत्फलदानोन्मुख्यं कथं तावद्विरोधावसरे तेता-
न्यकर्मफलं न दद्यात् तस्य सकाल एव फलदानोन्मुखत्वं न
तु तत्काल इति चेत्तयोरपि नहि तदेककालं युक्तं ईश्वरेच्छात
एवेति चेत् सा यदि स्वतन्त्रा तदत्रापि तस्य हेतुत्वं वक्तव्यम् ।
यस्य च तुल्यबले कर्मणी भोगोन्मुखे रुद्धे तस्य तत्कालं देहपा-
तः स्यात् । अथ न जात्यायुष्प्रदकर्मानिरोधेऽपि यदीशो मलं
रुन्ध्यात् तद्भोगदात्किमिति बिभेति यत्तु निरोधमवश्यमपेक्षते
यदि च रुद्रशान्तिकर्मदयायामेव मलं रुन्ध्यात्तत्र प्रलयावस्था-
यां सर्वेषां तथा कुर्यात् तत्रापि तेषां तादृग्भोगप्रदकर्मसङ्गोऽस्तीति
चेत् विरुद्धकर्मद्वयसङ्गे तादृग्भोगदं कर्मास्तीति किं वक्तुं न पार्यते ।
किञ्च विज्ञानाकलानां कर्ममलयुक्तत्वेनामीश्वरो युगपन्मलं रु-
न्ध्यादित्ययं बोधितवानिति प्रागेव संख्यानियमानुपपत्तिः ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अथ सत्यपि कर्मसाम्ये परिपक्वमेव मलमीशेच्छा रुणद्धीति केव-
लव्याममनमाश्रूयते तद्युक्तदूषणाहतिः अनुपपन्नव्यर्थकर्मसाम्या-
भ्युपगमदोषश्चापत्ति एतेन तदपि प्रत्युक्तम् । यदाहुः केचित्—

(वैराग्यं भोगवैरस्यं धर्मः कोऽपि विवेकिता ।
सत्सङ्गः परमेशानपूजाद्यभ्यासनित्यता ॥
आपत्प्राप्तिस्तन्निरीक्षा देहे किञ्चिच्च लक्षणम् ।
प्रागस्त्वमेवाभोगसङ्घपूर्वताज्ञानमीयुषा ॥
इत्यादिहेतुके चेच्छा मलं रुन्ध्येद्यदादिति ॥)

यत एतद्दयेऽपि यदीशेच्छैव कारणं यदन्योन्याश्रयः कारणान्त- तत्
रं च वक्तुमशक्यं तस्यापि नियमायोगात् न चैते सर्वे हेतव
ईशेच्छाया आघातशक्तिपातानां तथारूपत्वाद्धेतुः । नाप्येकैक-
स्येशेच्छाहेतुत्वं वैराग्यादेः प्रातप्रो व्यभिचारदर्शनात् परमेशा-
पूजाज्ञानादेश्च मलपरिपाकपूर्वत्वान्न तद्धेतुतीशेच्छाप्रचोदकत्वं
युक्तं । यत्पुनरन्यदुक्तं पुंसां मुक्तेः क्रमिकत्वं दृष्ट्वा ईशेच्छाया
अपि मलपरिपाकहेतुत्वं क्रमिकमनुमीयते यथा भोगस्य क्रमा-
त्तद्धेतुः कर्मपरिपाकहेतुत्वं क्रमिकमिति । तदसत् मुक्तेः क्रमो
मलपरिपाकक्रमात् सोऽपीशशक्तिकृतपरिपचनक्रमादिति सत्यं
ईशशक्तेस्तु मलपरिपाचनक्रमहेतुत्वे लभ्यते स्वातन्त्र्ये तु स्वतः
मलपरिपाकापेक्षया । तस्मान्न कथञ्चिदपि भेदवादिभिर्मलपृ-
थक्कं तच्छक्तिनिरोधनत्वविरामतत्वपरिपाकशक्तिपातादयः
प्रतिपादयितुं । शाक्यन्ते इति यथोक्तमेव साधु । यद्यपि चतुर्थ-
पटले (अभिलाषो मलोऽत्र तु) इत्यत्र मलस्वरूपविचारस्यावस-
रोऽभूत्तथापीहैकग्रथहकेन प्रश्नात्तद्विचारितं मामूत्तत्र दीक्षातत्त्व-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तिमालनोद्यतानां सुकुमारहृदयानां व्यामोह इति केचिदभेदवादे(१)
जीवानामानन्त्येऽपि पुनरन्येषामुदयाभावात् ईश्वरेणाद्यन्तया परिच्छि-
द्यमानत्वाच्च नैयत्यं संसारस्य चानादित्वम् । अतो यदि प्रतियुग-
मेकैकोऽपि मुच्यते तदुच्छेद एव संसारस्य प्रसक्तः । अथ जीवानां
तादृगानन्त्यमस्ति यदीशेनापि न परिच्छिद्यन्ते तदीशस्यासर्व-
ज्ञता स्यात् तदुक्तं मुमुक्षुविवेके मुनिना 'अनवद्यमसर्वज्ञता वा'
इत्यासतामेतत् यत्तु तैः स्वतन्त्रशक्तिपातवैदिपक्षे चोदितं ईश्व-
रस्य निर्निमित्ते निग्रहादिकारित्वे अपेक्षापूर्वकारित्वं युगपत्सर्व-
तत्त्वसृष्ट्या सर्वं प्रति च युगपत्सर्वकर्मफलप्रदाता च जीवानां (२)
च मुक्तौ स्वरूपतापत्तिः पुनर्भवाविर्भावश्च स्यात् आगमस्य मल-
स्य वस्तुत्वाभिधानानुपपत्तिरिति तदेषामपर्यालोचिततन्मतत-
त्त्वमभिधानं यतस्तन्मते पारमेश्वरो चिन्मयप्रकाशात्मातिरेकेण न कि-
ञ्चिदप्युपपन्नमिति स एव स्वातन्त्र्याच्छिवादिक्षित्यन्ततानन्तविश्वा-
त्मना स्वरूपमवभासयिषुस्तथा तथा भातीति कश्चिदनुग्रह-
निग्रहादिभाजनजनमुद्दिश्य परीतो वा भवति अथ च निगृहीता-
नुगृहीततत्तत्प्रमातृस्तत्तत्प्रमेयजातं च स्वभित्तौ दर्पणनगर-
वत्स एवोट्टङ्कयन् यद्वैरन्यकारितां निर्भासयन्नपि न मनागपि
अतिरिच्यते रिच्यते वा दर्पणवदेवेति स एव परं प्रेक्षापूर्वकारी
यश्चित्रचमत्कारमयत्वात् यथा च विश्वमाभासयति तथा तन्म-
ध्ये नियतपौर्वापर्यक्रममपि यत्र यत्र प्रथयति तत्र तत्र कार्यका-
रणभावनैयत्यात्मना कर्मफलादिवैचित्र्येण निमीलितरूपतया
तदुपसंहारेण चोन्मीलितरूपतयेति तावत्येऽपि बद्धमुक्तरूपतया

(१) ऐक्ये च भेदवादे इति पाठः
(२) मलस्यावस्तुत्व इति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वस्तुतस्तु स एव तावद्विश्वात्मना स्फुरतीति न कश्चिदन्यो बद्धो मुक्तो वास्ति न चैवं स्वरूपापत्त्यात्मनि मोक्षे स्वरूपेणापूर्णोऽस्ति सङ्कोचनापूर्णत्वमेव । न च प्राप्तशिवाभेदस्य सर्वसर्वात्मतया सर्वत्र सर्वदा स्फुरतः पुनर्भावोऽस्ति परमशिवस्येव सततस्य शिवादिसकलान्तेनापि महता स्वस्वरूपेण (1) सर्वतस्तावतोंऽशेन तत्तद्रूपेणाच्युतो तत्त्वतस्तु परिपूर्णविश्वस्फारः परमेश्वर एवासाव(2)त्र च पुनर्भवः प्रसङ्गतः स्यादिति यदुक्तं तदयुक्तमेवेति अनादिशुद्धिपरत्वात्प्राप्नोति न भावान्तरमित्यादौ शास्त्रमोक्तो न कदाचिन्मतिः न चास्य यद्विश्वपूर्णात्मताप्तौ परिणाति ब्रह्मवादिपक्षोक्तदूषणावकाशः कश्चिद्विश्वात्मकस्वस्वरूपविमर्शमात्रमयत्वेन विवर्तपरिणामपक्षयोरनभ्युपगमात् । तदित्थम् —

सङ्कोचविकासवता तदुभययुक्तेन तद्विमुक्तेन ।
सर्वात्मना च सततं स्वच्छन्दशिवः स्फुरति ॥ १ ॥
यद्यत्स्फुरति च तत्तद्वस्तु धरण्यादि यद्वदेवं च ।
पौर्वापर्यनियत्या तत्त्वानां क्रमिकतापि युक्तैव ॥ २ ॥
सङ्कुचितजीवरूपं तत्तत्कर्माभिमानफलभुक् ।
भासयति क्रमयोगात् सो दीक्षादावक्रमेणापि ॥ ३ ॥
इत्थं सङ्कोचात्माप्यभिलाषो लौकिकेति गदितो यः ।
सोऽपि तथात्वं स्फुरणाद्वस्त्वेव मलास्तु पाशेषु ॥ ४ ॥
दीक्षायोगज्ञानैर्ध्वंसोऽपि मलस्य नात्मनापूर्णोऽस्ति ।
स्वच्छस्वच्छन्दात्मकचिद्घनताव्यक्तिरेव यन्मोक्षः ॥ ५ ॥
जलमिव जले विनिहितं पयसि पयो यद्वदर्पितं तद्वत् ।
यान्त्यैकात्म्यं दीक्षया दीक्षामन्त्रेण (3) दीक्षिता इति हि ॥ ६ ॥

(१) सरत इति पाठः
(२) ऽप्रतश्चेति पाठः (३) दीक्षाक्रमेणेति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

येरेवमुक्तोऽप्युक्तं नाप्यस्ते हृदयेव वृत्तिकृता ।
येनार्थव्याख्याभिस्तस्मिन्नेवमस्तथा तत्प्रायितः ॥ ७ ॥
तदलं भेदविकल्पैरनर्गलैर्मुक्तशक्तिपातोऽन्यथा ।
स्वच्छन्दाभावैक्यमयी मुक्तिर्दीक्षादिना घटते ॥ ८ ॥
इत्थं दीक्षापाशो यो यो यैर्यैर्यथा विहितः ।
सोऽपीत्थमेव सर्वः सामर्थ्यमतो शक्तिपातेतुः ॥ ९ ॥

शुक्लस्वेर्धामकीर्तं दलितमिह मतं दूषणोद्गारि सम्यक्
विध्वस्तं खेटपालैः कथितमपि मतं भेदसन्धानदक्षम् ।
प्रोक्तं दीक्षासतत्त्वं प्रविगलितमलप्रोन्मिषच्चिन्मयैक-
स्वच्छस्वच्छन्दधामप्रथनवपुःभवत्सर्वसर्वात्मरूपम् ॥ ॥

इति भद्रम् ।

इति श्रीमत्स्वच्छन्दोद्योते तत्त्वादिदीक्षाप्रकाशने क्षेमराजविरचिते पञ्चमः पटलः समाप्तः ॥ ॥ ॥

तत्सदोम् ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तुलाकारविरिञ्चिनागरधरिण्याद्या हि ये यन्त्रकाः
　शाक्ताद्याश्च तथैव शाङ्करनुताः पूर्णा समाप्तात्मनः।
ये श्राप्तप्रणवाभिधाः कृपालवन्तो ऽपि विश्वप्रथा
　तं यन्त्रप्रणवं स्मरामि सततं स्वच्छन्दधामाप्तये ॥

अस्मिन्ग्रन्थे कालस्य साधनानां च स्वरूपं निर्णेतुमवशिष्टं तत्र समनन्तरपटलेन कालो निर्णीयते स च बाहुल्येन सिद्धान्ते सिद्धयो मन्त्रसाधनपूर्विका इति साधनानां स्वरूपनिर्णयाय यन्त्रमपटलान्ते मन्त्रसिद्धेन वेति यदासूत्रितं तद्विभक्तमाह

समयाचारयुक्तस्य साधकस्य वरानने।
जायते विविधा सिद्धिः

समयाः पूर्वोक्ताः आचारो वक्ष्यमाणो मन्त्राराधनप्रकारः वरमुत्कर्षं शृङ्गारस्फारमर्यमाननं भोगापवर्गप्रदपरपदप्रवेशो यस्याः। आचारं क्रमेण स्फुटयति।

गिरिगह्वरमाश्रये
　सुशुद्धे सुप्रदेशे तु सर्वशल्यविवर्जिते।
　प्रच्छन्ने विजने रम्ये भैरवं तत्र पूजयेत्॥

सर्वशल्यविवर्जितत्वमहिकण्टकपाषाणोपद्रवप्रसङ्गादिहीनत्वं प्रच्छन्ने हृदये पूजयेदिति कामनोचितेन सम्भारेण।

अथ
　जपित्वाक्षरलक्षं तु वक्त्ररूपस्य सुव्रते।
　यन्त्रप्रणवसंयोगाज्जपतः सिद्ध्यति ध्रुवम्॥

वक्त्ररूपस्य पूर्वनिर्णीतपरमार्थस्य अक्षराणां द्वात्रिंशतः परिमाणेन लक्ष्यामिति द्वात्रिंशल्लक्षाणि पूर्वमेवाद्यं जपित्वा ध्रुवं निश्चितं सिद्ध्यति यथेष्टां सिद्धिमेति साधकः।　7

* २४ विन पु. आश्रिते, इतिपाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कथं जपित्वेत्याह * पञ्चप्रणवसंयोगाज्जपतः। प्रकर्षेण नूयते
स्तूयते -प्रभेदपरमार्थतया विमृश्यते -अनेन विश्वनिर्भरं पारमेश्व-
रं स्वरूपं येन स प्रणवो निष्कलनाथः तदभिन्नव्यापिकः ओंका-
रोऽपि तस्य च सगमरकुलकैकरेमालिंगाबद्धिश्च मालाकाशादि
कलातत्त्वाध्वा ब्रह्मादिदेवतास्वरूपिण्यस्तासि धराप्रकृतिमयादि दि
तत्त्वानि वर्णोच्चारकलादिस्वरूपाः तदुच्चारयितृवस्था
श्च जाग्रदाद्याः प्रत्येकं पञ्चसंख्याः स्थूलाः शान्तिव्यापिन्यादि-
कलातत्त्वाध्वात उच्चारणकलादिरूपाश्च सूक्ष्मरूपाः प्रादेशोऽप
वृत्तयः सार्वं रूपमनतिक्रम्य न्यस्ताविकल्पश्चेति स्थित्या परि-
पूर्णचमत्कारपूर्णत्वात्प्रणवपञ्चकवाच्याः अत एवैतन्मन्त्रशरीर-
निविष्टत्वादेतेऽकारादयो ब्रह्मविष्णुरुद्रप्रान्तशिवप्रणवाभिधेय
पिण्डबीजविमर्शाविभिन्नस्वरूपाः इति कृत्वा एते पूर्वोक्ताः
सर्व एव पञ्चप्रणवा विद्यन्ते यत्र पञ्चप्रणवो निष्कलस्तदभि-
न्नव्यापिरोकारश्च तस्मिन्पञ्चप्रणवे सम्यग्योगाद्गाढ्यादुन्मी- गाढ
लितहृदयस्वरूपानुसन्धानात्मकत्वात् पूर्वं निर्लीन निष्क-
लतदभिन्नसतत्त्वसकलमन्त्ररहस्यार्थं भावनारूपश्च यो-
जपस्तस्माज्जपतो न त्वक्षरपाठमात्रादित्यर्थः।

न केवलमित्थं जपात्सिद्ध्यति यावत्॥
मुच्यते नतु सन्देहो भेदनात्प्रणवस्य तु॥

पञ्चप्रणवसंयोगाज्जपत इत्युक्तं तद्विश्वमालावर्णकला-
दिविश्वेषण व्याप्तिरूपं भेदनं विना न भवति भेदनं पर-

* पं २० ख॰ग॰ पु॰ चमत्काररूपत्वादिति पाठः

* पं १६ ख॰ग॰ पु॰ ~~तदभिन्नव्या~~ निष्कलव्यापिभिन्ने ति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तत्त्वं विद्याप्रदं इति मुक्तेर्निःसंशयात्वमुत्तमम्॥ तत्र मंत्रोच्चारणाङ्गभूतकालकलाज्ञानपूर्वं कालातीतपदप्रवेशार्थं तद्वेदनमादिशति देवः।

ह्रस्वं दीर्घं प्लुतं सूक्ष्ममतिसूक्ष्मं परं शिवम्।
प्रणवं पञ्चधा ज्ञात्वा भित्त्वा मोक्षो न संशयः॥

प्रणवमकारोकारमकारबिन्दुनादकलोच्चारेषु क्रमेण ह्रस्वाद्यतिसूक्ष्मान्तोच्चारणकालकलाप्रपञ्चरूपं भित्त्वा तद्दूरक्षामपानुप्रवेशाक्रमेणाध्यात्म्य परं भावमुन्मनापदासादनेन ज्ञात्वा मोक्षमाप्नोत्येवेत्यर्थः। अत्र च ह्रस्वादिनादानां परस्परानुषक्तयोच्चार्ये: सूक्ष्मातिसूक्ष्मयोर्बिन्दुनादयोरुपरि अर्धचन्द्रादिनादान्तादिदशाक्षरस्य मात्रोऽप्यनुस्मर्तव्याः। यथोक्तं प्राक् (सूक्ष्मसूक्ष्मतरे भोः देवि मेव त्यजेत्प्रिये) इति ह्रस्वादीनां यथा प्रणवत्वं तथा निर्णीतमिति सामानाधिकरण्यं युक्तमेव न संशय इत्युक्त्या स्वानुभवसिद्धतामस्य दर्शयति

तदित्थं ह्रस्वादिकलाकालकलाक्रमेण वक्ष्यमाणावाचकादिक्रमेण चैकोऽप्ययं महामन्त्रात्मा—

प्रणवः पञ्चधावस्थः।

पूर्वं प्रदिष्टोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्त इति स्थित्या ह्रस्वादयः पञ्च प्रणवा इत्यभिहितमधुना त्वेक एव महाविमर्शात्मा मन्त्र इत्थं पञ्चधावतिष्ठत इत्येव-

१. ख.ग.पु. ऽक्रेति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

समभिहितमित्युक्तिमिदमात्रमेतन्निर्लीनरूपा वस्तुतत्त्वैक्यात्।

किमित्थं पश्चपावस्थितिमात्रात्मैवायं नेत्याह

हंसेन सह संयुतः।

पूर्वं हंसोच्चारस्तिथौच्यते इत्युपक्रम्य हकारस्तु स्मृतः प्राणः स्वप्रवृत्तो हलाकृतिरिति ग्रन्थेन हंसोऽनाहतध्वनिरिति निर्णीतस्तेन स्वप्रवृत्तत्वादेवाकृतकमध्यमप्राणस्फुरत्तारूपेण समनन्तरवक्ष्यमाणनीत्या निःशेषविश्वव्याप्तसम्यक्सामरस्येन सह संयुतः तद्विमर्शे विश्रान्तिपरमार्थोऽयमवस्थौ महामन्त्ररूपः प्रणवः।

तथा च॥

यत्किंचिद्वाङ्मयं लोके शिवज्ञाने प्रतिष्ठितम्।

शिवज्ञानं च तत्रस्थं।

यत्किंचित्सकध्वनौ मध्यालोकेऽस्ति तत्सर्वं शिवज्ञानं च शिवो ज्ञायतेऽनेनेति शिवज्ञानं शिवज्ञाने ज्ञानस्फारे पारमेश्वर्यैक्तव्याप्तिसारे प्रणवे प्रोक्तवक्ष्यमाणरूपा प्रतिष्ठितमभिदेनान्तः स्थितम् यतस्तद्वाङ्मयं परावाक्समरूपं पूर्वोक्तं श्रीसारस्वते स्तोत्रे॥

त्रयी तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरान्

अकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृतिः।

तुरीयं ते धामध्वनिरनुरुन्धान मणुभिः

समस्तं व्यस्तं त्वां परणदगृणात्योमितिपदम्॥

इति। प्रणव इति वक्तव्ये शिवज्ञान इत्युक्तेरयं भावः यद्वेद गहड वेष्णवादिषु रूपसाम्येऽपि प्रणवस्य परमेश्वरे प्रोक्तवक्ष्यमा

पं १ त.ग. पु तत्त्व सोकात

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

णज्ञानव्याप्तिसारतारतम्येन उत्कर्षः अत एव एतद्व्याप्तिज्ञाना-
नुसारेण सर्वत्राभ्यासे पूर्णस्फारमयत्वेन परसिद्धिप्रदः यथो-
क्तं (यतः शिवोद्भवं सर्वं शिवधामफलप्रदम्) इति तत्तत्परि-
मितव्याप्त्यनुसारेण तु स एवमिति सिद्धिप्रदोऽयमित्यभिप्रा-
येण वक्ष्यति (भ्रमयन्त्येव तान्माया ह्यमोक्षे मोक्षलिप्सया)
इत्यास्तां तावदेतदिह यद्येतदेवंविधप्रणवात्मकं शिवज्ञानं
तदपि तत्रेति निरूपितसतत्त्वे हंसे तिष्ठति ।

तदित्थं अस्मिन्निष्कलनाथे यत्तु प्रणवे नित्योच्चरन्नादाव-
मर्शरूपः —

'हंसः प्रणवसंयुतः'

प्रणवे प्रोक्तसतत्त्वे सम्यग्युतः प्राणरूपतया स्थितः अत
एवाशेषविश्वक्रोडीकारिहंससम्बन्धादेव मूलस्थानतोऽकब्रह्म-
विष्णुरुद्रशक्तिशिवप्रणवाभेदव्याप्तिविधं महामन्त्र इत्युक्तमेव । र्यं
अतश्च यदुक्तं (यत्र प्रणवसंयोगाज्जपतः सिद्ध्यति ध्रुवम्) इति
तत्र तादृतविश्रान्तिसतत्त्वे निष्कलोच्चारप्रगुणीकृतमध्यधा-
मसंलीनतया जपः कार्यः इति परमार्थः पर्यवसितः

अथ प्रणवसंयोगं विना कीदृगयमित्याह—

'विना प्रणवसंयोगाज्जीव एको व्यवस्थितः'

जीवो विश्वस्य प्राणभूतो हलाकृतिरेव । यथोक्तम् —

हकारस्तु स्मृतः प्राणः स्वप्रवृत्तो हलाकृतिः । इत्यत्र प्राण
इति सोकाराद्विकलात्मकप्रणवसंयोगं विना एक इति अद्वि-
तीयः सर्वमन्त्रवीर्यान्तर्व्यवस्थित इत्यविचलरूपतयानुच्चार्यः ।
अथ चाव्यवस्थितो न केनचित्प्रतिनियतेन रूपेण स्थितः
नियन्त्रितस्फार इत्यर्थः जीवपदेन व्यवहरन्नयमेव महासु-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तोऽहमात्मा मन्तव्य इति वदन्ति केचित्तु मन्त्रस्वरूपनिरूपणपरे ग्रन्थेऽस्मिन्मुख्यं च शास्त्रार्थमुत्सृज्य हंसशब्देन हंसपदः प्राणशब्देन च स एव यदि वा प्रणवप्राणयोरैक्यात्प्राणयोगं विना जीवः पुरुष एव इत्यनभिव्यक्तज्ञानक्रियास्वभाव इति व्याचष्टे, संयुक्तमयुक्तं वेति सचेतसो जानन्ति यतोऽयं प्रणवसंयोगं विना स्वरूपमात्रावस्थितो जीवः।

ततः —

१ यथा प्रकृतिसंयुक्तो न च तिष्ठति चैकतः ८
तथा षष्ठेन संभिन्नो देहे जीवः प्रवर्तते ९

जीवो हंसः प्रकृत्यनतिक्रमेण स्वभावानुल्लंघनेन संयुक्तः स्वभावानुल्लंघनेन चास्य (विभक्तिर्नानयोरस्ति) इति भावितीत्या प्रकारसंगत एव भवतीत्यकारेण संयुक्तोऽसावेकतः इत्येकस्मिन्नद्वितीये सामान्यस्पन्दात्मनि रूपे न तिष्ठति अपि तु कश्चित्स्पन्दाधिक्यमिव भजते यथा तथा षष्ठेन उकारेण संभिन्नो मिश्रितो देहे प्रवर्तते सर्वेण स्वाभाविकेन प्राणवाहेन वहल्लक्ष्यते एव। तथा शास्त्रापेक्षया यथायुक्तोऽत्राध्याहार्यः।

पूर्वोक्तकरणबन्धानुसारिणा —

१ चोदितस्तु यदा तेन यथा चोर्ध्वं प्रवर्तते १०

तेनेति षष्ठेन उकारेणार्धचन्द्रबिन्द्वादियुक्तेन तदा चेति तदैवेत्यर्थः ऊर्ध्वमिति ताल्वादिस्थानं एतच्चोदनं विना त्वस्याकारयुक्तस्यापि नोर्ध्वं प्रवृत्तिर्भवतीत्यर्थः

तदित्थं —

१ प्रत्यक्षमपि तत्तत्त्वं महामायाविमोहिताः
कथितं नाभिजानन्ति विना शास्त्रेण चोदनाम् ११

तदेतन्नादावमर्शसारं मन्त्रतत्त्वं सर्वस्य प्रमातृरूपं सदोच्चरद्-

१ १४ द०ग० यथा प्राह्णो ऽप्येत्रेति पा०

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यत्वात्स्वप्रकाशत्वमपि तथा धुनाहेतोत्यागमहेतोः कथितमपि महामायया सदाशिवेशादीनपि मोहयन्त्या स्वपूर्णतात्याति परमार्थया विशेषेणेति चिद्रूपत्वात्मस्वरूपे विश्वज्ञानन्यात्म- वा
नावभासनपुरःसरमनात्मनि देहादावात्मतामवभासयन्त्या मोहिताः संकुचन्तो ग्राहिताः वेदनामिति महामायानिरस्का- रियरमेशानुग्रहकारिशास्त्रबोधनं विना न श्रमीति श्रामिमुख्ये- नाश्वासरूपा जानति अतः सर्वथैतत्तत्त्वपरिज्ञानमेव परमो- पादेयमिति तात्पर्यं उक्तं च ज्ञानगर्भे—

(नवास्य परमाक्षरीमपतित रूपमेतद्धि
विधात्मरणवरूपतां समुपयाति हृत्कोटरे ।
१प्रवेद्यमहतात्मभिर्ननति बिन्दुनादात्म य
द्विपाति तदहेलया त्वदनु संस्थितेर्योगिनः) इति

तत्रामन्यर्थमाह—

'षष्ठस्योर्ध्ववहो ज्ञेयः स्वभावमुखसंस्थितः'

षष्ठ ऊकारः चोदितस्तु यदा तेन इत्यत्र य ऊर्ध्ववह ऊर्ध्वप्रव- र्तक उक्तः स्वभावो विश्वानुप्राणको मध्यमार्गः स एव मुखं शिवपदप्राप्त्युपायः तत्र सम्यक्पूर्वोक्ताकरणबन्धक्रमेणोच्चरन् ज्ञातव्यः

अतश्च—

'अप्रकाशः स्वदेहस्थो गुणभूतः प्रवर्तते ' १०

योऽयं स्वप्रहतत्वात्प्रकाशमुपयित्वम्भवको रहस्यरूपश्वासादेन हं/ नाथः स्व आत्मीये उपचितरूपे मध्यधामात्मनि देहे तिष्ठति नित्यावस्थितः स गुणप्रकारं भूतः प्राधान्येन युक्तः संप्रवर्तते ऊर्ध्वमारोहतीत्यर्थः ।

अन्यथा—

पं १२ स्व० ५ वदन्ति इति भावः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

'निर्गुणस्तु यदा देव एकाकी कालवर्जितः
विज्ञातव्यं न किञ्चित्स्यात्केवलो निष्कलस्तु सः'
स्वतन्त्र चित्स्फारमयत्वाद्देवः तदतिरिक्तस्याभावादेकाकी नित्य-त्वात्कालवर्जितः ईदृग्योनाहतनाथो न च तद्विज्ञातव्यं किञ्चित् नासौ केनापि प्रकारेण ज्ञेयो भवति ज्ञात्रेकरूपत्वात् अत एव केवल इत्यद्वितीयः कलाभ्योऽकारादिवर्णेभ्यो ह्रस्वादिकालकलाभ्यो मेयत्वरूपपरिच्छेदेभ्यो निष्क्रान्तः नास्य कलाः यस्मान्निष्क्रान्ताः स एव चिद्घनपरमार्थ इति यावत् एतत्सारत्वादेव च चतुष्कलनाथोऽपि निष्कल इत्युच्यते
अतस्तु—
'तस्य रूपं शरीरं च नास्ति वर्णः क्रिया तथा'
रूपं शुद्धस्फटिकादि, शरीरं पञ्चवक्त्रादि वाच्यगतं, वर्णः अकारादि वाचकरूपः, क्रिया उच्चारादिरूपाः कश्चित्तु वर्णो ब्राह्मणादिक्रिया तदुचिता चेष्टेति ।
तदित्थं ज्ञेयपक्षाद्गुत्तीर्णः—
'स कथं गृह्यते सूक्ष्म अग्राह्यो नित्यमव्ययः'
सूक्ष्मो विश्वकारणं अग्राह्य इन्द्रियागोचरः अव्ययो परिणतिधर्मा ।
यतोऽयमीदृक्—
'एतस्मात्कारणाद्देवि षष्ठं बीजं नियोजितम्'
अस्य परमेष्ठिन मन्त्रराजरूपतापादनया पुंसामनुग्रहायेति शेषः । प्रा/
तन्नियोजनाच्च—
'पञ्चपञ्चकसंयुक्तो देहे सकलनिष्कलः' १३
ह्रस्वादिरूपमुच्चारणकालं कलानां पञ्चकमेकमकारोकारमकार-बिन्दुनादाख्यवाचककलानां, द्वितीयं, तद्वाच्यब्रह्मविष्णुरुद्रेशसदाशिवानां तृतीयं, तदधिष्ठेयधराप्रकृतिमायेश्वरसदाशिव-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्त्वादीनां चतुर्थं, वर्णोच्चारप्रभृत्यवस्थानां जाग्रत्स्वप्नसुषुप्ततुर्यतुर्यातीतानां पञ्चममिति, पञ्चभिरुक्तवक्ष्यमाणैः पञ्चकैः परापररूपतया स्थितैर्यदा देहे हृत्कण्ठादिक्षेत्रे संयुक्तस्तदा नाहतभट्टारको निष्कलोऽपि विचित्रसकलयोगात्सकलनिष्कल उच्यत इत्यर्थः

तेनैतदुच्चारणेऽपि निष्कलतत्त्वविश्रान्तावेवावधानव्यमित्याह—

'ग्रहणं तु यदा तस्य योगी योगविचिन्तकः
योगेनावहितस्यापि भावमात्रं तु भावयेत्' १४

अत्र श्लोक इत्यतीत्यध्याहार्यम् तेनाक्तरूपं पञ्चपञ्चकव्याप्तिरूपं योगं योगविकल्पगुरुपूर्वकाविकल्पविमर्शात्मकं चिन्तयति यो योगी स यदा तस्य ग्रहणमुच्चारणमिच्छति तदा योगेन पूर्वोक्तद्विव्यकरणबन्धाद्यात्मना अन्तः समन्तादवहितस्य मध्यधामाभीप्सुपदं प्राप्तस्यापि भावमात्रमिति सत्तामात्रं परं धामत्वमिति योजनिकाग्रन्थनिर्णीतमनाहतध्वनि परमार्थपूर्णस्फुरत्तां भावयेदुक्तव्याप्तिकमन्त्रोच्चारप्रथमविमर्शपुरःसरं तद्ग्रहणेनैव मन्त्रभूमिमारुह्य तत्परकोटौ विश्राम्यन्मन्त्रवीर्यमनुशीलयेदित्यर्थः।

तदुक्तं श्रीशिवसूत्रेषु 'विद्याशरीरसत्ता मन्त्ररहस्यं' इति तथा—

'महाहृदानुसन्धानान्मन्त्रवीर्यानुप्रवेशः' इति महाहृदस्य विद्याशरीरस्य परसंवित्स्फारस्य सत्ता स्फुरत्ता मन्त्राणां रहस्यं वीर्यं तत्र चानुप्रवेशो महाहृदस्य मध्यमार्गस्थानुगततया मन्त्रव्याप्त्यनुसरणपूर्वकतदुच्चारप्रथमविमर्शानुप्रवेशात्मनः सन्धानान्मन्त्रविश्रान्त्यारोहादित्यर्थः ॥

एवं मन्त्रवीर्यानुप्रवेशयुक्तिमुक्त्वा साधकोचितं तदनुप्रवेशक्रममाह—

'यदा करोति सन्धिं च ऊर्ध्वे बिन्दुः प्रवर्तते'

साधको यदा सिद्धिकामो भवति तदास्योक्तयुक्त्यैव हृत्तालुध्रुपदविश्रान्तेराराधकसंविदनुसारेणोन्मिषितपराक्रमबलो मन्त्रः ऊर्ध्वे

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सर्वाधमूर्धेति समस्तभावाभावरूपशिवादिकालान्त्यन्तजगदा-
स्त्वरणात्मका विभागप्रकाशरूपः प्रवर्तते ततः प्रभृति सृष्टिक्रमेण
हृदन्तस्यापूरयति अभिलषितपदापूरणेनेत्यर्थः ॥
मुमुक्षोस्तु न प्रोक्तस्तत्त्वबिन्दुवपुःसमाधान्यानेन मन्त्रोच्चारणमपि तु-

"बिन्दूपरि च यच्छान्तः शिवः परमकारणम्
तत्र बिन्दुर्लयं याति"

परमकारणत्वेन परमशिवाद्वैतविशाष्टमन्त्रं स्यादिति
यस्मादेवं तस्मात्—

"तत्स्थानं दुर्लभं सुरैः"

सुरैर्देवैः सर्वैरिन्द्रियैश्च मनोनमात्रप्रधानं सूक्ष्ममनोव्यापारं विष-
यसामरस्यपदातिक्रान्तत्वात् स्थानमिति तिष्ठत्यस्मिन्नभेदेन
विश्वमिति व्युत्पत्त्या
एवं विधमप्येतत्—

"षष्ठस्तु बहुसमायोगादभ्यासादचिराल्लभेत्" २६ ॥

समवधानोद्यत इत्यनुषङ्गः षष्ठः स्वरो बिन्द्वाद्युपलक्षणपर
इत्युक्तमेव
अत्र एव—

"षष्ठश्च पञ्चमश्चैव तस्य देवि गुणाः स्मृताः"

तस्येति महाविमर्शात्मनः परतत्त्वस्य षष्ठः ऊकारः पञ्चमस्तु
तदन्तर्भूत एव उकारस्तावेवाथ ऊर्ध्वं बहिःप्राकाश्यमकारस्येति
पूर्वोक्तमेवार्थं यथा ह्रादेवकारस्य प्रोक्तरूपा नियता मकारबिन्द्वादि
प्रमेयपरिपाटी गुणा ऊर्ध्वाधः प्रसरणहेतवो धर्माः शक्तिरूपा
इत्यर्थः स्मृता इति प्रविच्छिन्नेन शिवादि श्रीकण्ठान्तेन गुरुपार-
म्पर्येणेत्यर्थः कश्चित्तु चकारमेवमाहुं चादेतित्वा गुणा इति बहु-
वचनं तथाहृत्यपेक्षयेति व्याख्यानवान् ।
यस्मादेवं ततः—

"सगुणः सकलो ज्ञेयो निर्गुणो निष्कलः शिवः"

इत्यमुक्तनीत्या निष्कलतायोऽपि सकलसंपन्नो यस्तु पूर्वं सकारस्य स्थितः
प्राणः ... इत्यनाहत तायते निर्दिष्टः स एव निर्गुणत्वात्तत्त्वे नि-
ष्कलः स्मृत एव सकलो ग्रहसंयुक्तो निष्कलो ... ॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अत्र उच्चारभावः सुप्रवृत्तो महास्फुरत्तात्मा स्फुरत्ताघनश्च
पूर्वोक्तदृष्ट्या तात्त्विकनिष्कलामर्शसार एवाद्यं सकलनिष्कलभा-
वेन पूर्वं व्यवहृतश्चतुष्कलनाथः।

ततोऽस्मिन् —

१ सकले जप्यमाने तु जप्तो भवति निष्कलः ।१८

यद्येवमयमेव चतुष्कलभट्टारकरूपः सूक्ष्मः सकलपारमार्थिक-
निष्कलतत्त्वविश्रान्त्यर्थं जपाद्युपास्याभीतया श्रीयतां किमिति द्वात्रिं-
शदक्षरात्मा स्थूलः सकलो (जपितव्याक्षरलक्षं तु बहुरूपस्य) इत्या-
द्युक्तो यस्य उक्त इत्याशङ्क्याह —

१ सुरासुराणां देवेन यजनाय च हेतुना ।

रूपं तु सकलं तस्य द्विधावस्थं प्रकाशितम् ।१९

प्राक्शिवाख्यं निर्णीतस्वरूपेण देवेन चिदानन्दपरमार्थेन स्वच्छन्द-
भट्टारकेण सुराणामिति ज्ञानमार्गाश्रितहृदयानां असुराणां च
ज्ञानयोगत्वेन ज्ञानमार्गाश्रितानां मोक्षाद्यर्थं योगोपायत्वेन तस्ये-
ति स्वस्वरूपस्यानाहतात्मनो रूपं द्विधावस्थं सकलमिति चतुष्क-
लबहुरूपात्मकं तत्तदनुग्राह्यानुग्रहोचितं प्रकाशितम्। एतदु-
क्तं भवति एकमेवेदं पारमेश्वरं तत्त्वं स्थितमनुग्राह्यानुग्रहसारं
स्फुरितं न त्वत्र वास्तवः कोऽपि भेद इति। यथोक्तम् —(पुंसामनुग्र-
हार्थाय परोऽप्यवरतां गतः) इति अत एव योग्यजनाभिप्रायेण
केवलचतुष्कलनाथभट्टारकाश्रयः साधनविधिरग्रे भविष्यति
यस्तु तात्त्विको निष्कलनाथो नासौ जातुचिद्ध्येयजप्यादिरूपो
भवति तस्याप्युपायविश्रान्तपरमात्मस्फुरत्तैकघनत्वादित्युक्तं, यत्तु
कलनि- द्विधावस्थं सकलमिति देवानां दैत्यानां च प्रकाशितमिति व्या-
कलं ख्याय दैत्यानां तामसत्वादनुचितमेतत्प्रकाशनं। प्राधान्यभक्तित्वेना-
सुराणामिति पूर्वजात्युद्धरणं विरुद्धमिति केनचिच्छङ्कित्वा

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पूर्वावस्थामात्रकथनमेतदिति परिहृतं तद्युक्तमयुक्तं वेति सचेतसः प्रमाणमित्यलम् पूर्वैः सह पदे पदे निर्बन्धनेन ।

तदेतस्य मूलसूत्रस्य —

"प्रथमं प्राकृतं रूपं विकृतं च द्वितीयकम्" ।

(विकृतं तु तन्मयम-प्रसवरूपं) प्रथममिति विश्वाद्याकारमभिभूतत्वात्तद्यानं प्रकृतेः स्वभावादापातं स्वयम्भूस्वररूपं प्रकाशात्मकं न तु विपर्ययेण व्याख्येयम् (स्वयम्भुस्वरते देव) इति (तस्माद्वर्णस्तु प्राणात) (उत्पद्यते लयं याति) इति (प्राणहं प्राणात्मकं सर्वं प्राणो हंसः प्रकीर्तित) इत्यादिवाक्यव्याघातापत्तेः ॥

तदित्थमेकत्रापि मन्त्रे युगपत् —

"प्रकृतिर्विकृतिश्चैव उभे यत्नेन संयुते" ।२०।

दर्शितमेव तद्यथा मन्त्रे हलाकृतेः प्रकृतिभूतस्य शिरोरेखारूपा विकृतिप्राक्तवाच्या प्रकारकलक्षीति युगपदेव प्रकृतिविकृती यत्नकलायुक्ते ।

अत एव —

"ये पदार्थाः पुरा प्रोक्तास्तत्रासावुच्चसन्महः
प्रवर्तते च एतेन पुनस्तेन निवर्त्यते" ॥

यः समनन्तरमेव 'निर्गुणस्तु यदा देव' इत्युक्त्या निष्कलनाथ उक्तोऽसावुच्चसन्नित्यकारोकारकलासम्भेदेनोर्ध्वं प्रसरन् तत्रेति पूर्वोक्तेषून्मनान्तेषु (पदार्थेषु) तेनैव पूर्वोक्तेन क्रमेण प्रवर्तते द्वादशान्तमारोहति, पुनश्च तेनेति प्रातिलोम्येन निवर्तते हृदयान्ते वर्णव्यक्तिमेति अनाहतध्वनिमेवाविशति मुहुरिति जपावसरे भूयो भूय इत्यर्थः

तदित्थमयं पदार्थेष्वारोहावरोहौ कुर्वन् —

"प्रणवः पञ्चधावस्थः"

पञ्चधात्वमस्य वाचककलाक्रमेण वाच्यरूपेण च प्रथयति ।

पं ३ ख ग घ मूले मंत्र होति पाठ.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

"त्रिवर्णस्य त्रिदेवताः

बिन्दुनादसमायुक्तः प्रणवः परिपठ्यते" २२

बिन्दुनादसम्बन्धं विना वर्णसङ्घातमात्ररूपता भवति न तु प्रकर्षेण नूयतेऽनेन परं तत्त्वं इति ईदृक्प्रणवत्वमित्यर्थः एवं चाकारोकारमकारबिन्दुनादभेदात्प्रणवस्याचकरूपाः पञ्च प्रणवाः ब्रह्मविष्णुरुद्राः वत्सपमात्मेश्वरसदाशिवसहिता वाच्यरूपाः पञ्च च-

तदाह-

"अकारस्य उकारस्य मकारस्य तृतीयकः
वर्णत्रयमिदं प्रोक्तं ब्रह्माद्या देवतास्त्रयः २३
बिन्दुनादसमायोगादीश्वरस्य सदाशिवः
एते वै प्रणवः पञ्च"

ब्रह्माद्या ये त्रयो देवता इति सम्बन्धः वाच्यवाचकरूपा इत्यार्थान्ते चैते।

"हंसः प्राणयुतः सदा" २४

हकारस्तु स्मृतः प्राणो इति यः पूर्वं हंसप्राणो नाहतध्वनिरूपेण सदा युतस्तदनुस्यूतः तां महाविमर्शभित्तिं विना कस्याप्यस्फुरणादित्यर्थः।

अत एवात्र-

"परमात्मा शिवो हंसस्तत्परेण समन्वितः"

यो हंसः स्वयमक्षररूपो वाचकत्वात् वाच्यत्वात् तु परमात्मा सर्वेषां ब्रह्मादीनामनुप्राणकः परनिर्वाणात्मकश्चेयः प्रदत्वा-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ख्छिवो वाच्यवाचकयोरनाविभागेन प्रकाशानन्दघनत्वेन स्फुरणात्मायमीदृशोऽसौ हंसः अपरेणेति प्रोक्तरूपवाच्यवाचकरूपेण प्रणवपञ्चकेन समन्वितः संयुक्तः अत्र चाकारादि- रूपेषु प्रणवेषु ह्रस्वादयुच्चारकलाः जाग्रदादयोवस्थाभेदाः पृथ्वीप्रकृतिमायेश्वरसदाशिवातत्त्वानि च ब्रह्माद्यधिष्ठितानि तत्त्वानि च इति पञ्चकान्तरालेतत्त्वानि अवान्तरभूतानि निर्लीनरहस्यात् प्रणवरूपाण्यनुमन्तव्यानि

न केवलमित्थमपररूपाः पञ्चप्रणवा मन्त्रे व्यवस्थिता इति यावत्-

१ परतः प्रणवान्पञ्च पुनरेव वदाम्यहम् । २५

अन्यतन्त्रसिद्धान्तवैलक्षण्येनेत्यर्थः

तानाह-

१ शक्तिश्च व्यापिनी चैव समनात्मा च निष्कलः।
उन्मना च तथा देवि प्रणवाः पञ्च कीर्तिताः । २६

अत्रापि वाचककलानां वाच्यानां तद्गर्भीकृतसूक्ष्मतमोच्चारकलोच्चारयितृवस्था शक्तितत्त्वाद्यावरणानां च पूर्वोक्तयुक्त्या- प्रणवत्वम् ।

तदेतावतो विश्वस्य भित्तिभूतः-

१ परमः परमो हंसः सर्वं व्याप्य व्यवस्थितः।

यो निर्लीनतरः परमो हंसः स परतः प्रदर्शितया परापरभेदभिन्नं प्रणवपञ्चकं तद्द्वारेण च विश्वं व्याप्य स्थित इति स एव परमोपादेयः तद्भेदविमर्शमयत्वेन निष्कलभट्टारकोऽपि-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तदत्र-

"एते वै प्रणवाः पञ्च परापरविभागतः। २७

परापरेण हंसेन नित्यमेव प्रणामिताः"

हंसो हल्लाकृतिः स्वमा क्रियाद्यकारादि परापरप्रणवयोगास्त्र तुष्कलीं प्राप्तः परापर उच्यते तेनोभयरूपेण प्रणामिताः प्रह्वीभावमापादिताः स्वप्रत्ययमध्ये प्रणवाः कृताः प्रणामिता इत्यैभ्यः पाठः इथत एव प्रकर्षेण नूयते परं तत्वं येस्ते प्रणवा इति प्राक्तम एवोक्तमस्माभिः

अतश्चैते-

"प्रवर्तन्ते हि सर्वत्र भुक्तिमुक्तिफलप्रदाः। २८

सर्वत्रेति साधकपुत्रकादिविषये तस्मादयं मूलमन्त्रः।

"पञ्चभिस्तु युतस्त्वेभिः स पञ्चप्रणवात्मकः"

योनिस्वभावः परापरप्रणवभेदप्रथनद्वारेणैव विश्वत्रकारणं चतुष्कलनाथ इति निर्णीतमेवैतत्

किञ्च-

"तत्रस्थ एकरूपस्तु निष्कलस्तत्त्वतः स्मृतः" २९

तत्रेति पूर्वोक्तप्रणवविश्वान्तिस्थाने चतुष्कलनाथे यस्तिष्ठति एकरूप इति प्रोक्तप्रकृतिरूपे अनाहतभट्टारकः स एव तत्वतो निष्कलनाथ इत्यर्थः

न केवलमसौ यावत्

"उद्योगादपि तद्बीजं"

प्रोक्तनिष्कलसम्बन्धाद्बीजमपीति चतुष्क~~ला~~द्बीनाथोपि निष्कल उच्यते इत्यर्थः किञ्च-

पं ५ ख.ग. उद्योगकृतां प्राप्त इति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

१ सर्वबीजप्ररोहकम् ।

सर्वेषां बीजानां ब्रह्मादिकारणानामङ्‌ब्रह्मादिमन्त्राणां च प्ररोहकं सामर्थ्यप्रदं तद्योगादेव

अत्र हेतुः

१ प्रवर्तते यतो यस्माद्देवासुरनिकेतनम् । २०

अयते गच्छति स्वयमुच्चरति चित्प्रकाशाभेदेन स्फुरतीत्यतो हलाकृतिस्ततो यस्माद्देवासुराणां प्राणिरूपिणां नित्या निकेतने उपासास्थाने चतुष्कलबहुरूपात्मा मन्त्रद्वयं प्रवर्ततेऽनुग्रहादौ स्फुरति ततो युक्तमुक्तं तत्संयोगाच्च तद्बीजं सर्वबीजप्ररोहकम् । इति देवासुरा इन्द्रियाणि तन्निकेतनं प्राण इति केचित् ॥

अतश्च प्रथमपटलनिर्णीतव्याप्त्यनुसारं चतुष्कलबहुरूपाभ्यां विश्वस्य स्वीकारात्तयोश्च परस्फुरत्तासारानाहतमथनि- [हतत्व]
विश्रान्तत्वात् ।

१ तत्र मन्त्राश्च वर्णाश्च प्रतिष्ठां यान्ति नान्यथा ।

मन्त्राः पिण्डबीजानि वर्णा मालामन्त्रसम्बन्धिनो मातृकावर्तिनश्च सर्वेनाहत एव प्रतिष्ठिताः न हि एतां स्फुरत्तां विना कस्यापि स्फुरणं घटते उक्तं च श्रीस्पन्दे तदाक्रम्य बलं मन्त्रा इत्यादि ।

अतश्च-

१ तत्त्वबोधाद्विमुच्यन्ते ह्यहिकञ्चुकवत्प्रिये । २१

दीक्षिता इति शेषः ।

एतत्स्फुटयति-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यत:

"तावद्भ्रमति संसारे यावत्तत्त्वं न विन्दति
।विदिते तु परे तत्त्वे न भूयो जायते पुमान् ३२

यथा हि स्त्यक्तेन कञ्चुकेन न पुनः श्लिष्यति तथा समतान्तेन
बन्धेन त्यक्तेन तत्त्वज्ञानेन भूयः स्पृश्यते।

तत्त्वं हंसरूपमेवेति दर्शयन्नेतदेव भूयः स्फुटयति –
"उपकृतार्थो नरः स्तावद्यावद्धंसं न विन्दति"
विन्दते लभते स्वत्वेन प्रत्यभिज्ञानातीति।

एतत्सोपायं वैधर्म्यदर्शनेन प्रकृते योजयति –
"प्रणवेन समायुक्तं कृतार्थेति विनिर्दिशेत् " ३३

प्रणवेन चतुष्कलेन सम्यगायुक्तमिति निर्गीर्णवद्रूपमापन्नतदु-
च्चारज्ञानतदुच्चारणौपायिकमेव परिनिष्कलस्वरूपविश्रान्त-
त्वान्नरः कृतार्थो भवतीत्यर्थः।

यतश्च –
"उच्चारं च ततो ज्ञात्वा उच्चरेत्तं वरानने"
उच्चरेदुच्चारयेत्तमिति परनिष्कलविश्रान्त्युपायभूतं चतुष्कलं।

तत्र –
"उच्चारस्त्रिविधो देवि हंसस्य समुदाहृतः " ३४

उक्तरूपपरापरप्रणवाधिष्ठानाद्धंसस्यापि परापरः स्वरूपनि-
ष्ठत्वेन तु परात्परः इति त्रिविधो य उच्चारः स उदाहृतः
एते वै प्रणवाः पञ्च परापरविभागशः परापरेण हंसेन " इति
तथा " परतः परमो हंसः सर्वं व्याप्य व्यवस्थितः " इत्याद्युक्त्या
समनन्तरमेवोक्तः।

तमेवोच्चारं स्फुटयति –
" हकारौकारसंयुक्तं बिन्दुना तु तृतीयक"
स्पृष्टिन्यासेन तूच्चारः संहारे योग उच्यते " ३५

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हू इति लुप्तविभक्तिकेऽनाहतस्वरूपदर्शनाय तेन हू यति
यः स्वयमुच्चरद्रूपो हंसः सउपकारेण ऊकारेण च वर्णेन संयुक्त-
स्तदुपरि च बिन्दोरन्ते समीपे तृतीयक इत्यनुस्वारस्वरूपो-
मकारोऽस्य सम्बद्ध एवमेतदन्तो य उच्चारः सृष्टेति नागाद्य-
वस्थात्रयात्मिका त्सृष्टिस्थितिसंहारकारिभेदमयब्रह्मविष्णुरुद्र-
सर्गस्य यो न्यासः पृथक् पृथक् वाचकत्वेन विमर्शेन
न त्वभेदेनेत्यर्थः। एतेषां तु त्रयाणामपि भेदमयानां संहार-
योग इति तुर्यदशाप्रथमकोटिसंस्पर्शात्मकबिन्दुपदैक्ययो-
जनारूप उच्यते न त्वत्र वर्णोच्चारव्याप्तिरस्ति यदा विभक्तः स्यात्।

तेन

‹एवमादिक्रमेणैव मन्त्रमुच्चारयेद्बुधः›

बुधो ज्ञानी च एवमित्युक्तरूपेण दीप्यकारादिक्रमेण मन्त्रमित्ये-
तत्सम्बन्धादेव मन्त्ररूपतां प्राप्तं हंसमुच्चारयेत्।
एतदनुवदन्नत ऊर्ध्वं मन्त्रोच्चार इति कर्तव्यतान्तरमाह-

‹बिन्दुस्थं चिन्तयं कृत्वा वक्त्रमुद्घाटयेत्ततः› ३२

चिन्तयं मकारान्तं बिन्दुस्थं कृत्वेति तदभेदव्याप्तिसारं सम्पाद्य-
नादोच्चारणार्थं वक्त्रमास्यमुद्घाटयेदित्येतदुच्चारावसरे दिव्यं
करणं बन्धनीयादित्यर्थः।

ततश्च-

‹ईषन्मुद्घाटयेत् वक्त्रं तदा नादं विजानत›

उपनयेति कर्तव्यतया मन्त्रोच्चारवह्निमस्य नादाननादानामभि-
व्यक्तिर्भवतीत्यर्थः।

किंच-

‹नादस्थं पञ्चधा चैव शक्तिस्थं पञ्चधा पुनः ३७
व्यापिन्यां पञ्चधा चैव›

मन्त्ररूपं विज्ञानतेऽपि सम्बन्धः पञ्चधात्वं च ब्रह्मादिपञ्चकं

जा/

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

यश्चोन्मुपक्रम्य (परापरविभागेन ते सर्वत्र व्यवस्थिता) इति
समनन्तरवक्ष्यमाणस्थित्या मन्तव्यम्। तेन योजनिकाग्रन्थे
नादस्य यदष्टकलत्वमुक्तं तद्वाचकस्वरूपविमर्शयुक्त्या। इदं-
तु पञ्चधात्वं तत्पदाधिरूढिकेन वाच्यरूपविमर्शयुक्त्येति
न पूर्वापरवैषम्यं किञ्चित्।

किं च-

(समनानिष्कलान्तयोः)
ऊर्ध्वमवस्थितयोः पूर्वनिर्णीतं रूपं विजानीतेत्यनुषङ्गः।

अथैतदुपरि-

(उन्मना च परं तत्त्वं सर्वं व्याप्य व्यवस्थितम्) ३८
पूर्वनिर्णीतं रूपं जानीतेत्यर्थः।

उपसंहरति-

(एवं ज्ञात्वा विमुच्यन्ते शिवतत्त्वविदो जनाः)
एवमुक्तक्रमेण ज्ञात्वा उन्मनान्तानि पदान्यनुभूय ये शि-
वतत्त्वमिति परमशिवमात्मानं विदन्ति प्रतिजानन्ति ते-
विशेषेण सिद्धान्ता वै लक्षणपेन मुच्यन्ते तदत्र हि अवर्णो-
वर्णमकारबिन्दुनादाश्च तस्य सन्मन्त्रा इत्येवं मन्त्रव्याप्ति-
स्तद्गुरुभिर्दर्शिता।

अत्र वैधर्म्यमाह-

(अन्यथा नैव मुच्यन्ते बिन्द्वन्ते ये व्यवस्थिताः)
बिन्दौ तदन्ते च नादादिपदे ये व्यवस्थिता विश्रान्तास्ते
नैव मुच्यन्तेऽपि तु तत्तत्पदोचितविभूतिमेव भजन्ते।

यतः

(ज्योतीरूपं तु बिन्दुस्थं नादस्थं शब्दरूपकम्
शक्तिस्थं स्पर्शगं चैव तदूर्ध्वं शून्यरूपकम्) ४०

३८ ख० पु० तत्पदाधिरूढितेति पाठः : वाच्यरूपकारोति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यदेतद्बिन्दुस्थं त्रितयमिति नादस्थं पञ्चकमित्याद्युक्तं तद्बिन्दुस्थं ज्योतीरूपमिति वेद्याविभागप्रकाशरूपं नादस्थं तु शान्तिरूपमिति विसर्गशाक्तिमयं शक्तिपदावस्थितं तु समग्रानन्दं स्पर्शतत्त्वं तदूर्ध्वे व्यापिन्यां तु शून्यताभासरूपं यतो व्यापिनीधाम।

«ब्रह्मादिपञ्चकं यच्च येषां शून्यं च तत्पदम्»

चकाराद्ब्रह्माद्यधिष्ठेयानां तत्त्वानामपि तैः शून्यमिति वक्तव्ये तेषां शून्यमिति षष्ठ्या ते सर्वे तत्र तदुचितप्रशान्तसंविद्रूपतया स्थिताः न तु क्वापि गता इति दर्शयति अत एव पूर्वमशून्यं शून्यमित्याद्युक्तम्।

ननु ब्रह्मादयो हृदयादिलनाटान्तपदावस्थितास्ते कथमियतीं भूमिमायात इत्याह–

«परापरविभागेन ते सर्वत्र व्यवस्थिताः» ४१

परमेश्वरस्य हि चिदानन्देच्छाज्ञानक्रियाख्याः शक्तयस्तत्पदोचितप्रपञ्चव्याप्तिभाजो ब्रह्मादिपर्यन्तमाभासितवत्यः इति तद्व्याप्तिसारा ब्रह्माद्याः स्थूलसूक्ष्मादिव्याप्त्या सर्वत्र स्थिताः एतच्च एकादशे व्यक्तीभविष्यति अथ चैते तत्तत्पादोचितेन तास्ताः सिद्धीर्ददति।

अथ–

«शून्यातीता तु समना शुद्धात्मा तून्मना तथा»

क्रमेण स्वोचितसंविद्रूपेत्यर्थः।

अथ–

«सर्वातीतं परं तत्त्वं सर्वं व्याप्य व्यवस्थितम्» ४२

सर्वातीतत्वेपि सर्वव्यापकतामस्य स्वच्छस्वच्छन्दचिदानन्दसुन्दरत्वात् यतश्च परं तत्त्वं सर्वं व्याप्य व्यवस्थितमत एवाकारोकारमकारवाच्याः शक्तिः स्थूला अपि।

¹ ध॰ वि॰ पु॰ तेषां शून्यमिति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

‹मन्त्ररूपाश्च विज्ञेया बिन्दुप्रमेयाश्च देवताः›
चकार एवार्थः मन्त्ररूपा एव तदभेदव्याप्तिसारेण विश्लेषेण ज्ञातव्याः।

एवं हि

‹तत्रस्थाः सर्वकर्माणि साधयन्ति न संशयः› ४३

तत्रेति व्याख्यातव्याप्तिसतत्त्वे मन्त्रे स्थिता उपारूढाः। एवमुल्लासक्रमेण हृदयाद्याद्भूतान्तमुल्लङ्घ्य मन्त्रोच्चारमुक्त्वा सिद्ध्यं तं प्रतिनोन्मेषं नातिदिशति—

‹तत्त्वं च उन्मनात्मा तु समना शून्यमेव च
स्पर्शश्चैव तथा शब्दो रूपं च तदनन्तरम् ४४
मन्त्रात्मनि स्थिताः सर्वे ज्ञातव्या दैशिकेन तु›

रूपमिति बिन्दुतेजः तदनन्तरमिति उपकारो कारात्मवर्णस्वरूपं त एते सर्व एव प्रमेया मन्त्रात्मनि निष्कलस्वरूपेऽवस्थिता उल्लासप्रवेशक्रममनिमृष्य मन्त्रावसर एवं मुक्तिसिद्ध्यं तद्रूपेणोपलभ्यन्ते इत्यर्थः दैशिकेनेति प्राधान्यात् तदुपदेशात्तदन्येनापि

न केवलमेते मन्त्रस्थाः सर्वकर्माणि साधयन्ति यावत्—

‹तत्रस्था ज्ञानयोगं च प्रयच्छन्ति वरानने› ४५

ज्ञानं तत्तज्ज्ञेयात्तत्त्वानुभवं योगं तदैकात्म्यप्राप्तिम्।

सर्वकर्माणि साधयन्तीति यदुक्तं तत्र कर्मानुरूपं मन्त्रदेवतानां ध्यानमाह—

‹कर्मकाले तु सकलाङ्कुशः पाण्यादिभिर्युतान्›

कर्म अर्चाहोमादिक्रमम्।

‹जपे तु सकलान्देवि निष्कलेन समन्वितान्› ४६

ध्यायेदित्यनन्तरस्थमनुषज्यते निष्कलेन चिद्घनतापरमार्थेन सम्यगन्वितान् तद्व्याप्तिसारात्। यदा तु सर्वतत्त्वादिरूपां—

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सिद्धिमिच्छति तदा बिन्दुविश्रान्तिसततत्वात्-
(ध्यायेज्ज्योतिर्मयान्सर्वान्)
उक्तं हि ज्योतीरूपं तु बिन्दुस्थ)मिति) इह त्वेतत्फलनिरूपणपरत्वे-
नोक्तमिति प्रकरणतो ज्ञायते इति न पुनरुक्तम्।
अथ बिन्दुविश्रान्त्यूर्ध्वनादपदे-
(प्राप्तसिद्धिप्रदायकान्)
नादविश्रान्तिमयत्वेन ध्यातास्तत्सिद्धिमेव वितरन्तीत्यर्थः
एवमुत्तरत्रापि तदुचितरूपध्यानात्तत्तत्सिद्धिप्रदत्वमेषाम्।
यदाह-
(प्राप्तिस्थाः प्राप्तिदाः प्रोक्ताः शून्यस्था व्यापकाः स्मृताः ४६)
क्रमाज्ज्ञानप्रदास्ते ये समनास्था वरानने
कैवल्यदास्तदूर्ध्वे सर्वज्ञास्तून्मने पदे)
प्राप्तिः सर्वकारणसामर्थ्यं शून्यं व्यापिनी व्यापका इत्याराध-
कस्य व्याप्तिप्रदाः क्रमाज्ज्ञानं शिवादिक्षित्यन्तापोषविषयं
कैवल्यं शुद्धचिन्मात्रकेवलितं यद्भेदवादिशैवानां परं प्राप्यं
ऊर्ध्वे इति शुद्धात्मपदे सर्वज्ञा इत्यक्रमाशेषविश्वाभेदप्रथाप्र-
दाः यथोक्तं प्राक् (समना क्रमविज्ञानमुन्मना त्वक्रम)मिति॥
एते च मन्त्रावयवानुभावाः-
(तत्त्वेन वेदिताः सर्वे ये मया परिकीर्तिताः)
तत्त्वेन पराशुद्धेन वेदिताः सर्वात्मना व्याप्ता वेदितव्या इत्ये-
षुः पाठः विधिविधान इत्यस्यैवायं प्रयोगः।
अत एव-
(तज्ज्ञात्वा सिद्धिदाः सर्वे मुक्तिदाश्च न संशयः)४८
तदिति तत्त्वं साधकानामपि ह्येतत्क्रमेण सिद्धिमुक्तिपर्य-
वसाने नैवेति यौजनिकार्थे मिलितं भिन्नकार्यत्वेऽपि त्वी-
श्वरप्रामाण्यात्।
उपसंहरति-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

« पञ्चप्रणवसंयुक्तं तत्त्वं ते कथितं मया »
पञ्चप्रणवोच्चारोपायप्राप्तं तत्त्वं परमशिवात्मकपरमहंसस्वरूपं 22
ते तवैव योग्यायाः प्रोक्तं मया कथितं नान्यस्य कस्यचित्।
तदेतत् ज्ञात्वा-
« पञ्चप्रणवपूर्वेण ओंकाराद्ययुतेन च ५०
नमस्कारावसानेन बहुरूपेण सुव्रते
जपतः सिद्धिमाप्नोति लक्ष्येणाक्षरसंख्यया » ५१
साधक इति शेषः पञ्चप्रणवचतुष्कूटः पूर्वो यस्य तेन व्याख्यात-
भिन्नतत्त्वाश्रयतत्त्वसन्धानपूर्वं तदुच्चारेऽवधिनमध्यभागीश्च यत्वा-
तल्लीनेन बहुरूपेण यो जपस्ततः सिद्धिमवाप्नोतीति सम्बन्धः
ओंकाराद्ययुतेनेत्यादिनेदमाह यद्यपि प्रणवसमनाव्याप्तिश्च-
तुष्कूटनाथो बहुरूपस्याघोरप्रासादे रूपेभ्य इत्यतस्यादौ प्र-
युक्तः तदापि सर्वमन्त्राणां पूजाजपविषये प्रणवनमस्काराभ्या-
माद्यन्तसम्बन्धो दीपकः कार्यः इति शास्त्रसमयः तेन द्वात्रिंशदक्ष-
रस्य पूर्वे यौ नमस्कारप्रणवौ उक्तौ तावेव चतुष्कूटस्य पूर्वस्य देयौ
यतः तत्रस्थाः सर्वकर्माणि साधयन्तीत्युक्तम् अक्षरसंख्यया
लक्ष्येणेति द्वात्रिंशता लक्षैरित्यर्थः।
एतदेवाधिकावापेन पूरयति-
« प्रणवाद्येन संयुक्तं मन्त्रमेवं जपेत्सदा »
प्रणव आद्यो यस्य चतुष्कूटनाथस्य तेन सम्पुटयुक्तं मन्त्रं ज-
पेत्सदा इति यावत् पूर्वमेव तावदस्यैकाग्रतया अविच्छेदेन
जपः कार्यः इत्यर्थः सदेत्यत्राधिकावापः।
अथ-
« जपान्ते तु पुनर्होमं दशांशेन कारयेत् » ५२
जपित्वा द्वात्रिंशल्लक्षं तु बहुरूपस्येत्याद्युपक्रम्य पञ्चप्रणवस्वरू-
पं निरूप्य द्वितीय « प्रणवाद्येन संयुक्तं मन्त्रमेवं जपेत्सदे»त्याद्युपसंहृत्य
जपान्ते तु पुनर्होमम् इत्युक्तम् अतो जपो क्रमेणाङ्गहोमस्तावदुक्तः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जपे तु मन्त्रदेवता सम्मुखीकरणात्मनि निष्पन्ने
तत्र विलोप स्वाहान्तेन मन्त्रेण जपसंख्यान्तो
दशांशेनेति लक्षत्रयेण सहस्र विंशत्या
च होमः कार्यः इति पुनः पूर्वस्यार्थः ।

अत्र होमे वस्तु चितं द्रव्यमाह —
नृमांसं पुरुषं युक्तो घृतेन च परिप्लुतं
ततः सिद्धिर्भवाप्नोति प्रथमो मध्यमो तमाम्

पुरं पुरुषन्तु: एतत्त्रयं युगपद्गत्वा तत्वेभ्य भस्त्वा
काष्ठौघात पातालं लक्षि द्वीपान्त दिक्पाः
सर्वा प्राप्नोति नत्र यथा संख्ये मत्स्य कूर्मश्च त्वदा
गर्भविरो आह ।

८ त्रिशूलेन तु जप्येन स कुमारपर्वतो भवेत्
ब्रह्मविष्णु देवानां सिद्धदैत्या गणेश्वरानाम्
भयदाता व हर्ता च पूजायां ग्रहकूटं चात्
दर्पं हरति कालस्य पातयद्यत्नतः पि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सोमाद्ये हि लिखितानि दिव्य जन्मादि चालयेत् —
पा/ ब्रह्मराक्षस बेताल कूरग्रह विनाशकान्
स्मरणेनापि यद्दैवि श्रवणात् सिद्ध प्रोक्तानि।
पापानुग्रह कृताद्यु यस्य दत्ता हानी च स्मरणेदिति स
स्मरन मात्रः सन्ना पूज्य त्येवेत्यर्थः ।

अस्य च मंत्रस्य —

१ प्राकृतान्यपि सिद्धंमी वामीत्वि सिद्धंति जप लक्ष्यत
प्रकृति लक्ष्य तद्दश होम मन्याख्यानि प्राकृ
तानि जप लक्ष्यत इति पूर्व मवार्ध दशांश
होम सहितानि वर्तितान् प्रयोग काले कार्मो —
चितो — हृजाप्यत्र मंत्राभि मंत्रणं च क्षितमेव ।
यदुक्तं हृदि ध्याति । एवं पूर्त सह ... अन्य कल्पो —
क्तिर्यानि च । प्रयोगानां प्रयोगाकारो त्येव मंत्र
राजे प्योर प्यर । इत्येवं । एवं पूर्वीरचित मंत्रस्य
क्ष/ यन्ति मुख्य सिद्धि भावेन कदा चिदवसरे प्रयोज्यानि —

वा पूर्यादीत्र

वक्ष्यमाणप्र
योगनिर्दिष्टा
नां द्रव्याणां
तत्तत्कर्मा
प्रयोगे विनिय
गः।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तेनि सर्वं प्रवक्ष्यामि यथावदत्र पूर्वकम्
सम्यगिति यथा विसंवादीनि न भविष्यन्ति यथावदिति
यथेति कीर्तितया युक्तानि । अत्रानुक्तो मे पञ्चो
भवति त्वल्लकृतो मन्त्रस्य लक्षजपः कार्यः इति तच्चो
नमस्ते ॐ करालायै नमस्ते नमः करालवदनेन वित्ति
सर्वं पूर्वमेवासाधारण्येन मन्त्रस्वरूपस्य प्रतिपादित-
त्वा देवतावता यथा प्रतिपादनमस्य सामान्येन मुद्र
सिद्धमपि सर्वं मता पूर्वमेवास्यं जपहोमो कृत्वा
विनियोगकाले कर्माविताद् जात्यन्तस्य प्रयोगः कार्यः
तत्रानन्तरप्रयोगं तावदाह —

मोहना सहदेवा च भूधात्री वक्रलाङ्गना
रामवल्ला सहैताश्च आत्मबीजेन योजयेत्
भक्षये — भक्ष्य पानेषु दातव्यं वशीकरणमुत्तमम् 9
मोहना बलामेरा भूधात्री भूम्यामलकी वक्रलाङ्गना व-
क्राङ्कुरा रामवल्ली रामतरणिरिति प्रसिद्धौ पाथः आत्म —
ख॰ 73 बीजं प्रचुरं प्रदद्यादिति मन्त्राभिमन्त्रितं एवं सर्व-
विसंवादि भवति ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

उत्तवारुणिमूले तु पुष्यर्क्षे तु ग्राहयेत् ।
आत्मेन्द्रियेण संयुक्तं वशीकरणमुत्तमम् ।

उत्तवारुणी विषालता पुष्यर्क्षे विति पुष्यनक्षत्रे सौम्य-
ग्रहयुक्तेन शुक्रवारे रवौ औषधिग्रहणं कार्यमित्यर्थः ओं
षि कल्के धृत्वा आत्मेन्द्रियं स्वशुक्रं ।। यथोक्तं नबीज-
मिन्द्रियं देवतर्थे तदस्मदिन्द्रियमुच्यते ।। अयुक्त मत मस्ते
को षधियोगात् भक्षयेवनेचेति स्थितमेव ।

श्रवणाक्षिमले लाला रुधिरेन्द्रियसंयुतं
भूकरस्य समायुक्तं दातव्यं पयसान्वितं ।

श्रवणाभ्यां मासिभ्यां मले लाला चेति पञ्च रुधिरं वामना-
सिका सम्बन्धि इन्द्रियं शुक्रमित्यात्मीयं सप्तकं भूकरस्य
शृतीके मधु- [illegible] मम तदेकीकृत्य रवौ मंत्राभिमंत्रित-
जल पान मध्ये देयं वशीकरणं । एतत्

अप्रकाशे प्रदातव्यं, दत्वा न प्रविशेतव्यं ।

अन्यथा-

म्रियते विरहेण सा, इयानस्य प्रयाणस्य महिमा यर्थः ।

अधिं कनकबीजस्य वेडस्य मालिबन्धिकाः वोडयां
नरमादन संयुक्ता प्रदद्याद्यासि भामिनि
स्व कापालिको योगी गच्छत्यमतु गच्छति ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तातमिति पूर्वः पानकं दद्रे मालिचन्द्रिका शर्करिका -
नरणी दन्नयोर्नेत्र संयोगो नियमः। एतत्तु तीं भक्ष्य पाने
वश्यमिति प्राकृत् कपालेश्वरमिनिर्दिष्टः कापालिकः ।

श्वेतार्क मूलं मञ्जिष्ठा वटकस्य प्यीर तथा ।
रहोध्वजस्य कुष्ठं च स्वस्वेन्द्रिय संयुतं
भक्ष्ये पाने प्रदातव्यं वशीकरणमुत्तमम् ॥

अर्कतरोः श्वेतत्वं श्वेतपुष्पत्वात् रहोध्वजवटको मूषकः
स्वस्वेन्द्रियं प्राग्वत् ।

मोहनाख्येव कल्याणी मयूरपीयूषयुता ।
आत्मलालेन्द्रियैर्युक्तो वशीकरणमुत्तमम् ॥

कल्याणी प्रियङ्गु मयूरपीयूषा नराकारे औषधेः आत्मला -
लेन्द्रियैरिति बहुवचनादिन्द्रियद्वये उभयोरपि उक्तानां -
अपि संवादि ।

वशीकरण

लज्जालुका च गोरम्भा चंडालीकर्मकं तथा
नगेन्द्र पद मिश्रं नराभ्रबीज समन्वितम्
एष एव वरो दिव्यो दीयते यस्य सुव्रते
मधुरेण समायुक्तो यावदायु वशी भवेत् ॥

लज्जालुका लेंगड़ा गोरम्भा कदली चंडाला ख्याता प्रोक्तौः
कर्मकं प्रथम मूलं मयूरविपुष्पेण तस्य दुरध्यान्तर
संयोगात्मरण प्राक्तो निर्णयः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ब्रह्मकपाल युद्धे च अपमेन विनिर्मिताः १

देके — वक्त्रं धृतं तथा रक्तः बीजो हृत्कमले तथा २

शून्ये — मूले रक्तं तथा केयूरं ललाटे चैव वरानने ३

पुत्रकदी — पुत्रजाति: कृता ह्येव यन्त्री मैव कतः स्थिता — नागेन्द्र पद्म धृता

पुष्पवृष्टि नेयन्त्रीति वनिताना वरानने — मोहना त्रिपुर कन्या च

भद्रे यानेन प्रदत्तवो योगस्थिर पूजितः ४

अपनेन विनिताः पुष्कद्वरमणाः वक्त्रं धृतादि स्वप्नीयं हृत्कमले नाभिमले पुत्रजाति शैथयविपूपः कृतहस्ता-कृताञ्जलि: विष्णु कन्या प्रसिद्धा यन्त्री श्यामलके त्रिपुर पूजित-इति (विसे वर्दी । एव मन्त्रो वपीकरे प्रयोग उक्तः ।

अथ —

(अथ इदं प्रवक्ष्यामि पूजनं गर्विता त्मनां)

तत्र

(काकोलूकस्य पक्षां च वैरोचं मूत्रमृत्तिकां)

विधिर्यथा: —

(कृत्वा प्रति कृति प्राज्ञः काक ऐकेन लेपयेत्)

अथाप्युक्तं —

(काकोलूकस्य पक्षांश्च पुरेतस्या विनि क्षिपेत्)

अथ —

(तौ वन्तु पायेति विवेनत्)

तत्र वेनित्वा स्थगित स्थापिता या तस्याः — धूम पुनाग्नि मया यदि ।

प्रज्वाल्य होमयेत्तत्र काक पक्षां च सज्जते

अष्टगुणा यव सहिता नवरमन्त्रेण भावितान्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यस्य नाम कुसुमद्विषय यकारद्यक्ता गोचरं   शोधितं
मन्त्रावसाने विन्यस्तं विसर्गान्तो प्रचारयेत् ।

तमिति पूर्वः उद्धृत्य पत्रादि श्मशानवस्तधूलि दंड
मध्यगतानि पत्राणि मंत्रावसानं दुति ग्रथितबहु रूपा
न्ते विसर्गान्तो यकारे चैटचनो प्रयुक्तेन शोधितं सम्पुटितं
यस्य पुत्रो नामेति यः देवदत्तो य उच्चारितो भव विति क्रो-
धं उद्वर्ग ये यः कोपसमाविष्ट एव वक्ष्यमाण नीत्या पूतमध्ये
तरं कक पक्षा तुह यात्मा धवाः भूत उच्चार यित्वेति सम्बन्धः ।
स दूष्य कुचारितः —
(भ्रमते कक वत्परौ पूज्य याधि निपीडितः)
विद्वेषे प्रयोगमाह —
पित्रस्थके निम्ब पत्राणि मत्किरणं तु तथापित
पुत्रोः प्रतिकृतिं कृत्वा श्मशानपुष्पे तु वेष्टितं
धूम धूम्रे निवेनधौ तु वह्निं प्रज्वालि बाधाये
पुष्पे विभीत तरुजे यस्य नाम्नोपि हा मयेत्
विद्विष्टो वै भवेक्तौ तौ: काम देव समो पियः ।
पिस्या को उष्ण बीजकल्कैः विप्रश्व सरायां दुर्वा श्मशान कु—
समे विभीत पुष्पे वेष्टिता मिति तन्माला चलिता नाम्ने ति
विद्विष्टो भवतु इत्य नेन विद्वेषणजाति युतेन बहुपुष्पे ल्या
यो द्रुमो भूतर पात संत्ये: ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

अथास्य विद्विषस्य न्यस्य वा सुभगीकरणमाह –

प्रियङ्गु लतिका मिश्रं तण्डुलं घृतबोधितं (घि. वेष्टितं)
हुत्वा विधिपूतं देवि सुभगा सम्प्रजायते ।

प्रियङ्गु लतिका गन्धप्रियङ्गुः अत्र यागयितं बहु हव्यमेवा
चार्यागुकः सुभगो भवति यत्र सौम्यजातिः प्रयोज्य इति ।

जाति कुसुमलक्षे मिश्रे त्रिमधु सक्ते तिले हुते ।
सुभगत्वमवाप्नोति रूपहीनोऽपि मानवः ।

त्रिमधु क्षीरप्लुतिकायुतं अत्रापि पूर्ववत् ... घृतान्तपातसंख्या (स्वा)
... होमः एव मूलमन्त्रावृत्ति कर्मोचितो ह्यन्यनो होमो घृतान्तर
घृत संख्या एव ।

तिलैर्लवणसंमिश्रैः त्रिमध्वक्तैर्हुतैः प्रियैः
सप्ताहाद्दृश्यतां याति या स्त्री दुर्भगचिता ।

आकर्षणमाह –

राजिका लवणं चैव मधुक्षीरपरिप्लुतं
होमयेन्नाम संमिश्रं यस्याकर्षणं तदुत्तं । (र्षं, तं)

राजिका आसुरिका एवं मधुमाता क्रमेणोक्ता सर्षपी करः
होमेन तोकः ।

अधुना मारणादि प्रयोज्यं द्रव्यक्रमेणाह ।–

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

‘नरस्य रोचनां गृह्य द्विरदस्य मदेन तु
भावयित्वाभिमन्त्र्येत मन्त्रेणाष्टशतं जपेत्
स्नाने विलेपने मद्ये गन्धे वा यस्य दीयते
स वश्यो भवति क्षिप्रं धनदः प्राणदस्तथा।’

नररोचनां गोरोचनावद्गृहीत्वा हस्तिमदेन लिप्त्वा मद्ये रोगति बहुरूपेण प्राग्वदूहप्रयोगे ज्ञायते तेन द्रव्यमष्टोत्तरशतजपा दभिमन्त्र्य यस्य स्नानादौ दीयते स वश्यो भवतीति सम्बन्धः

मारणमाह-

‘अथवा मारयेत्क्षिप्रं शत्रुं निश्चितमात्मनः
अपकारशतैर्युक्तं कृतघ्नं अशुचेतसम्
न तु स्वल्पापराधम्।

तत्र-

‘कपालद्वयमादाय नाम शत्रोः समालिखेत्
कपालसंपुटस्थं तद्विषाङ्गारेण भावितम्
रुधिरेण समायुक्तं हूंफट्कारविदर्भितम्
महाप्रेतवनं गत्वा।’

विषेण श्मशानाङ्गाररुधिरविमिश्रेण मषीं कृत्वा श्मशान एव कपालयोः शत्रोर्नाम द्वितीयान्तं विदर्भितमिति (अभियोयं भवेत्पूर्वं ततो मन्त्रः सकृद्भवेत् विदर्भितो भवत्येष) इत्याम्नातत्वादन्ते न्यस्तहूंफट्कारं मारयामि हूंफडित्यन्तं साध्यकं रुद्रभैरवरूपस्वात्माभिमानानुसन्धानेन लिखेत्।

अथ-

‘स्वच्छन्दं पूजयेत्ततः
कृष्णमाल्योपहारैश्च।

श्मशान एव कृष्णरात्रौ श्मशानाचरणयुक्तमित्यर्थात्।

ततः कर्म समारभेत्
विज्ञाप्य भैरवं देवं शत्रुं मे विनिपातय।

अथ-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

(अनुज्ञातस्तु देवेन गृहीत्वा तच्छिरोद्वयम्
तत्र गत्वा महादेवि कपालासनसंस्थितः
तत्रस्थो रोषसम्पूर्णो दक्षिणाभिमुखः स्थितः
आत्मानो भैरवं रूपं ज्ञात्वा घोरं सुभीषणम्
क्रुद्धः समुच्चरेन्मन्त्री द्वात्रिंशाक्षरसम्मितम्
विलोमेन महाभागे शत्रुनाम ततोऽन्तकम्
हूं फट्द्वयं समुच्चार्य काष्ठे चास्फालयेद्भृशम्
खड्गघूर्णिते यावत्तावच्छत्रुर्विनश्यति
सप्तरात्रेण देवेशि प्रयोगस्त्वनिवर्तकः)

अनुज्ञाता इति भावनया शिरोद्वयं कपालयुग्मं कपालासनं मुण्डासनं रोषस्तीव्रापकारस्मरणात् तत इति विलोममन्त्रोच्चारानन्तरमनिवर्तकः न निवर्तते नान्यथा भवतीत्यर्थः।

उपसंहरति-

एवं शतसहस्राणि अन्यकल्पोत्थितानि च
प्रयोगानि करोत्येष मन्त्रराजे स्थिरेश्वरः (?)

एवं करोत्यविसंवादीनि सम्पादयति। एवमीदृक्प्रयोगक्रममुद्रितस्य यद्यप्यनुकंपया स एवान्योऽपि वान्यस्य वा शान्ति मिच्छेत्तदा-

(अनुलोमगतं देवं वौषडन्तसंस्थितम्)

अमुकस्येति ऊहयुक्तमुच्चार्य।

(होमं तु होमयेद्देवि शान्त्यर्थे हितकारकम्)

अथोक्तानुक्तमंसूचितजाति प्रयोगानाह-

(वषडाप्यायने शस्तं स्वाहान्तं वश्यकर्मणि
मन्त्राणां तर्पणार्थे च)

अत्र इत्युभयत्र सम्बध्यते।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

किंच मात्रं स्वरूपं-

८ तत्यन्तं चार्चने स्मृतम्॥

नातिर्मेघः प्राप्तः चकाराज्जपेऽपि।

एतदुपसंहरन्नावि पटलस्य सङ्गतिं करोति-

९ एतद्धि कथितं देवि साधकस्य सुमेधसः

क्रियाकालांशयुक्तस्य उपक्रेप्तान्तु सुखावहम्॥

सुमेधसो यमनियमादिवशीकृतधिषणस्यात एव यथाकथञ्चित्तद्दकर्मोत्थनारम्भमाणस्यापि तु सुखसिद्ध्यङ्गतया स्वीकारयोग्यस्य वशीकरणादि सिद्धिसाधन परिपन्थिनश्चोच्चाटनाद्यवसरे कुर्वतः क्रियया स्नानार्चनसमय पालनात्मतया भाविपटलनिर्दिष्टमाणकालेनांशकेन चाष्टमपटलनिर्दिष्टमानेन युक्तस्य तज्ज्ञात्वा प्रयोगमनुतन्थानस्यात्क्षेपुग आदित्याराधितैः तत्सदाभिमन्त्रणपूर्वकमनुष्ठेयमानं सुखावहमिति उपभीष्टफलदं भवत्येवेति शिवम्॥

स्मारं स्मारं गुरुवरपद द्वन्द्वविस्फूर्जितानां
भाव्रं वीर्यं किमपि परमं दर्शितं यन्मयात्र।
तस्मिन्नन्तर्नमत गुरवो मन्त्रचक्रैकसारे
संसाराब्धिं तरत तरसा भैरवी भावमेतत्॥ तत

इति श्रीस्वच्छन्दोद्योते प्रणवाधिकारः षष्ठः पटलः॥॥

२१॥ ६॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सद्गुश्चिन्मयस्त्वात्मप्राणानन्दघेन भाष्यते।
कालाख्या विश्वमूर्त्तिश्च सर्वार्थं स जयत्यजः॥ ६३॥

क्रियाकालात्मकमुक्त्वेति यदुपसंहृतं ततो विदितं
क्रियास्वरूपमनूद्य कालात्मकं ज्ञातुं श्रीदेव्युवाच।

क्रिया ज्ञाता मया देव त्वत्प्रसादान्महेश्वर।
कालात्मकं च देवेश कथयस्व प्रसादतः॥

क्रिया पूजनादिसाधनात्मा काले च तत्तत्सिद्धि-
साधनोचितसमयसंज्ञकांशं च ब्रह्मांशकं विष्ण्वंश-
कादिरूपं प्रसादेन इति स बाह्याभ्यन्तरव्याख्याभिद-
धत्त श्रुतमेव पूर्वं कालं चैव समासत इत्युक्तोऽह-
मपि कालस्वरूपं तत्त्वतो ज्ञात्वा पुनः प्रष्टुमनु

श्रीभैरव उवाच

कालो द्विधा तु विज्ञेयः सोऽस्त्याध्यात्मिकः प्रिये।

कलयति जन्मस्थित्यादिविकारषट्केन परिच्छिनत्ति
जगद्यः पारमेश क्रियाशक्तिस्वरूपात्मा कालो द्विधा ह-
त्यकरूपोऽपि बाह्याभ्यन्तरतया संस्थितः स्वेति नि-
त्यनैमित्तिककाम्येषु सर्वेषु कर्मसु अङ्गतया साधकैर्ज्ञात-
व्यः सर्वे भवः सोऽरः स्थूलोऽहोरात्राद्यात्मा स एव त्वा-
त्मनीति तदधिष्ठिते प्राणे अध्यात्मे भव आध्यात्मिकः
सूक्ष्मरूपः तत्र श्रमं कर्म सञ्चारहरिनादौ कर्तव्यं।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तत्र ऐहिकामुष्मिकफलसिद्ध्यर्थं दक्षिणायनोत्तरायणादिरूपसमयरूपं ज्ञातव्यम्।

तदेतत्सर्वं बाह्यकालत एव ज्ञायते इत्याह।

सुवारकरणे लग्ने सुयोगे सुदिने प्रिये ।
तेजोपचयराशौ तु ॥

शोभनो वारश्चन्द्रतिथ्यादिग्रहनक्षत्रयोगः करणं च बवबालवकौलवतैतिलादिकं विष्टिवर्जितं यत्र सुदिने अरिक्तातिथौ सुयोग इत्यानन्दादियोगवति वा लग्नः सर्वादेरनुकूलः सूर्यसञ्चारापेक्षः प्रतिदिनं मकरसङ्क्रान्तौ तदुपलक्षिते च तदुपचयराशौ घटिकानियमेन मीनादिराश्युदयस्तत्र तेजसोऽपचयराशौ कर्कटे आमुष्मिकैहिककर्मारम्भविषयेऽवश्यज्ञातव्यो यः कालः स एव सौरः इति सूत्रेण संबन्धः सुवारकरणमित्यादिप्रथमपाठस्तु स्पष्टः।

किं च

दक्षिणायनमुत्तरम्
ग्रहणं चन्द्रसूर्याभ्यां कालस्य ऋतवस्तथा।
पक्षौ मासस्य वेला विषुवद्व्यत्ययान्तरं तथा॥
पुण्यः पुण्योदयो देवि ।

चन्द्रसूर्याभ्यामुपलक्षितं ग्रहणं दक्षिणोत्तरायणे ऐहिकपारलौकिककर्मफलविषयं कालस्यानुमीयमानः ऋतवो वसन्ताद्याः पक्षः शुक्लः कृष्णश्च मासस्यैवादिः वेला तत्तद्ग्रहादिसञ्चारास्पदः प्रविभक्तोऽहोरात्रविभागः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

विषुवद्दिनमहर्निशयोः साम्यात्मा मेषतुलयोः सूर्यसङ्क्रान्तिकालः अयनान्तरमितरः सङ्क्रान्तयः पुण्यकालो वैशाखशुक्लतृतीयादिः अपुण्यकालो मलमासादिः तदेवमादिकं सर्वं तत्तत्कर्मोत्तयोपभुज्यमानं यत्र कालः।

घोर एव प्रकीर्तितः

बाह्य इति शेषः

आध्यात्मिकं पुनर्देवि कथयामि निबोध मे।

पुनरिति विशेषेण निबोध मे इत्युक्त्या परमोपादेयत्वं ध्वनति। तत्र

षाट्कौशिकस्तु यो देहो भूततन्मात्रसंयुतः।
समानो बुद्ध्यहङ्कारबुद्धिकर्मेन्द्रियैर्गुणैः॥
सर्वतत्त्वैस्तथा देवैः समधिष्ठितविग्रहः।
तत्रात्मा प्रभुशक्तिश्च वायवो नाडिभिश्चरन्॥

स्थित इति शेषः षट्कोशानि त्वङ्मांसरक्तमज्जास्थिशुक्राणि यो देहः स कार्यकारणत्रयोविंशत्याः तन्मात्रादिभिर्गुणैः सर्वतत्त्वैश्च तदुपरि स्थितैर्नियत्यादिभिः शिवतत्त्वान्तैः तथा देवैर्ब्रह्मादिभिः कारणैः सम्यग्व्याप्यव्यापकभावेनाधिष्ठितः सतावस्थितविग्रहः स्वरूपमस्य आत्मा सङ्कुचितसंविद्रूपः तत्तत्कर्मानुष्ठाता तत्तत्फलभोक्ता च प्रभोः स्वच्छन्दभैरवस्य शक्तिः स्वातन्त्र्यात्मनः प्रसादाद्यवस्थितेषु भान्ती वायवश्च नासिकापथवाही प्राणः नाडिभिर्वक्ष्यमाणाभिश्चरन् स्थितः अयमत्राशयः इह विश्वोत्तीर्णविश्वमयचिदानन्दसुन्दरः स्वतन्त्रभट्टारकः स्वस्वातन्त्र्यशक्त्या (स्थूलसूक्ष्मस्वरूपेण स एकः संव्यवस्थितः) इत्युक्त्यायेन सदाशिवादिक्षित्यन्तं विश्वमुन्मीलयन्प्रथमं

पं० १२ पं० ५० बुद्धिवान् मे द्विषैर्गुणैरिति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तदुल्लासनभित्तिं शून्यातिशून्यभूमिं स्वात्मदर्पणे तत्र च चित्प्रकाशस्य प्राधान्येन शून्यस्य गुणभावं शून्यातिशून्यभूः सदाशिवादिमन्त्रान्तप्रमातृसङ्कोचप्रपञ्चोत्थापिका महामायाख्याऽवाच्योच्यते यदा तु चित्प्रकाशगुणीभावाच्छून्यमेव प्राधान्येन दर्शयति तदेषा मायाशक्तिरप्रबुद्धविज्ञानाकलप्रलयाकलसकलतत्प्रमेयसङ्कोचप्रपञ्चप्रदर्शिकाभिधीयते। यस्य सङ्कोचकलया प्रदर्श्यते त एव शून्यप्रमातारो निमग्नविमर्शशक्तिः यदा चासौ अतिरिक्तमेयग्रहणोन्मुखीभवति तदा प्राणरूपतया स्फुरति कस्तूरिकाकणवत्तत्रापि तावत्तन्त्रो सङ्कुचिताकूपविश्वात्मतया भाति तदभिप्रायेणैव च विततमूर्तिवैचित्र्यात्मा पूर्वं षड्विधाध्वविभागः प्राणस्थित इत्युक्तं। इह चैकत्रैव प्राणसञ्चारे नाडिकातः प्रभृति अब्दादिवर्षान्तं। एकादशपटले च मासषट्कालात्मभूतत्त्वाश्रितात्मनो विश्वस्य चाध्वप्रमाणमतिविततविततक्रियाशक्तिवैचित्र्यात्मकमस्तीति प्रतिपादयिष्यते यद्यपि च प्राणभूमिकायामिवात्यन्तसङ्कुचितशरीराद्यात्मतायामपि परमेश्वरः पूर्णषड्विधशक्तिस्फाररूप एव यथा प्रतिपादितं तथापि प्राक्संवित्प्राणे परिणमतीति नीत्या प्राणरूपः परस्याः शक्तेरन्तरङ्गमधिष्ठानं तदवरोहक्रमेण भूतभावशरीरवदवरणमिति समग्रप्राणप्रसरभित्तिभूतमध्यमप्राणभूमिकाधिरोहक्रमेणैव परशक्तिपरानुवेशावेशमयमेव स्वच्छन्दभैरवतामाप्यते महायोगिभिः मितयोगिभिश्च तत्तदन्तरकालोपायविश्रान्तिपूर्वं विधिमतिपत्तिः सा सिद्धिरविघ्नेनासाद्यते अत एव प्रतिपादित-

पं ०२३ पं ५ [illegible] इति पाठः

पं २४ पं ५ [illegible] इति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

प्रतिपादयिष्यमाणे तत्त्वाख्यानिर्देशः संहितान्तरनिर्दिष्टोऽपि वा सर्वं एवोपासनादिक्रमो मध्यप्राणपथोच्चारमन्त्रप्रमुखमेव फलदो भवतीत्याशयेनात्र पटले परमेश्वरस्याध्यात्मिककालस्वरूपप्रतिपादने महानारम्भ इत्यलं नातिदीर्घेणाधिकेन। यद्यप्यस्मत्प्रभृतिनाडयः सर्वत्र देहस्थिता तथापि प्राधान्याभिप्रायेण यथाक्रमम्।

नाभ्यधो मेढ्रकन्दे च स्थिता वै।

नाभ्यन्तं प्रकृतितत्त्वस्य व्याप्तिरिति नाभावधूपनाडीचक्रभूतानां प्राधान्येनात्मा स्थितः अधोमेढ्रे तु मध्यशक्तिः एषां चात्र स्वरूपमवधानधनैरेव सम्यगुपलभ्यते न तु पशुभिः

एवं स्थिते सत्यात्मविश्रान्तिपदात्।

नाभिमध्यतः।

तस्माद्विनिर्गता नाड्यस्तिर्यगूर्ध्वमधः प्रिये॥

अत एवोक्तमन्यत्र

'नाभिचक्रे कायव्यूहज्ञानम्'

इति केचित्तु नाभिचक्रत इति पाठः पूर्ववत्रैव योजयित्वा तस्मादित्यनेन कन्दपदं [illegible] तासां मध्यात्।

चक्रवत्संस्थितास्तत्र प्रधाना दश नाडयः।

तत्रेति नाभौ पद्मे दश नाडीः नामतो वक्ष्यति दशभ्यस्तु [illegible]प्रतिसहस्राणि नाड्यस्ताभ्यो विनिर्गताः।

पुनर्विनिर्गतास्त्वन्या आभ्यो ह्यन्याः पुनः पुनः॥

विनिर्गता इत्यूर्ध्वमधस्तिर्यक्प्रसृताः

किमवधि निर्गता इत्याह

यावन्त्यो रोमकूपास्तु तावन्त्यो नाडयः स्मृताः।

अर्धचतस्रः कोटयः। अतश्च

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

यथा पर्णं पलाशस्य व्याप्तं सर्वत्र तन्तुभिः।
शरीरं सर्वजन्तूनां तद्वद्व्याप्तं तु नाडिभिः॥

इह प्राक्संवित्प्राणे परिणता इति स्थित्या निर्णीतनीत्या संवित्तिः शून्यभूमिकामासाद्य प्राणभूमिमाश्रितवती तत्रापि पलाशपत्रमध्यशाखान्यायेन मध्यनाड्यास्त्रयमध्यमप्राणरूपतां श्रित्वादिक्रमावस्थिते तत्रापि प्रधाननाडीरूपकास्त्रयः प्राणादिप्रधानवायुरूपतामासाद्य पुरुषायुषमध्यसंभाव्यहःसङ्ख्याकानि षट्त्रिंशत्सहस्राणि बहिर्वाहाणां प्राणनाडीनां तावन्त्येव चान्तर्वाहानामपाननाडीनां इत्युभयं द्वासप्ततिसहस्राणि प्रधानभूतानि भासितवती तथा हि सति यावज्जीवं कर्तव्यत्वेन दीक्षितानां वह्नित्यः कर्म भगवत्स्वरूपानुसन्धानाम्नातं तदुक्तव्याप्तितत्त्वविदा एकवारमनुष्ठीयमानमपि सर्वमेवानुष्ठितं भवति।

यदुक्तं कत्यालोके

या अग्निहोत्राहुतयः सहस्रसप्ततिः स्युः पुरुषायुषेण नाड्यां पृथक्तया सकृदेव जुहन्त्युपाद्येत्ता एव मार्गवित्सः॥ किंच।

मध्यप्राणनिविष्टहंसपरमा ये रोमकूपास्रयाः
प्राणाः सप्तविमर्शपालिवपुषः सार्धत्रिकोट्यात्मकाः।
तान्सर्वात्मतया विलोमयति यो निःशेषतत्त्वाश्रये
देहेऽसाविह नादभैरवतनुः स्वच्छन्दनाथः परः॥ नैजं कृपति

विरताः

एता नाड्यः।

पं २४ स्व.प. नाडीन मार्गविद्या इतिपाठ

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

साहंतापूरिताः सर्वा आत्मशक्तिचराः सदा।

आत्मा तद्‌ङ्‌चित्संविद्रूपो ग्राहकः शक्तिश्चामवी विश्वा-ऽऽभवपरस्फुरत्तात्मा ताभ्यां हेतुभ्यां चरन्ति वैचित्र्येण प्रसरन्ति। तासु।

पृथग्वृत्तिप्रभेदे च भिन्नास्ताः प्रभेदतः।

वृत्तयो व्यापाराः सूक्ष्मप्राणवाहात्मकचारप्रभेदहेतुकाः अत एव चारवृत्तिप्रभेदेन संज्ञाभेदो वर्ण्यते। भवति। अतस्तु संज्ञाभेदात्।

नाडीनां चैव वायूनां भेदो ज्ञेयः सहस्रशः।

सार्धत्रिकोटिपर्यन्तः इत्यर्थः। तत्र

प्रधाना दश याः प्रोक्ता नाड्यस्तु वर्ण्यन्ते।

तासां मध्ये तु दशैव वायवो ये व्यवस्थिताः॥

मध्य इत्यन्तः। तेषां।

नाडीनां चैव वायूनां संज्ञा वृत्तीर्निबोध मे।

वृत्तीर्व्यापारान्। तत्र तावत्संज्ञा आह।

इडा च पिङ्गला चैव सुषुम्णा च तृतीयका।

गान्धारी हस्तिजिह्वा च पूषा चैव यशस्विनी॥

अलम्बुसा कुहूश्चैव शङ्खिनी दशमी तथा।

आसां व्यापारमाह।

एताः प्राणवहाः प्रोक्ताः प्रधानाः दश नाडयः।

प्राणं प्राणनारूपं सामान्यं वक्ष्यमाणप्राणापानादि संज्ञाभेदात्पञ्चविधं यथाक्रमं वहन्ति। वायूनां संज्ञाभेदमाह।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्राणोऽपानः समानश्च उदानो व्यान एव च।
नागः कूर्मोऽथ कृकरो देवदत्तो धनञ्जयः॥
एषां वृत्तिभेदम्।

जल्पितं हसितं गीतं नृत्तं सुखगतिः कला।
शिल्पं च सर्वकर्माणि प्राणस्येदं विचेष्टितम्।

इत्यादिना पटलान्ते विस्तरेण वक्ष्यति। एते च।

वायवो नाड्यश्चैव चक्रवत्संस्थिताः शिवे।

नाभिमध्ये परिवृत्येत्यर्थः।

तासु सञ्चरतः सिद्धिं योगं चैव वरानने।

सञ्चरतीति सञ्चरन्तं वायुमधिष्ठाय तत्तदुचितां सिद्धिं चित्तैकाग्र्येण योगं च प्राप्नुयात्।

जपतश्च वरारोहे जपसिद्धिमवाप्नुयात्।

तासु सञ्चरत इत्यनुवर्तते जपान्तमतः। आसामपि

पञ्चानां तु परं देवि नाडीत्रयमुदाहृतम्।
बिन्दुनादात्मके द्वे वै मध्ये शक्त्यात्मिका स्मृता॥

बिन्दुर्ज्ञानशक्तिप्रधानः प्राणरूपात्मिका पिङ्गला दक्षनाडी, नादः क्रियाशक्तिप्रधानोऽपानरूपात्मिका इडा वामनाडी। तयोर्मध्ये सुषुम्नाख्या परेच्छाशक्तिरुक्तोभयात्मिका स्मृता।

हृच्चक्रे तु समाख्याताः साधकानां हितावहाः।

हृत्पद्ममध्यकर्णिकायां सम्यगनुप्रवेशेन आ समन्तात् ख्याताः सत्यः साधकानां त्रिविधसिद्धिप्रदाः। एवं स्थिते

प्राणे वै चरते तासु अहोरात्रविभागतः।
यथा तथा ते कथयिष्यामि प्रविभज्य यथाक्रमम्।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्राणः प्राणनाम्ना सामान्यरूपः अहोरात्रप्रभुः पवमा-
नादेरुपलक्षकः। अत्र पीठिकाबन्धं तावत्करोति।

प्रभुशक्तिसमारूढा महत्प्राणात्मसंस्थिताः।
त्रय एते विभागेन सञ्चरन्ति समन्ततः॥

महत्प्राणनाम्ना सामान्यः प्राणस्तु दशवाममध्यादिवा-
ही प्राणापानोदानाद्यविशिष्टः आत्मा सङ्कुचितचिदात्मा
तद्रूपतया संस्थिताः एते पदार्थाः प्रभोः शिवस्य शक्त्या
समारूढा इति मूलपदानुभासपुरःसरं प्राणनाभूमिमुल्लास्य
प्राणापानादिविशिष्टपदवीमुद्धृत्य भोगसौमुख्येन प्रवर्तिता
अविभागेन सञ्चरन्ति नानादेहभूमीः श्रयन्ति।

त्रिषु मध्ये यो महदुक्तः सः।
अथ ऊर्ध्वं देहस्थानात्सर्वनाडीः प्रवाहयन्।
मनोऽस्य.
वृत्तिसंज्ञाप्रभेदेन वर्णरूपाण्यनेकधा।

वृत्तिर्बहिर्वहनान्तर्वहनादिव्यापारस्ततो यः प्राणापा-
नसमानादिसंज्ञाभेदस्तेन द्वादशषोडशादिसंख्यभेदेन भिन्ना-
स्तद्गर्भितव्यञ्जनात्मानश्च वर्णास्तत्तदनुभवात्मकानि
रूपाणि अनेकधा भवन्ति अत्र च आगमान्तरोक्त्या
गर्भीकृतपञ्चनः सविशेषरूपः पञ्चाशद्वर्णवपुरात्मा
अष्टवर्गादयस्तस्ते वा वर्णादयोऽपि स तैरिह नोक्तः के-
वलं वर्णरूपेण सूचितः। तदत्र

द्वासप्ततिसहस्रेभ्यो जायन्ते दश वै प्रिये।

ये दश प्राणाद्यास्ते द्वासप्ततिसहस्रेभ्यो द्वासप्ततिसह-
स्रं निमित्तं जायन्ते तत्प्रपञ्चव्याप्तिं श्रयन्तीत्यर्थः

ततोऽपि प्रागुक्तात्मकोऽन्यात्मतां प्राणः श्रयतीत्याह।

कोटिधाऽतो वर्णदेहे स एकः संव्यवस्थितः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स च

प्राणापानमयः प्राणो विसर्गापूरणं प्रति।
हकारस्तु स्मृतः प्राणो,

इति यः पूर्वमेवोक्तिवाच्यवाचकाविभागाविमर्शमयो हलाकृतिः प्राण उक्तः स एव व्यानरूपावभासितसङ्कोचावभासपुरःसरं निर्गतावरोहक्रमेण प्रकृतं रूपं यस्य प्राणनरूपस्य सामान्यप्राणस्य स विसर्गापूरणं प्रतीति सर्वदैव शक्तिमार्गाद्बहिःस्वरूपावभासहृदिरूपविसर्गार्थं तदवभासपुरःसरं भावा
प्रविष्टरूपतया तदाहरणेनान्तरापूरणार्थं प्रकर्षेणाननानादनार्थं जिघ्रत्याग्रहणविश्रान्तिदशोचिताद्विमर्शात्प्राण इत्यर्थः। एतदेव स्फुटयति। इत्यर्थः

नित्यमापूरयन्नेष प्राणिनामुरसि स्थितः।
प्राणनं कुरुते यस्मात्तस्मात्प्राणः प्रकीर्तितः॥

सर्वदेहगतोऽप्ययं प्राणिनामुरसि स्फुटमुपलभ्यमानत्वेनावस्थितो नित्यमापूरयन्नर्थात्प्राणिनोऽर्थांश्च प्रवेशनिर्गमाभ्यां प्राणनं विमर्शमयं जीवनं कुरुते तस्मादयं प्राण उक्तः।

यदर्थं दृयान्वीक्षिकाबन्धः कृतस्तदेवानुबध्नन्नाह,

अहोरात्रगतिं प्राणोऽधुना कथयामि ते।
गतिं वृद्धिं प्रहरणं च।

तत्र

तुट्यः षोडश प्राणे पूर्वं हि कथिता मया।
बाह्येनैव तु कालेन ते लवाः परिकीर्तिताः॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

याः पूर्वं चतुर्थपटले सपादद्व्यङ्गुलोदयपरिमाणाः षोडशत्रुटयः उक्ताः ।

मानुषाक्षिनिमेषस्य अष्टमांशः क्षणः स्मृतः ।
क्षणद्वयं त्रुटिर्ज्ञेया तद्द्वयात्तु लवः स्मृतः ॥

इत्येकादशपटलवक्ष्यमाणेन बाह्येन कालेन ते लवा लवसञ्ज्ञकाः कालावयवाः एवं च प्राणीया त्रुटिर्बाह्यत्रुटिस्थानीयैव न तु सादृश्यादत्र भ्रमितव्यं प्राणीया त्रुटिर्बाह्यो लवः बाह्या त्रुटिः प्राणीयं त्रुट्यर्धं पर्यवस्यति इत्थं च बाह्यः क्षणः प्राणीयत्रुटेश्चतुर्थांशः इति मन्तव्यं, अनेनैव क्रमेणान्तःप्राणपाठोदयात्मके यः सन्ध्याकालं विना त्रिंशत्त्रुटिकोऽहोरात्रः स एव।

लवद्वयं निमेषस्तु ज्ञातव्यो गतितत्क्रमात् ।
दश पञ्च निमेषास्तु काष्ठा चैव प्रकीर्तिता ॥

इत्येकादशपटलव्यवस्थयैव काष्ठाभिधानः कालावयवः, यदिहैवाग्रे वक्ष्यति।

आध्यात्मिकाहोरात्रेण बाह्ये काष्ठा विधीयते।

इत्येव तु

ताभिस्त्रिंशद्भिर्देवि प्राणे यामो विधीयते।

ताभिरिति त्रुटिभिर्बहिर्वदन्तरपि दिनचतुर्भागो यामः प्रहरः

तैरेव प्रहरैर्देवि चतुर्भिस्तु दिनं भवेत् ।

एवं निर्गमक्रमवत्प्रवेशक्रमेणापि

तथैव

रात्रिश्चतुर्भिर्विज्ञेया।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तदित्थं सङ्कलय्य।

अहोरात्रत्वयोऽभिः।

पारमेशशक्तिनियमितसूर्योदयादिस्थित्या यथा बहिर्दिननिशाविभागः तथान्तरेऽपि प्राणसूर्योदयादिस्थित्या योगिनः प्रतिदिनादिसाध्यकार्यविवर्तयेत्युक्तप्रायं।

यथास्य प्राणस्य बहिरन्तर्वाहितानेयत्वं तथोपपादयति।

शिवो धर्मेण हंसस्तु सूर्यो हंसः प्रभान्वितः।
आत्मा वै हंस इत्युक्तः प्राणो हंससमन्वितः॥

यः पूर्वं चिदानन्दघनः शिवः उक्तः स्वधर्मेण स्वातन्त्र्यात्मना स्वभावेन हंस इति हानसमादानधर्मा विश्वसर्गसंहारकारी शिवत्वादेव पञ्चविधं कृत्यं हानसमादानसतत्त्वं करोति यथा चास्तो तथातीव्रज्ञानशक्तिमयः सूर्योऽपि प्रभया प्रकाशेनान्वितः सन् स्वविसर्गादानक्रमेण हानसमादानधर्मा हंसः यतस्त्व निर्णीतनीत्या शिव एव स्वातन्त्र्यावभासितसङ्कुचितचिद्रूप आत्मा ततः सोऽपि करणोन्मीलननिमीलनादिक्रमेण हानसमादानधर्मा हंसः इत्युक्त इति अनेनैव तु योगिन हंसः पुरुषः इत्यत्र योजनिकाग्रन्थे इत्थं स एव प्राणः प्राणभूमिकामाश्रितोऽपि बहिरन्तस्त्व हानसमादाने कुर्वन् हंस एव यतः स एवायं पूर्वं आत्मा प्राणस्य हंसेनानाहतात्मक निष्कलभट्टारकेन शिवरूपेण समन्वितः स एव ह्यवरोहक्रमेण प्राणान्तं पदमाश्रित्य बहिरन्तर्गमागमी

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

कुर्वन् सर्गसंहारहेतुः अत एवैतत्स्वरूपपरिशीलनाभ्यासे-
नैव झगिति परमशिवतामाविशन्ति महायोगिनः प्रस-
ङ्गादत्र रहस्यार्थः प्रकाशितः कदाचित्। प्रकृतं तु

तस्योदयात्कलेत्कालः।

तस्य प्राणस्य उदयात्प्रभृति जन्मादिविकारषट्कक्रमेण कालो भूतवर्तमानादिभेदेन वहन् विश्वं जगत् कलयति कलेदित्येषः पाठः। अत्र चैकाहोरात्ररूपे प्राणचारे।

ग्रहाणामुदयो भवेत्।

स चाग्र एव व्यक्तीभविष्यति। किंच

ऋक्षाणि राशयश्चैव ताराश्चग्रहास्तथैव च।
प्राणे वै उदयन्त्येते अहोरात्रेण सुव्रते॥

बाह्यदिनगतनक्षत्रानुसारं प्राथम्यं परिकल्प्य प्राणापानवाहे सप्तविंशतिधा विभक्ते प्रमाणे अश्विन्यादिनक्षत्राणां तदधिष्ठातॄणां मेषादिराशीनामवग्रहलानुकूलजन्मादिताराणां त्रिभागनवभागकलनया च राशिप्रानां बाह्य एव प्राणेऽपि अहोरात्रोदयोऽस्ति। अथ।

अहोरात्रोदयस्यैव विभागं कथयामि ते।
हृदयोर्ध्वे तु कण्ठाधो यावद्वै प्रवहेत्प्रिये॥
अङ्गुलेन विहीने तु प्रथमः प्रहरः स्मृतः।

त्रुटिभिश्चतसृभिर्यामः इति यत्प्रागुक्तं तत्रापि चतुष्प्रवाहिकालापेक्षं तु देशापेक्षमिति न चैनदुक्तं हृदयात्कण्ठान्तं
३३ पूर्वं षडङ्गुलमेकाङ्गुलहान्या नवाङ्गुलं भवति। ततोऽपि

द्वितीयेऽर्धे विज्ञेयो मध्याह्नस्तालुमध्यतः।

अत्रापि नवाङ्गुलेनैव सो द्वितीयः स एव तालुमध्ये मध्याह्नः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अत्र विश्रान्तिस्तोत्रस्थानफलमाह।

अत्र होमो जपो ध्यानं कृतं वै मोक्षदं भवेत् ३३॥

अथ

नाभ्यन्यङ्गुलोर्ध्वे तु यावच्चाष्टकं हृदुते।

प्रहरस्तु तृतीयोऽहो भवेद्वै वरवर्णिनि ३४॥

नाभ्यन्यस्य भ्रूमध्यस्य अङ्गुलमूर्ध्वं ललाटमाकण्ठं चतुरङ्गुलान्तालुनो भ्रूमध्यं घाङ्गुलमिति तदूर्ध्वं अङ्गुलमष्टकम्। तदुपरि।

द्वादशान्ते च चतुर्थस्तु प्रहरः।

द्वादशान्ते द्वादशान्ते। एतावदन्तम्।

अहः प्रकीर्तितम्।

अन्तरम्। तत्र च।

चतुर्थान्ते तु देवेशि प्राणहर्षः सदाहरणः ३५॥

सदेति यदा यदा चतुर्थप्रहरस्यान्तो भवति तदा प्राण एव अहोरात्रविभागहेतुत्वात्सूर्योऽस्तमेति। किंच।

ततोऽस्तमयसन्ध्यात्र तुत्यर्धं तु भवेत्प्रिये।

तत इति चतुर्थान्तमनलम्ब्य प्राणविहत्यापानोल्लिलसिषा सामरस्योल्लतया गुणीभूतवाहतेनोन्मज्जत्क्षितदूक्षकाप्राप्तविश्रान्तिहृष्यार्धत्रुटिकलाऽस्तमयसन्ध्या।

अत्र च सन्ध्यायां प्राणहर्षः।

तत्कालं तु विलम्ब्यैवं पुनस्त्वाधः प्रवर्तते ३६॥

तत्कालं तुत्यर्धं सङ्कटपदे विश्रम्यैवमित्यारोहक्रमेणैवं पुनश्चेति पुनः पुनः अधः प्रवर्तते अपानचन्द्रीभूय हृदन्तमवरोहति। तदाह।

स च चन्द्रोदयो देवि रजनी च विधीयते।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सूर्य एव प्रभासङ्गत्युक्त्या चन्द्र इति कालज्ञाः रात्रा-
वपि प्रहरक्रमः प्रागन्नवाङ्गुलस्थित्याप्राणचन्द्रसञ्चारक्र-
मेणोत्पत्तिरिष्यते ।

पूर्वोक्तक्रमयोगेन यामेष्वेवं वरानने ॥ २७॥

अत्र सन्ध्यातिक्रान्त्यनन्तरं दिनचतुर्थप्रहरोदयस्या-
नन्तमाद्यः प्रहरः । ततः,

नाडिके चार्धरात्रस्तु पुनरेवं विधीयते ।

पुनरेवेत्यवरोहेण नवाङ्गुलस्थित्यैवेत्यर्थः अत्र हो-
रादिसिद्धिरित्यर्थलाभमनन्तु किं च पुनरेवं विधीय-
त इति पुनरपि नवाङ्गुलस्थित्या कण्ठाधोऽङ्गुलेन्त्रे
तृतीयो रात्रियामः इत्यर्थः ।

ततोऽपि सत्यवश्च यदा प्राणप्रभातसमयस्तदा तत्रापि

तुर्यार्धं तु वरारोहे पूर्वसन्ध्या भवेत्ततः ॥ २८॥

एतत्पूर्ववदाख्येयं पूर्वत्वमत्र सन्ध्यायाः तदनन्तरं प्रा-
णसूर्योदयात्मकदिनप्रारम्भात् । यदाह ।

तस्मात्समुदयस्यैव सूर्यस्य स भवेत्प्रिये ।

सूर्यः प्राण उदेति च

पूर्ववत्क्रमयोगेन स चेद्धि सदा शुभे २९॥

शुभ इति आमन्त्रणम् । अत्रैव

वाहेर तु चरेत्सूर्यो धारयां सञ्चरेच्छशी ।

प्राण एव सूर्यः इन्द्रियवर्गो वाहेर प्राणोदये चरति
समुल्लसन् वाह्यं प्रकाशं पूरयति धारणां निशायामपानोदये
शशी मेयग्रासरूपसञ्चरेत्प्रमाणप्रकाशमाविष्य प्रमातृका
त्म्यमेति । तथेत्यहोरात्रमध्ये

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

चन्द्रसूर्यौ ह्येष मया ते परिकीर्तितः ॥ ४०॥

साधकानां सौम्येतरसिद्ध्यर्थमत्रैव मध्ये स्वरोदयोक्तवद्ग्रहपञ्चकोदयक्रमं दर्शयति।

भौमाद्यास्तु ग्रहा ह्येवं चरन्ति प्रविभागशः।

यथा सदा बहिरन्तश्च दिननिशयोः सूर्यसोमौ चरतः तथा सदैव पञ्चधा पञ्चधा विभक्तयोस्तयोः भौमाद्याः सौरान्ताः पञ्च विभागक्रमेण चरन्ति तेन च क्रूरसौम्यसिद्ध्यर्थं भवति।

अथ बाह्यवेलावारानुसारमहनि निशायां चान्तरपि ग्रहस्य प्रकोदयं शास्त्रादिप्रसिद्धन्यायेन दर्शयति

प्राणे चाप्युदयेते प्रहरे प्रहरे प्रिये। ४१

वेला वारो भवेद्यस्य स चेत्प्रहरद्वयम्।

यस्य ग्रहस्य बहिर्वारः स प्रथमे प्रहरे बहिरिवान्तरप्युदेति ततो दिने षट् परिवर्तनक्रमेण अर्धेऽर्धे प्रहरे तदन्ये यावदन्त्ये तद्दिनार्धप्रहरे स एव तदुत्तरेष्वप्रहरेषु क्रमेण परिवर्त्य क्रमेणान्ये यावदन्त्ये तन्निशार्धप्रहरे स एव एवमेकैकस्य ग्रहस्य दिनेऽर्धप्रहरं रात्रावर्धप्रहरं चोदयः वारभागिनस्तु प्रहरं द्विगुणमिति स्थितोऽहोरात्रमेलनया वारभागिनः प्रहरद्वयं तदन्येषां तु प्रहरमुदयं भवति।

तदुक्तं गीतातन्त्रे

प्रहरार्धभुजः सर्वेऽहोरात्रं च चरन्ति ते।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

इति।

संहितासारेऽपि।

शनिमावास्ययुक्तकरेण स्मा भुञ्जन्ति गृह
पञ्चहरणजः सद्दिनं सेकारविलि वक्तारेर
स्वणिव स्वणते कम्पारिवि तुणदिनं रतिं भु-
ञ्जन्ति बालपरिवर्जते [illegible]॥ सो

इति। अत्रैव मध्ये।

राहुश्चरति सोमेन केतुश्चरति भास्वता ॥४२॥

सहेत्यर्थः तेन तच्चार एव तयोश्चारो न तु ग्रहा-
न्तरव्यतिरिक्तः। किं च।

ये ग्रहास्ते च वै नागा लोकपालाष्टकं च ते।
मूर्तयश्चैव ते चाष्टौ अष्टौ ते च गणेश्वराः ॥४३॥
ते च यक्षाष्टका रुद्रास्तथा योगाष्टकाः परे।
अनन्तादिप्रावरण्यन्तास्ते च विघ्नेश्वराष्टकाः ॥४४॥
सकलान्यपि तत्त्वानि स्थितानि परमेश्विह।
पूर्वोक्ता भैरवाश्चाष्टौ सर्वे ते च व्यवस्थिताः ॥४५॥

ग्रहा आदित्यादयः सोमान्ताः यथाक्रममनन्तवा-
सुकितक्षककार्कोटपद्ममहापद्मशङ्खपालनागाः रा-
हुस्तु कुलिकः॥ तदुक्तम्।

इनस्त्वनन्त इत्युक्तः सोमो वासुकिरुच्यते।
तक्षकः कुज इत्युक्तः कार्कोटः सोमजो भवेत्॥
सरोजो गुरुराख्यातो महाब्जः शुक्र उच्यते।
शङ्खेन मन्दगतिर्ज्ञेयः सप्त नागा ग्रहाः क्रमात्॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

मध्यमः कुलिको नाम राहुः क्रूरग्रहो भवेत्।
इति। यच्च श्रीतोडले।
रवेः षोडश मध्यात्तु चतुरोऽन्त्यांश्च भागिनात्।
चषकौ द्वौ बुधस्यादौ सोमस्याष्टौ तु मध्यतः॥
सौरस्यान्त्यांश्चतुष्षष्टिर्मध्यतस्चषकं गुरोः।
द्वाविंशत्तु कुजस्यान्त्याद्‌द्वे शुक्रे षट् परिवर्तितः॥

इति चषकसङ्ख्यया कुलिककाल उक्तः। सोऽन्त्यान्त्य-सहस्रे प्राणचारे इत्यलं एवेत्यविचार्य एक एवं प्रभोगाय दिनार्धप्रहरानधितिष्ठतां ग्रहाणां नागैर-धिष्ठितत्वं नागानां तूक्तक्रमस्थितिभिर्लोकपालैरि-न्द्राद्यैरिन्द्राद्या मूर्तिभिरिति क्षित्यादिमूर्त्यधिष्ठातृ पूर्वोक्तभवादिभिर्मूर्तीशैरुक्ते च चण्डनन्द्यादिभिः प्रागुक्तैर्गणेशैः तेऽपि गुह्यातिगुह्यपवित्रस्था द्याद्यैः पञ्चभिरष्टकैः क्रमात्क्रममधिष्ठिताः तेऽपि हृतादि-ना योगाष्टकेन व्याप्ताः योगाष्टकादपि परे ये प्रकृति-स्थाः क्रोधाद्याः मायास्था मण्डलिप्रभृतयस्तैर्व्याप्ता-स्तेऽपि विद्यातत्त्वगतैरनन्तादिभिर्विद्येश्वरा अपि सक-लाद्यैरिति सदाशिवपरिवारभूतैः सकलो निष्कलः शून्यकालाख्य इति वक्ष्यमाणै रुद्रैः यद्वा सकलः सदाशिव आदिर्येषां ऊर्ध्ववर्ति बिन्दुरिन्दुब्रह्मव्यापिव्यो-मानन्तानाथानाश्रितान्तैस्तत्त्वैरिति अभवभूमिस्थपुरी-त्यागमार्थिकैर्देवैस्तैर्व्योमानन्तपदव्याप्त्यवस्थितैः श्रीकण्ठ-नाथपरिवारत्वात्तदधिष्ठितैः कपालीशादिभिर्भैरवै-रधिष्ठिताः। अत्र चार्धार्धप्रहरक्रमेणेन्द्रादीनां दिने रात्रौ च त्रिकुटिक उदयः। ननु षट्परिवृत्त्याऽवस्थित

तस्मात् सर्वे एवं ते तेषु प्रागीशाद्येशान्तार्धप्रहरेषु अवस्थिताः॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ग्रहस्थित्या ग्रहाणामष्टानामंशकैः सह तत्तद्योगात्
व्यवस्थितिस्तेषामभेदव्याप्तिः अत एवात्र सामानाधि-
करण्येनोक्तिः सता एवं च परमेश्वरस्याप्रमेयत्वमेव
प्राणे पर्यवसितमतो यदस्माभिः प्राणभूमिकायाम-
होरात्रक्रमेण व्याप्तिप्रदर्शनं पूर्वं कृतं तद्वास्तवं
न मन्तव्यं, इत्थं च सर्वमिदं परमेश्वराद्वयमेवेत्यत्र
ज्ञानादेव ज्ञानिनां जीवन्मुक्तिः करतलगतेव सा-
धकानां तु तत्तद्भुवनेश्वरादिव्याप्तितत्पदानुसारेण-
पि महाव्याप्त्यनुसन्धानादविघ्नेनैव तत्सिद्ध्युद-
यो भवतीति प्रतिपादितं भवति ॥

तदुक्तमेवार्थमनुबध्नाति।

ग्रहादीन्समधिष्ठाय सर्वेषूदयकारकाः।

सर्व एवैते लोकपालाद्याः भैरवान्ताः सर्वेषु
दिनरात्रिप्रहरेषूदयं कुर्वन्ति कथं ग्रहादीनिति तत्त-
दर्धप्रहरेषु पर्यायेण प्राप्तवाराः सूर्यादिग्रहान्नादि-
पूर्वादन्तादिनांशांश्च सम्यगभेदेनाधिष्ठाय।

किंच।

राशिभिः सह नक्षत्रैस्त उद्यन्ति अहर्निशम् ५६॥

उदयात्प्रभृति द्वादशान्तं यावत्प्रत्यङ्गुलमष्टौ राशि-
भिरिति स्थित्या मकरादयो मिथुनान्ताः षड्राशयस्त-
दधिष्ठितानि च नक्षत्राणि तदनुसारेणैव प्रत्यंशा-
मपि तत्रोद्यन्ति तथैव द्वादशान्तादुदयं यावत्क-
र्कटाद्याः धनुरन्ताः। अत्रैवाभिजिदुदयमाह।

मध्याह्ने चार्धरात्रे च उदयोऽभिजितो भवेत्।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तान्तुनीत्यर्थः अभिजयति सर्वानिष्टानित्यभिजि-
न्नक्षत्रविशेषः। अतश्च।

अभीप्सितं फलं तत्र साधकानां भवेदिह ४७॥

इहेति पारमेश्वरेषु पारिभाषिकं यद्योगमोक्षाख्यं फ-
लं साधकानामिष्टं तत्तन्मध्याह्नार्धरात्रिकेऽभिजिन्नक्ष-
त्रे भवत्येव। तदुपसंहरन्नन्यदवतारयति।

अहोरात्रविभागोऽयमेवं ते कथितं मया।
अधुना पक्षमासांश्च वर्षाणि कथयामि ते ४८॥

तत्र निर्णीताभ्यन्तराहोरात्रं बाह्ये काले नियोजयति

आध्यात्मिकाहोरात्रेण बाह्यकाष्ठा विधीयते।

अत्र काष्ठा न घटिका अपि तु दश पञ्चदश निमे-
षात्मा कालावयवविशेषः इति दर्शितमेव। किंच।

मासेनाध्यात्मिकेनैव बाह्ये चैव कला भवेत् ४९॥
तत्र त्रिंशदहोरात्रा मासस्तु वरवर्णिनि।

आध्यात्मिको मास इति प्राणचारात्मा त्रिंशदहोरात्राः
बाह्यास्त्रिंशत्काष्ठाः तेनेदृशेनान्तरेण मासेन बाह्य-
कलाख्य एव कालो भवति। वक्ष्यति चैकादशे।

त्रिंशत्काष्ठाः कला ज्ञेयाः।

इति एवमुक्तः कलाशब्दानन्तरं योज्यः वरं वर्णय-
ति सर्वोत्कृष्टं परं तत्त्वं प्रत्याययति वरवर्णिनि।

किं चाध्यात्मिकैः।

मासैर्द्वादशभिश्चैव बाह्येऽथ घटिका भवेत् ५०॥

तदेव स्फुटयति।

शतानि त्रीण्यहोरात्राः षष्टिरेव तथाधिकाः।
वर्षमेतत्समाख्यातं बाह्येव घटिका च सा ५१॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सषष्टित्रिशतप्राणापानचारा बाह्यघटिका च सा।
यतोऽसौ षष्टिः चषकानि चषकं च षट् प्राणापानचाराः।
एवमुक्तरूपाध्यात्मिकवर्षकलिताः।

घटिका षष्टिस्त्वहोरात्रे बाह्ये तु प्रवहन्ति वै।
त एवान्तश्चारेण षष्टिः संवत्सराः स्मृताः ॥५२॥

बाह्यघटिका आन्तरं वर्षमिति विभक्तमेवातस्ताः षष्टिसंवत्सरावान्तराणि वर्षाणि सूक्ष्मकालगत्या अत एवैकत्र प्राणचारे बहून्युदय इति यदा कालस्थितिरपि स्फुटीभविष्यति। अथ षष्टिघटिकात्मक वर्षेषु।

प्राणसङ्ख्या पुनरेषु कथयाम्यधुना तव।
षट्-शतानि वरारोहे सहस्राण्येकविंशतिः ॥५३॥
अहोरात्रेण बाह्येन अध्यात्मं तु सुराधिपे।

घटिकायां सषष्टिः त्रिशती प्राणचाराणामिति गणनया षष्टिघटिकासङ्ख्ये बाह्येऽहोरात्रेऽध्यात्मे आत्मनि तदाश्रयेण प्राणचाराणामियमेव सङ्ख्या भवति।

एवमीदृशी।

प्राणसङ्ख्या समाख्याता ज्ञातव्या साधकेन तु ॥५४
एवं प्रोक्तवक्ष्यमाणव्याप्तिमतत्त्वेन
प्राणहंसे सदा लीनः साधकः।

लीनो निभालनया विश्रान्तः तदा प्राणभूमिन्यग्भावेन प्रान्तपदसमावेशाद्देवसौ परतत्त्वविद्भवति।

तदा च।

तत्त्वार्थं जप उद्दिष्टः सिद्धिमुक्तिफलप्रदः।

इह प्राणे निर्णीतविश्रमन्त्रवीर्यभूतहंसाभ्यसनात्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हंस इति तत्र यो लीनः स प्राणसङ्घट्टेन सदैव ता-
वज्जपयुक्तो भवति। यथोक्तं श्रीविज्ञानभैरवे,

षट् शतानि दिवारात्रं सहस्राण्येकविंशतिः।
जपो देव्याः समुद्दिष्टः सुलभो दुर्लभो जडैः॥

इति। सिद्धिमुक्तिद इति यदुक्तं तद्विभजति।

अधःप्रवहने सिद्धिर्हीत्यमुं यावदागतः ५५।
मुक्तिश्चैव भवेदूर्ध्वे यत्नेन तु सव्रते।

एतच्च "यदा करोति सृष्टिं चेत्यादौ" वितत्य निर्णीतं तदेवमुक्तव्याप्तिज्ञानपूर्वं प्राणहंसे लीनतया यत्नज्ञ-विदो योगिनः सर्व एव कालस्तत्रोहपकर्षान्नाहग-नुभवमय एव भवतीत्याह,

मनोऽप्यन्यत्र निक्षिप्तं चक्षुरन्यत्र पातितम् ५६।
यथा प्रवर्तते प्राणस्त्वयत्नादेव सर्वदा।

तथापीति मध्येऽध्याहार्यं तेन यद्यप्यन्तःकरणो-बहिष्करणः सुधिया प्रहतास्तथापि यत्नविश्रान्ति-परत्वेन प्राणव्याप्तिज्ञस्य तथा तेनैव यत्नविश्रान्तिप-देन प्रकारेण प्राणो हंसात्मा मध्यमोऽयत्नादेव सततम् एव सर्वदा प्रवर्तते वहति। तदेवोपोद्बलयति।

नास्योच्चारयिता कश्चित्प्रतिहन्ता न विद्यते ५७।
स्वयमुच्चरते हंसः प्राणिनामुरसि स्थितः।

हंसः प्राग्व्यावर्णितसतत्त्वपरनिष्कलभट्टारकस्तदधि-ष्ठितत्वान्मध्यमः प्राणोऽपि निर्णीतव्याप्तिसारः स्वय-मुच्चरते एवं वाच्यवाचकक्रमसङ्घट्टो यस्माभेदसार-महामन्त्रवीर्यात्मना स्फुरति यतोऽस्य न कश्चिदुच्चा-रयिता प्रतिहन्ता वास्ति अस्यैव सर्वकर्तृत्वेन परमा-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्वरूपत्वात् अत एव चानाहत इत्युच्यते इतरवर्णव-
त्स्थानकरणाभिघातानभिव्यक्तत्वादनन्तमितत्वाच्च स चा-
यं प्राणिनामस्मिन् हृदये जीवितस्यापि जीवितभूतः स्थि-
तः केचिदेव तदवधानधनाः एतत्तत्त्वमाविकुर्वन्ति।

तदित्थं परतत्त्वावहितसाधकजपनिष्पत्त्यभिप्रायेण

मानवत्सरसङ्ख्या तु एषा ते कथिता मया ५८॥

आध्यात्मिकेति शेषः त्रिंशत्प्राणचार आध्यात्मिको मासः
षष्ट्यधिका तु त्रिशती वत्सरः इति हि निर्णीतमेव।

इदानीमत्रैव प्राणचारे।

चन्द्रसूर्योपरागं तु कथयामि ततः परम्।

साधकस्य भुक्तिमुक्तिफलप्रदमिति स्थितमेव।

तत्राहो

अहोरात्रस्तु यः प्रोक्तः प्राणेऽस्मिन्सुरसुन्दरि ५९॥
स एव पक्षद्वितयं मासं च कथयामि ते।

प्रविभागेनेति शेषः त्रिंशत्प्राणचारः तत्र कृष्णपक्षे
तावत्पक्षसन्धिप्रदर्शनपूर्वं निरूपयति।

तुलार्धे चाप्यधस्तोर्ध्वे विश्रामः परिकीर्तितः ६०॥
मध्ये पञ्चदशोक्ता यास्तिथयस्ताः प्रकीर्तिताः।

अथ ऊर्ध्वे च यत्तुलार्धं पूर्वमहोरात्रोदये पूर्वापरसन्ध्या-
त्वेनेत्युक्तं स एवेह विश्रामः पक्षसन्धित्वेन कीर्तितः। ता-
स्तु मध्ये पञ्चदश त्रुटयस्ता एव प्रतिपदाद्यास्तिथयः।

अत्र च पक्षसन्धितुलार्धमुल्लङ्घ्य प्रतितुल्यहोरात्रवि-
भागमाह।

प्रथमोदये तु तुलार्धात्तुलार्धं तु दिनं भवेत् ६१॥
द्वितीये चैव तुलार्धे यदा चरति शर्वरी।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

इत्यस्मादित्युपलक्षणं तेनैकैकस्योदये: सार्धपाद-
दण्डपरिमाणमाद्यमर्धं दिनप्रकाशरूपं परं तु विश्रान्त्या-
त्मा रात्रिः यतः इयं भगवती चित्प्रकाशानन्दमयी
तता यत्र यावत्तावदनया वेद्यग्रहवेदकविश्रान्तिरूपौ प्र-
काशानन्दावाभासयेते तत्र तावद्रूप एव दिननिशे तथा
च मशकादौ सदाशिवादौ चात्यल्पातिविततकालत्वं
तता अतएव एवं च प्रतित्रुट्यर्धं वक्ष्यमाणक्रमेण तदंशां-
शेष्वपि वा तावाभासमानौ दिननिशाभेदं समुचितं प्रमा-
तारं प्रतिभासत एव कदाचिच्च प्रकाशस्याधिक्यं कदाचि-
च्च विश्रान्तेः कदाचित्तयोः साम्यमिति कृत्वा दिन-
निशयोर्वैषम्यं च भवत्यन्तर्बहिश्च यदा चरतीति सर्वांशा-
दन्तरं तदेत्यध्याहार्यम्। अत्र च दिनरात्रिभेदे।

तद्वशो ग्रहनक्षत्राण्युदयन्ति यथाक्रमम् ॥६२॥

पारमेश्वरी हि संविदा या यादृशी दिनादिव्यवस्था क्रि-
यते तां सर्वे ग्रहादयोऽनुवर्तन्ते। तदित्थम्।

अस्मिन्नेवमहोरात्रे पूर्ववच्च वातने।
त्रुटिभिः पञ्चदशभिः प्राणः स तु विधीयते ॥६३॥

अस्मिन्निति अन्तरे एवमिति त्रुट्यर्धकलनया पूर्व-
वदिति सहस्रतया दृष्ट्या प्राण इति स्वपन्नः इत्यर्थात्॥
अथात्रैव पदे अमावस्या प्रतिपत्त्योर्या प्रमेलनप्रकटने-
न सूर्यग्रहं निर्णीतपिषिके दर्शनीदर्शयति।

तिथिच्छेदे क्षणं ज्ञेयं वृद्धौ चैव घनं भवेत्।
क्षणं चैव भवेत्कासौ निःश्वासो यत्र उच्यते ॥६४॥

क्षणं प्राणवाहस्य किञ्चिदल्पान्तरात्यकालता का-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सवर्णाद्भवति तथा सति झगिति धावनादमावस्यां-
शुः प्रतिपत्स्थानं प्रसरति एतच्च दर्शपिण्डसाल्लसूर्य-
ग्रहोपयोगि निःश्वासवशात्तु किञ्चिच्चिरकालता-
पानचन्द्रस्य धनं तथा सति पूर्णिमास्वरूपः चन्द्रग्रहो-
पयोगी भवति। प्रकृते तु

कृष्णपक्षोर्ध्वचारेण संहारः सद्गुणो भवेत्।

पक्षेऽरो कृष्णपक्षेणोर्ध्वचारेण प्रकृतस्य प्राणस्य यः संहारः
स एव प्रवेशितपूर्वप्राणावस्थितमेयचन्द्रस्य प्रतिपत्तु-
ल्यैकैककलाक्रमेण अमावस्यान्तपञ्चदशकलानां स-
ङ्क्षय इत्यर्थः। तदुक्तं श्रीकामिकायाम्।

अमृतं चन्द्ररूपेण द्विधा षोडशधा पुनः।
पिबन्ति च सुराः सर्वे दशपञ्चपराः कलाः॥
अमाख्यगुहान्तस्थामावस्या विश्वतर्पिणी।

इति द्विधेति कलाः पञ्चदशभिन्नभूतानि स्वच्छरू-
पतया दृश्यमानसितपक्षपञ्चदशकलात्मना चेत्यर्थः

यत ईदृक् कृष्णपक्षगतः।
क्रूरकर्माणि वै तत्र कुर्वन्सिद्धिमवाप्नुयात्॥ ६५॥
शुभकर्माणि दक्षो च न च सिद्ध्यन्ति सुव्रते।

चकारो तुशब्दपर्यायार्थे इह यदन्तरुहिरिति
स्थित्या पद्धदान्तौ दिनरात्रितत्सन्ध्यापक्षमासादिके प-
पद्धदान्तो लमुक्तं तद्बाह्येऽपि।

तत्र तर्षयति मन्त्रव्यमर्थान्तरममावस्यां दर्शयति।
पूर्णे वै विशति प्राणे सा तुटिस्तु विधीयते॥ ६६॥
अमावस्या तु सा ज्ञेया कृष्णपक्षे वरानने।

शक्तिर्ब्रह्मरन्ध्रस्थानं तुटिरिति प्रक्षीणचन्द्रा पञ्चदशी
अत एवामावस्यायां षोडश्यां तुटौ वसन्तात्तद्विलयवलम्बनाद-
मावस्या ज्ञेया।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अथ पूर्वमासूचितं पर्वसन्धिं स्फुटयति।
पूर्णेन्दोर्मध्योर्ध्वभागे तु तुट्यर्धं यत्प्रकीर्तितम् ६७॥
पर्वसन्धिस्त्वसौ ज्ञेयः ।

ब्रह्मरन्ध्रादुत्थितायाः पूर्णेन्दोर्मध्यं त्वक्स्थानं त्वक्केशान्तकेशस्थानमूर्ध्वमेकमेव तुट्यर्धं यत्पक्षयोः कृष्णशुक्लयोः सन्धिः यदेव हि प्राणस्यान्त्यं तुट्यर्धं तदेवमपानस्याद्यं भवतीत्येतदुभयोस्तुट्यर्धात्मकं देपूत एकमेव तत्तुट्यर्धद्वयवाहकालं सन्धिपदम्।

अथात्र सूर्यग्रहणं दर्शयति अमावस्यार्धे प्रतिपदा-
तिथिच्छेदेन वै तत्र सूर्यस्य ग्रहणं यदि भवेत्।

प्राणस्यामावास्यातिथिच्छेदेन यदा अमावस्येति तस्माद्बहुः पक्षसन्ध्यार्धकालः तस्मिन्सन्ध्यातुटिभागे प्रतिपत्कालेन सह भवति तदा सूर्यग्रहणं भवति। यतः

रविबिम्बान्तरे देवि चन्द्रबिम्बं तदा भवेत् ६८॥
तदन्तरे भवेद्राहुस्तत्तार्थी वरानने ।
अमृतं स्रवते चन्द्रो राहुस्तु ग्रसते तु तत् ६९॥
पीत्वा त्यजति तद्बिम्बं तदा मुक्तः स उच्यते।

तदेति प्रतिपदोऽमावस्योर्भागसन्धौ रविबिम्बान्तरे प्राणमध्ये चन्द्रबिम्बमपानः प्रविशेत् पूर्वोक्तरीत्या च चन्द्रसहचारी राहुः सूर्यसंस्पर्शविलीनं चान्द्रमसं पीत्वा कंचित्कालमास्वाद्य अपानरूपं चन्द्रबिम्बं स्वस्य ... मुञ्चति इदमत्र तत्त्वम्।

प्राणार्कसानकण्ठघट्टितमेघचन्द्र-
बिम्बावितामृतरसोल्लसितः स्वमाला।
स्वर्भानुराहुरत एव रविं स तु
ग्रस्ये ग्रहेऽत्र रसमेत्य मघट्टनेनः॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एवमन्तरिव बहिरप्यनयैव युक्त्या भवेत्।
आदित्यग्रहणं चैव लोके तदुपदिश्यते ७०॥
ततो ज्योतिःशास्त्रोक्तप्रक्रियया।
राहुरादित्यचन्द्रौ च त्रय एते ग्रहा यदा।
स्पर्शेन्न समवायेन तन्महाग्रहणं भवेत् ७१॥
महत्त्वमेव व्यनक्ति।
स कालः सर्वलोकानां महापुण्यतमो भवेत्।
तथा च स्थाने
तत्र स्नानं तथा दानं पूजाहोमजपादिकम् ७२॥
यत्कृतं साधकैर्देवि तदनन्तफलं भवेत्।
अनन्तमपरिच्छिन्नं मोक्षाख्यं मूलं यस्य, यद्दत्यति।
मोक्षश्चैव पुनर्भद्रे,
इत्यादि,
एवं कृष्णपक्षं सूर्यग्रहं च प्रदर्श्य शुक्लपक्षं चन्द्रग्रहं च क्रमाद्दर्शयति देवः।
तांश्चैवार्धतुटिं त्यक्त्वा शुक्लपक्षोदयो भवेत् ७३॥
तामिति चन्द्रग्रहणं दर्शितं शुक्लपक्षः अपानचन्द्रोदयरूपः। तदाह।
प्रान्तिगर्भोदधः सृष्टिकलावृद्धिः प्रजायते।
प्रान्तेर्गर्भः कुण्डलाकारता सा हि शृङ्खिकारूपतया स्थान्तरैकांघ विस्रमाकृत्य अध इति हृदयपर्यन्तं तदेव सृजति अत एव वृद्धिः क्रमात्क्रममपानचन्द्रपरिपुष्टिरूपा तथा वृद्धिः निःश्वासात्मकपवनरूपा जायते पुन
कालक्रमेण तिथिच्छेदस्याभावात्। यत एवमतः।
तदारभ्य च कर्माणि शुभान्यभ्युदयानि च। ७४॥
ध्यानमन्त्रादियुक्तस्य सिद्ध्यन्ते नात्र संशयः।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तदाऽस्येति शक्तिगर्भस्वरूपमवहस्य शुभान्याध्याय-
नादीनि कर्माणि अभ्युदयानि च मत्फलानि च

अत्र शुक्लपक्षे दिननिशाविभागं प्रदर्शयति।

प्राणहंसो यदा प्राप्तस्तदा स्यात्प्रथमां त्रुटिम् ७५॥
पूर्वमर्धं त्वहः प्रोक्तं त्वन्त्यार्धमपरं निशा।

प्राणहंस इति प्राणवत् अर्ध इति सन्धित्वन्त्यार्धात् प्रथमां त्रुटिं शुक्लपक्षप्रतिपद्रूपां यदा प्राप्नुयात्तदा प्रत्यध्याहार्यम् अहर्निशाविभागः प्रागेव एवं द्वितीयादितिथिष्वपि मन्तव्यम्। किं चात्र

समये ग्रहनक्षत्राणि योगाश्च करणानि च ७६॥
पूर्ववत्क्रमयोगेन तान्युपन्ति त्वहर्निशम्।

गतार्थमेतत्। या च इयं प्रथमा त्रुटिः

प्रतिपत्सा तु विज्ञेया।

अत्र चन्द्रस्त्वेककलो भवेत् ७७॥

किंच द्वितीयायां द्वितीया तु वृद्धिमेति क्रमेण तु।

द्वितीयायामिति त्रुटौ द्वितीयेति कला

एता एव त्रुटयः।

तिथयस्त्वेवमारभ्य यावत्पञ्चदशी त्रुटिः ७८॥
भवति सा च पञ्चदशी।
पौर्णमासी तु विज्ञेया तिथिर्वै साधकेन तु।

सम्पूर्णः पूर्णोऽस्यामिति कृत्वा अत एवैहिकसिद्धिं साधयति तेनैषा साधकेन तद्वक्ष्यमाणव्याप्तिसारतया ज्ञातव्या। अतश्च।

तत्र पूजा जपो ध्यानं संपूर्णं सकलं भवेत् ७९॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

ऐहिकफलमित्यर्थोऽग्रतः।

संपूर्णस्तु भवेत्तस्यां चन्द्रो वै वामलोचने।

वो ह्यर्थे चन्द्रोऽपानः। अथ

तस्यास्त्वर्धत्रुटियो तु पलसन्ध्या तु सा स्मृता ८०॥

प्राग्वदेव तस्या इत्यवधौ पञ्चमी कृष्णपक्षस-
न्ध्याख्यत्वाच्चास्य पलसन्धेः पूर्ववदेव

तस्यार्धं पौर्णमासी तु प्रतिपदर्धेन संस्थिता।

प्रतिपदः सम्बन्धिनार्धेनेति तृतीया सहार्थे।

इत्थं च प्रागुक्तव्याप्तिव

हृत्यग्रसन्धिमध्ये तु सोमस्य ग्रहणं भवेत्।

सन्धिमध्यं प्राणापानसन्धिस्थानम्।

इदमत्र तत्त्वम्।

कुण्डलिस्तु तद्धारासक्रमात्

पूर्णबिन्दुमयस्राहवहात्।

क्षादेर्यदिह शुभे महाग्रहे

स्रावितं पिबति तं महामुनिः॥

तदेतदन्तरेव बहिरपि

आदित्येन विना लोके सोमग्रहणमुच्यते ८१॥

प्रतिपत्सङ्गात् दूरस्थार्कस्पर्श इन्दोः सूत्राव-
कोभावात् सूर्यग्रहणे तु पार्वणेन्दुकलयार्कः सं-
स्पृष्ट एव। किं च।

तत्रैव च महत्पुण्यं ध्यानहोमजपादिभिः।

पञ्चोर्ध्वपद आदित्यग्रहणं सोमग्रहतया म-
हापुण्यं तथा तत्रैवेति मध्यमधामप्रवेशक्रम-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

लक्ष्ये हृदये चन्द्रग्रहणमैहिकान्तमसिद्धिप्रदतया म-
हाप्रत्ययम्। न च केवलमध्यधामनि चन्द्रसूर्ययोर्ग्रहणं यावत्।

पत्रद्वयेऽपि देवेशि ग्रहणं चन्द्रसूर्ययोः ॥८२॥
नानासिद्धिप्रदं ह्येतत्साधकस्याभियोगिनः।

पत्रद्वये दक्षे वामे च मध्यवदेव ग्रहणद्वयं नानेति क्रूरसौम्यसिद्धिप्रदमभियोगिन उद्युक्तस्य।

मुमुक्षोस्तु।

मोक्षश्चैव पुनर्भद्रे पत्रद्वयमनुज्झितः ॥८३॥

तयोर्ह्येकपत्रेण सह नियतविषयतया तत्तेजःस्थापदव्याप्त्यादिरूपमन्तमं भोगं समुज्जिमीति तेन पत्रद्वयोज्झितो मध्यमार्गस्थ यो मोक्षस्तद्रूपे सूर्यग्रहणे मोक्ष एव हृदि तु चन्द्रग्रहणे भोगो मोक्षश्च।

अतश्च यो मोक्षार्थी।

पत्रद्वयं परित्यज्य पूर्वोक्तकरणेन तु।
उन्मन्यन्ते स्थितो नित्यं परित्यक्तावलम्बकः ॥८४॥
परित्यज्य त्वधः सर्वं ध्यानमास्थाय योजयेत्।
तस्य मुक्तिर्न सन्देहस्त्वन्यथा सिद्धिभाग्भवेत् ॥८५॥

पूर्वोक्तं करणं दिव्यं परावृत्तिरूपा लक्ष्यते चाधस्तान्तं सर्वमुन्मनान्तं परित्यज्य तत्समरसीकृत्य ध्यानं परात्मविमर्शः अन्यथेति दक्षवामपत्रोर्ध्वं स्थितः।

मध्यपत्रग्रहणं चैतद्दुर्लभमितरत्तु सुलभमेवेत्याह।

पत्रद्वयेऽपि ग्रहणं भवेद्भद्रे सर्वदेहिनाम्।

देहिनामित्यनेन मितयोगिनामत्यन्तं देहप्रमातृत्वाभिमानवत्त्वमिति दर्शयति। उपसंहरति।

एवमेतत्समाख्यातं यावदासुर्वरानने ॥८६॥

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एतद्विति सावधानं मन्त्रेत्यं ग्रहणम्।

अत्र चाध्यात्माहोरात्रे तथाब्दोदय उच्यते।

तमाह

हृत्पद्मादूर्ध्वपर्यन्तं राशयः षड् व्यवस्थिताः ८७॥

राश्यो मकराद्याः। षड्विंशदङ्गुले चात्र

अङ्गुलैः षड्भिरेकैको हृत्पद्माद्यावकल्पितः।

एकैक इति राशिः इत्यस्मिन् षड्विंशदङ्गुले

मासोदयेऽङ्गुले ह्यत्र तिथयः पञ्च संस्थिताः ८८॥ षडङ्गुले

तस्यार्धं दिनं पूर्वमपरार्धं निशा भवेत्।

सार्ध तस्य ह्यङ्गुलपञ्चभागावधि स्थितिस्तिथयः।

अत एव

षट्पञ्चकास्तिथीनां ये तेऽहोरात्रास्तु मासिकाः ८९॥

त्रिंशता तैरहोरात्रैर्द्विपक्षो मास उच्यते।

षडङ्गुले राश्युदयस्थाने त्रिंशदहोरात्रस्य मासस्य निष्पत्तिर्भवतीत्यर्थः द्विपक्ष इत्यनेनेदमाह यथान्तः पि तत्तन्माससाध्यः क्रूरसौम्यमिश्रार्थकृष्णशुक्लपक्षाश्रयणं सत्सम्प्रदाया योगिनानुसन्धेयमिति अत एव वर्षसौर विधौ तत्तन्मासकार्यं कर्म बाह्यान्तरमासैकीकरणानुसारेणापूर्वं योगिनाऽनुष्ठातव्यमिति तदेतद्येऽभिप्रायः। तदित्थम्।

मासि राश्युदये होम अर्धार्धप्राणसञ्चारे ९०॥

ऊर्ध्ववदधः प्राणसञ्चारेऽपि एवमादयो हि क्रमा ज्ञेया इत्यर्थः।

अथ राश्युदयं विभागेनादिशति मासप्रभेददर्शितापादेन।

हृदयादुदयस्थानान्सङ्क्रान्तिर्मकरे स्थिता।

षडङ्गुलान्यथ त्यक्त्वा कुम्भे सङ्क्रमते पुनः ९१॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कण्ठोर्ध्वं द्व्यङ्गुलं त्यक्त्वा मीने सङ्क्रमते पुनः
गलोर्ध्वाद्यावत्तालुन्तं त्यक्त्वा मेषेऽपि सङ्क्रमेत् ४२
नासाग्रं यावत्सङ्क्रान्तिरङ्गुलानि षडेव हि
एषा वै विषुसङ्क्रान्तिस्तन्त्रे संव्यवस्थिता, ४३

उदयस्थानादिति मन्त्रोच्चारणभूमेः सङ्क्रान्तिरिति प्राणार्कस्येत्यर्थात् अत एव माघादिमासक्रमोर्ध्वं स्थितः षडङ्गुलानीति काकादिवत् विषुसंक्रान्तिर्विषुवत्सङ्क्रान्तिस्तन्त्र इति उत्तरायणे एतच्च प्राग्वत्पारलौकिकादिसिद्ध्यङ्गतया इति शेषं।

तदाह —

'जपहोमार्चनध्यानान्महाभ्युदयकारिका,

एषा विषुवत्संक्रान्तिरित्यर्थः अत्रापि प्राग्वत्तथैव बाह्यसङ्क्रान्तिष्वपि तत्तत्फलप्रदत्वं स्मर्तव्यम् ।

अथ —

'नासाग्रं तु परित्यज्य प्राणहंसो वृषे चरेत् ४४
षडङ्गुलानि सन्त्यज्य सङ्क्रमेन्मिथुने पुनः
शक्त्यन्तं यावदध्वानं सङ्क्रान्तिर्मिथुने स्मृता, ४५

षडङ्गुलानीति काकादिवत् शक्त्यन्तं द्वादशान्तम् ।

एतदनुवादफलं पर्यवसायि दर्शयति —

'मकराच्च समारभ्य मिथुनान्तं च संव्रते
उत्तरायणमर्वन्तदेहिकीसिद्धिवर्जितम् , ४६

उत्तीर्यतेनेनेति व्युत्पत्त्या उत्तरमयनम् ।

ततश्च

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

'स्नानं ध्यानं तथा दानं पूजाहोमजपादिकम्
साधकाद्यैः कृतं यत्र सन्तानेकधा भवेत् ९७
इह जन्मनि नाप्नोति परत्रैवोपतिष्ठते,

साधकादीनां पुत्रकादीनां चात्र स्नानादिकरणतद्देहान्ते भोगो मोक्षश्चाभीष्टो भवति

इह जन्मनि नाप्नोतीत्यत्र हेतुमाह —
'दिनानि तत्र वर्धन्ते मकरान्मिथुनान्तिकम् ९८
तत्काले संहरेद्वीर्यं जगत्यस्मिंश्चराचरे
हंसो रश्मिभिराकृष्य गर्भस्थं कारयेत्तु तम् ९९

तत्रैवोत्तरायणे दिनवृद्धिर्मेषग्रहणाभ्यासेन विश्रान्तिभागानादरात्। वीर्यं विश्वस्याप्यायनकरं रसं हंसोनाहतनादोन्तर्बहिस्तु सूर्यो रश्मिभिः स्वतन्त्रीभूताभिर्विमर्शमयीभिरिन्द्रियदेवीभिरन्तर्बहिस्तु प्रभाभिः संहरेदिति व्याचष्टे गर्भस्थं प्राक्प्रपन्नगतं कारयेत् कुर्वतो रश्मीन्निधुनन्ति ।

तत्कृत्वा —
'गर्भस्थानेकधारूपं यद्गृहीतं पुरातनम्
कर्कटादेः समारभ्य सर्वं वपति तत्पुनः, १००
कर्कटादेरित्ययनोदयस्थानात् तदिति वीर्यम् ।

यत एवं प्राणोदयो वीर्यसंहारकृत् —
'तस्मादारभ्य मकराद्ध्यानहोमजपादिकम्
परलोकनिमित्तायां तदनन्तफलं भवेत्, १०१
पूर्वोक्तानुवादोयमत्रैवोत्तरायणे साधकस्य मन्त्रसेवार्थं जपादावान्तरस्यानविश्लेषात्मकालविश्लेषाश्रये समाचारमादिशन्ति —

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

'पुनश्चर्या निमित्ताय मन्त्रग्रहव्रतं च यत्
मीनद्वारमेतत्सर्वं मन्त्रसिद्ध्यर्थमात्मनः, १०२

पुनश्चर्या प्रथममेव मन्त्रग्रहपूर्वं व्रतं नियतजपादिकरणमष्टाङ्गु-
लकण्ठदेशाद्द्व्यङ्गुलद्वयं त्यक्त्वा ऊर्ध्वं तालव्यषडङ्गुलं मीनस्थानं।
एतदादौ प्राणावधिमिथुनस्थानानि अतः प्रभृति हकारमकार-
योगापरस्य निष्कलस्य मन्त्रत्वमिति पूर्वमुक्तम्

मत्स्यवलनसंयोगात्तालुरन्ध्रे व्यवस्थितेति च
श्रीविद्यासारे निरूपितत्वादत्र प्राणेमीनवन्मुखपुच्छाच्छोटनेन
तालुबिलाक्रमणात्तदन्तररसास्वादनतः साधकसंविदः सरसा-
पादनेन भाविफलं प्रत्यङ्कुरीभावापादनादेवमुक्तं युक्तं चैतत्।

यतोऽत्र—

'बाह्येऽपि तरवो लोके ऋतुवद्वसमीरितम्
कुसुमानन्दमायान्ति कुसुमायुधदीपकम्, १०३

तरवः कुरवकाद्या अपि मीनसञ्चारात्मकवसन्तात्प्रभृति कुसुम-
विकासमयमानन्दं प्राप्नुवन्ति तत्र ऋतुवद्वे समीरितम् वसन्ते
प्रथमतुद्भिद्यन्त्यत्रापि ऋतौ कुसुमानां प्रसरात् कुसुमायुधदी-
पकमित्यनेन कामोद्दीपनहेतुतामभिदधत्साहचर्येनान्तरस्यापि
वसन्तस्य कामानां प्रतिसाधकत्वं ध्वनति। अत एव बहिर्यथा
कुसुममेव फलप्रदानं तथान्तरापि मीनादौ कर्मारम्भः कुसुमप्र-
तिमः साधकानामवश्यमीप्सितं फलमभिमुखं करोतीति कुसुम
शब्दाभिप्रायः।

अत एव—

'मन्त्राः कालानुरूपेण व्रतचर्यादिनेरिताः
प्रबोधस्तैवदीप्ताश्च सिद्धिमुक्तिप्रसाधकाः, १०४

कालो मीनप्रभृदयः व्रतमाराधननियमः चर्या साधकोचि-
तसमयाचारः आदिशब्दात्करणबन्धादिरुच्चारणोपायः ईरिता

पं २४ ख. पु. प्रबोधप्रदीप्ताश्चेति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

उन्नेजिता हेयबोधो मन्त्रवाच्यदेवताव्याप्तितानं तेन प्रदीप्तात-
त्प्रकाशादिभेदविमर्शसारा: ।

अत एव सर्वमंत्राणां स्थितिरतोऽयमवत्यो मन्त्रः पूर्वसेवार्थम् —

(अध्यात्मप्रावृड्रूपात्मा षड्रसास्वादनेरितः
हंसबोधप्रबोधस्तु गलेके मीनमाश्रितः ;१०२

अध्यात्मप्रावृडोऽनाहतध्वनिस्तत्परमार्थः "शिवो धर्मेण हंस" इत्यत्र निर्णीतेन हंसस्य बोधेन व्याप्तितानेनेद्धः व्याख्यातमस्यावलम्बनाख्यात्मा गलेन मीनराशिसञ्चारप्राप्तोऽथ तद्वीबीजभेदोऽर्थः कलात्मकमुखपुच्छाच्छोटनया प्रोच्छलन्मीनरूपत्वमाश्रित आरूढः, तत एव च सर्वक्रियास्वयप्रारम्भादिरूहेनात्मना ईरितो लम्बिकारासास्वादाय प्रेरितः ततः प्रभृति मन्त्रतां प्राप्तः सन्नुच्चार्यः इति यावत् ।

एतदेवोपसंहारभङ्ग्या आदिशति —

"प्रावृट्संवेदनं तस्य स्फुटं तत्र भवेद्यतः
तदारभ्य जपान्तस्य सर्वमेव प्रवर्तते २०६
मिथुनान्तं च देवेशि ततः सिद्धिः प्रजायते,"

तस्याध्यात्मप्रावृषः स्फुटप्रावृट्संवेदनं मन्त्रतत्त्वानुभवनम् तत्रेति मीनस्थाने, तस्येति साधकस्य पूर्वसेवार्थं जपपूजाध्यानादि मिथुनान्तं प्राक्तवस्थाने विश्रान्तिं कृत्वा इत्यर्थः सिद्धिः प्रजायते मन्त्राराधनं निष्पद्यते। तदन्तो—नराघणचारे प्रोक्तस्येव मकारादिरूपत्वमुक्तं तदनुकाराद्बहिरिति वर्णयति। तथाहि हृदयादुल्लसितवक्त्रप्राणस्य प्रसरणात्मरत्वं। कण्ठे कुम्भवदनङ्गस्यानत्वात्कुम्भत्वं, ततः पूर्वापराच्छोटनेनोच्छलनात्मीनत्वं। ततोऽपि हृडबद्धवभ्रूमध्यभेदनात्मेषत्वं। तदन्त्वहयरसवर्षणाद्वृषत्वं। अनन्तरं शिवशक्त्युभयात्मकत्वान्मिथुनत्वमिति ।

एवं प्राणे मिथुनान्तमुत्तरायणं निर्णीयायाने कर्कटादिधनुरन्तं दक्षिणायनं निर्णेतुमाह —

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

"स हंसो बिन्दुशक्तिस्थः सिद्धिद्वारैरधोमुखः १०७
कर्कटादौ स वर्षेत्तु तात्वनं तालुकान्तरे,

तत्र हंसेन वर्तते यः प्राणः स बिन्दुशक्तिस्थः इति यदा करोति सृष्टिं तु ऊर्ध्वे बिन्दुः प्रवर्तते, इत्युक्तदृशा समन्तापदस्थः सिद्धिप्रदत्वात्तद्द्वारैः षडङ्गुलैश्चतुरैरधोमुखो ब्रह्मरन्ध्रक्रमेणातः प्रविष्टः। तात्वकान्तरे तालुमध्ये तुलान्तमिति कण्ठं षडङ्गुलं वर्षेत् ।

यावत्—
"कण्ठादधस्ततो देहे हृत्पद्मान्सर्वतो व्रजेत्, १०८
सर्वतः सर्वत्र देहे हृदयस्यापानपूरणेन विकासितत्वात्पद्मत्वं हृत्पद्मादिति तदाश्रित्य ।

यस्मादेवं
"तस्मादिहार्थसिद्ध्यर्थं पुष्ट्यर्थं चैव साधयेत्,
इहात्मनि सिद्धिरस्मिन्नेव देहेऽणिमाद्याविर्भावनं पुष्टिर्वलीपलितादभावः।

किञ्च प्राग्वद्बहिरपि—
"दक्षिणायनजे काले यस्मात्सृष्टिः प्रजायते, १०९
दक्षिणमनुकूलं देहसुवनाप्यायकरो ग्रीष्मोष्मशोषितानां तृणलतागुल्मादीनां वर्षासु पुनरङ्कुरोद्भेदो जातो भवति। तस्माद्बाह्याभ्यन्तरे तत्कालैकीकारेण पूर्वोक्ताः सिद्धीर्जपादिना साधयेदिति सम्बन्धः। ननु जपप्रकरणे ("जपः प्राणसमः कार्यो दिनभ्यो मुक्तिकांक्षिभिः संहारः स तु विज्ञेयः शिवधामफलप्रदः। कोष्ठ प्राप्तो यदा नादः पुनरेव प्रवर्तते, शार्वरी सा तु विज्ञेया हृदब्जे यावदागता सृष्टिरेषा समाख्याता सर्वसिद्धिफलोदया) इति पूर्वं प्रविभाग उक्तः। इह तु दिनोदयात्मकरमी नोदयः यतः साधकस्य मन्त्रसिद्ध्यर्थं

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

जपानुक्तं तथा कर्कटादावात्मसिद्ध्यर्थं साधयेदिति प्रतिपादितं पा
तत्कथमेतत् । उच्यते द्वितीयपटलप्रतिपादिते जपप्रविभागे स्थि-
मन्त्र त एव विशेष उक्तो यः साधकैर्मीनादिमिथुनान्तविश्रान्त्या
कल्पोक्तजपादि क्रमेण पूर्वमेव ये मन्त्राः साधनीयास्तथा
साधितास्तु प्रयोगकाले सिद्ध्यर्थं कर्कटादितुलान्तविश्रान्तिप्रा-
धान्येन प्रयोज्या इति। न कदाचिदत्र विचिकित्सा ।

अथ कर्कटादिषडङ्गुलविभागेन निरूपयति —

'शक्तयो हृदये हंसः संक्रमेत्कर्कटे प्रिये
षडङ्गुलानि सन्धस्य सिंहे वै संक्रमेत्पुनः २२०
षडङ्गुलैः पुनस्त्यक्तैः कन्या सङ्गमते रविः
नासिकाग्रात्तु तालवग्रे त्यक्ते वै विषुवद्भवेत् २२१
तुलसंक्रान्तिरेवोक्ता दक्षिणं विषुवद्भवेत्,

शक्तेः साधनरूपाया अधोव्यापिनी शक्तिर्ब्रह्मरन्ध्रादिपदे कर्क-
ट इव कर्कटायो वक्रहंसः ततः सदाशिवपदे नदनप्रधानत्वाद्घो-
षविस्वाक्रमणकारित्वाभ्यां सिंहः। ततो भ्रूमध्यादौ बैन्दवप्रका-
शप्राधान्याद्दीप्तिकान्तियोगात्सर्वसाधारणप्रसरणरूपगमितस्य
कन्याप्रवृत्ताख्यः। ततोऽपि तालुमध्ये समत्वेनावस्थितत्वात्ततः
प्रभृति तुलारूपः। साम्यादेव च विषुं व्याप्तिमर्हतीति कृत्वा
विषुवच्छब्दाभिधेयः पुनर्विषुवदिति पूर्वोक्तोत्तरविषुवतोऽन्यो-
ऽयं विषुवत्काल इत्यर्थः। अन्यत्वादेव च साधनं यत्कृतं तत्र
इह जन्मनि कामदं तदित्यर्थात् ।

अतश्च —

मृत्युञ्जयं तथा शान्तिं पुष्टिं तस्मात्समारभेत् २२२
तस्मात्स षट्संहारो गलाधः शीतवेतनम्,

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

एषोत्तमादिरूपा विविधात्र सिद्धिः स इति दक्षिणविषुवत्कालस्य
तुलः। अत एवाद्वैहिकं क्रूरकर्म न फलतीति तत्सर्वरससंहारि
पौषमासाधिष्ठातृ धन्विबोरविस्रात्मा कार्यमित्यर्थं लभ्यमत्र।

अथ

'षडङ्गुलानि त्यक्त्वा तु वृश्चिके कुरुते पुनः ११३

कण्ठोर्ध्वं द्व्यंगुलं त्यक्त्वा कण्ठाधश्चांगुलम्,

तालुतलादष्टाङ्गुलात्कण्ठात्षडङ्गुलानि त्यक्त्वा, यत्त्वत्रैवाष्टापेक्षा
ऊर्ध्वं प्राणोल्लासापेक्षया त्वधस्तनमङ्गुलद्वयं तत्त्यक्त्वा कण्ठा-
धः षडङ्गुले देशे प्रथममङ्गुलचतुष्टयं तत्र पूर्वाङ्गुलद्वयेन सह
षडङ्गुले वृश्चिकवन्निश्चलमवस्थाय शनैः शनैः प्रसर्पणाद्वृ-
श्चिकः।

अथ —

'वृश्चिकं तु परित्यज्य धन्विसंक्रान्तिरुच्यते ११४

षडंगुलादधस्तात्तु धन्विस्य स्वरते हृदि,

अधस्तादित्यधस्स्थं षडङ्गुलमाश्रित्य हृदि वसति व्यवस्यति
तत्र चायं हंसो बद्धलक्ष्यत्वाद्धन्वीत्युच्यते

तदित्थं —

'हृत्यक्तान्तं तु वै हंसश्चरित्वा ऊर्ध्वगोदयः, ११५

पुनः प्राणवृत्तिं श्रयतीत्यर्थः।

उपसंहरति —

'मकरादिषु संक्रान्तौ द्वादशैवं चरेत्सदा

अनुलोमक्रमेणैव आयुर्वै सर्वदेहिनाम् ११६

संक्रान्ताविति जातावेकवचनात् मकरादिषु याः संक्रान्तयः
तास्ववनुलोमक्रमेण द्वादशेति माघादीन्मासांस्तदा प्रतिप्राणचारं
हंसश्चरेत्।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

किमवधीत्याह। आयुर्वै सर्वदेहिनां यावज्जीवमित्यर्थः। अयमत्र दृष्टस्य नि-
त्यमेव संक्रान्तिदक्षिणायनोत्तरायणादिपुण्यकाललाभात्तत्सिद्धि-
समाधानमनायासेन जायते।

तदेतदाह —

'ऐहिकामुष्मिकी सिद्धिरधमा मध्यमोत्तमा,
साधकानामवस्थानां भवति ।

उपसंहरति —

'अयनद्वयमाख्यातं,

अत्र च मकरादिषु द्वादशसु कार्यस्य गर्भत्वं प्रादुर्भूतप्रायत्वं
शुद्धाविद्यत्वमुद्भवः, प्रारम्भः, उद्भवत्वं, जन्मसन्तापरिणतिः,
वृद्धिः; ह्रासः वयस्व क्रमादुद्भवत्यतोऽत्र जपादि क्रियैतादृगे
व फलं सूते इति गुरवोऽभ्यधुः ।

यदा तु प्राणापानयातायातपरिहारेण हृदि द्वादशान्ते च विश्रा-
न्तिः

क्रियते तदा —

'सोऽत्र सिद्धिर्द्वयोरिता, ११८

द्वयेन भेदमोक्षयुता अद्वयमयी महासाधकस्य भवतीत्यर्थः।

यतोऽसौ महासाधकः —

'अयनद्वयपर्यन्तमुन्मन्यन्ते सदा स्थितः,

यदा यदायनद्वयमाश्रयति तदा तदोन्मन्यन्त इति प्राणापा
नप्रशमपदे द्वादशान्ते हृदि च परतत्त्वानुभवे विश्राम्यति
यद्यपि पूर्वमुन्मन्यन्तता द्वादशान्त एवोक्ता तथापीहायनद्व
यपर्यन्त उन्मन्यन्त इत्यभिदधद्द्वादशान्ताविभिन्ना हृदि व्याप्तिरस्तीति

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

दर्शयन्नत एव द्वादशान्ते च हृदय इत्याद्यन्यत्रोक्तम् ।

अतश्च —

'तत्रस्थो वै जपध्यानान्मोक्षसिद्धिमवाप्नुयात्, २१८

जपध्यानप्रमुखं यत्तत्र परतत्त्व एव तिष्ठति विश्राम्यति स मुच्यत इत्यर्थः ।

अत एवेत्थं स्वभावेनैव —

'मोक्षं गत्वा तु नागच्छेत्प्रतिज्ञा भैरवस्य तु,

प्रतिज्ञा भैरवस्य न तु श्रीकण्ठोमापत्यादेरित्यनेन सर्वथा द्वादशान्तहृदयोर्विश्रान्तिः कर्तव्या इत्यादिष्टं । तथा द्वादशवर्षसाध्यमपि कार्यं तत्तद्मतमस्थित्या प्राण एव द्वादशवत्सरव्याप्तिमवगत्याप्रयासेनैव साधकः साधयेदिति । धितयन्द्वादशाब्दोदयमादिशति देवः ।

'अस्मिन्नब्दोदये भूयो द्वादशाब्दोदयं शृणु, २१९

तत्र द्वादश चैत्रादयोऽब्दमाससमानसमाख्याः ।

'चैत्रसंवत्सरे यस्मान्मासानामुदयो भवेत्

तदादि साधकैस्तस्मात्कर्तव्यं मन्त्रसाधनम्, २२०

तदादीति चैत्रनामानं संवत्सरमादिभूतं कृत्वा । प्रागुक्तचैत्रादिमासोदयकाल एवात्र चैत्रादिसंवत्सरोदकाल इत्याह —

'द्वादशाब्दः स विज्ञेयश्चैत्रमासादहानने,

अर्धाङ्गुलात्कण्ठादङ्गुलद्वयं त्यक्त्वा षडङ्गुले यच्चैत्रमासस्योक्तं स्थानं तदेव चैत्रसंवत्सरस्य ।

अथ

'लक्षणं तस्य वक्ष्यामि प्राणेऽस्मिन्प्रविभागशः २२१

तत्र संवत्सरेणैव अमुनोक्तेन सुव्रते

अहोरात्रस्तु यः प्रोक्तो द्वादशाब्दं भजेत्प्रिये २२२

द्वादश ते अहोरात्रा द्वादशाब्दं भवन्ति वै,

आन्तरेण प्राणसंवत्सरेण य आन्तरोऽहोरात्रोऽङ्गुलपञ्चभागधारीमात्रः तस्य द्वादशांशो द्वादशाब्दोदयेऽहोरात्रो भजते । एवं चाङ्गुलस्य षष्टितमोऽसौ भागो भवति । इत्थमहोरात्रे द्वादशाहोरात्रा भवन्ति ।

तथा च सत्यङ्गुले षष्टिरहोरात्राणां तातित्याह —

'पञ्चभिस्तास्तु संगुण्य द्वादशाब्दं ऋतुर्भवेत्, २२३

मासद्वयमित्यर्थः ।

तमेव द्विगुणं कृत्वा कालस्तु स विधीयते,

चतुर्मासाख्यः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

'त्रिगुणेनैतदयने,
अंगुलत्रयेण त्रिगुणितेनर्तुनाद्यमुत्तरायणं ततोऽन्यत्र त्रये दक्षिणायनं तदेवं ।

'वत्सरः षड्गुणेन तु, २२४

तदित्थं —

संक्रान्तयो द्वादशात्र द्वादशाहे प्रकीर्तिताः
द्वादशाब्दोदये प्राणे वत्सराः ते प्रकीर्तिताः, २२५

यद्वदिति षडंगुलकलनया ।

अथ ये —

'द्वादशाहे त्वहोरात्राः,

सम्भवन्ति ।

तेषां संख्या निबोध मे
सहस्राणि तु चत्वारि त्रिशती विंशतिः तथा २२६
द्वादशाब्दोदये देवि प्राणेऽस्मिन्कथिता मया,

प्राणे द्वादशाब्दोदये इति सामानाधिकरण्ये सप्तम्यौ ।

अथातिसूक्ष्मतया व्यवस्था —

'षष्ट्यब्दोदयमत्रैव पुनश्च कथयामि ते २२७
आनन्दाद्यास्तु ते ज्ञेयाः षष्ट्यब्दास्तु वरानने,

अत्रैवेत्येकत्र प्राणचारे ।

तदाह —

'ते चाथ उत्थिते प्राणे एकस्मिन्सुरसुन्दरि २२८
चरन्ति प्रविभागेन तथा ते कथयाम्यहम्,

अतश्च षष्ट्यब्दसाध्यां सिद्धिं यो वाञ्छति असावान्तरादानन्दाख्याद्वर्षात्प्रभृति मन्त्राराधनमुपक्रमेतेत्याह —

'आनन्दप्रभृतेर्देवि मन्त्रमाराधयेत्तु यः २२९
तस्यानन्दस्तु देवेशि मन्त्रेण सह जायते,

मन्त्रस्य च प्रातिभकलस्वभावतयाशेषविश्वनिर्भरत्वेन परमानन्दरूपत्वात्तदभेदविमर्शमयप्राणोच्चारतस्यानन्दमयतैव भवति । ये तत्रस्थैराभिहितषष्ट्यब्दोदयस्थित्या वा सर्वमेव पुरुषायुषं यत्किन्यत्कर्मानुष्ठानकर्तव्यं तदेकत्रैव प्राणचारे व्याप्तितस्य सहसैव स्ते

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सर्वदेव कृतं भवति ज्ञानिनः सिद्धिकामस्य तु षष्टिवर्षसाध्यं तदीयवत्सर-
तत्तत्साध्यं वा कर्म प्राणीयव्याप्तिज्ञानपूर्वकं कुर्वतो न संवदतीत्याशयेनेह
साधकाधिकारे षष्ट्युदयादधिकं नोक्तं । इयत्कर्मोक्तं श्रीनन्दिशिखा-
यां तु ज्ञानव्याप्त्यभिप्रायेण त्रिंशत्यधिकशतोदयोऽप्यभिहितः । एवं च
ज्ञानयोगिनामेवं प्राणे व्याप्तिज्ञानात्सर्वमयत्नेन सिद्ध्यत्येव । यदुक्तं

श्रीमदुत्पलदेवपादैः ।

साक्षाद्भवन्मये नाथ सर्वस्मिन्भुवनान्तरे
किं न भक्तिमतां क्षेत्रं मन्त्रः क्वैषां न सिद्ध्यति इति ।

किञ्च —

'द्वादशाब्दे त्वहोरात्रे पञ्चधा भेदयेत्तु तम् १३०
षडब्दे ते त्वहोरात्राः पञ्चैव परिकीर्तिताः,

द्वादशाब्दोदयेऽङ्गुलस्य षष्टितमो भागोऽहोरात्र इत्युक्तं। इदानीं
तु तमपि पञ्चधा भेदयेदेवं षडब्दोदये प्राणाङ्गुलस्य त्रिंशत्तमो भा-
गोऽहोरात्रो भवति ।

तदनया सूक्ष्मतया स्थित्या —

'ते वै तद्गुणिताः तत्र मास एकः प्रकीर्तितः १३१
तैश्च द्वादशभिर्देवि वर्षमेकं विधीयते,

ते इति द्वादशाब्दोदयेऽहोरात्राः । तैरिति तथाभूतैर्मासैः ।

एवं च —

'अङ्गुले तु सपञ्चांशे मानमेतत्प्रकीर्तितम् १३२

अहोरात्रशतद्वयात्मन्यङ्गुले मासदशकमहोरात्रषष्ट्यात्मनि चा-
ङ्गुलपञ्चमांशे मासद्वयमिति कृत्वा सपञ्चांशेऽङ्गुले। एतदिति
षडब्दोदये वर्षमानमुक्तम् ।

तदित्थं —

'षडङ्गुलैस्तु पञ्चाब्दाः षडब्द उदयन्ति ते,
द्वादशाब्दोदयस्थित्या वर्षोदयाश्रयैः षड्भिरङ्गुलैरिह पञ्चवर्षाणि
भवन्ति। मासदशकोदयात्मकोऽङ्गुल इति तैः षड्भिः षष्टिमासानां
वर्षपञ्चकात्मनां निष्पत्तिः ।

अनया च कल्पनया —

'कल्पक्षयाद्यावदूर्ध्वं त्रिंशदब्दोदयो भवेत् १३३

पुनरपि —

'प्राङ्न्यायो यावदुत्पन्नं त्रिंशदब्दोदयो भवेत् ,

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

किञ्च —

षष्ठ्यब्दे ये त्वहोरात्राः संख्यां तेषु वदाम्यहम् २३४
विंशतिस्तु सहस्राणि सहस्रं षट्शताधिकम्
अहोरात्रस्तु षष्ठ्यब्दे संख्यातास्तु वरानने, २३५

बाह्याहोरात्रगतप्राणचारसंख्या ।

उपसंहरति —

'षष्ठ्यब्दोदय आख्यातः एकत्रैव मया,

अत्र षष्ठ्यब्दोदयान्ते प्रयोजनमाह —

'सूर्यचन्द्रोपरागे च पक्षमासायनेषु च २३६
युगादिषु युगान्तेषु वत्संवत्सरेऽपि च
वर्षद्वादशके चैव षष्ठ्यब्दे च वरानने २३७
स्नानदानेन यज्ञैश्च पूजाहोमजपेन च
ध्यानयोगादिभिश्चैव बाह्ये काले तु यत्कृतम् २३८
अमुनोक्तं वरारोहे तत्फलं लभते महत्,

बाह्ये चन्द्रोपरागादौ षष्ठ्यब्दान्ते अमुनानन्तरप्रकारेणोक्ते तस्मिन्नेव काले स्नानदानादिक्रमेण कृते तत्फलं महदनन्तं साधको लभते ......युगोदयस्थित्या चैत्र........ नाम युजपोषाणां दीनि चत्वारि...... भवति

'प्राणहंसगतिं चारं ज्ञात्वैकस्मिंस्तु तद्व्रजेत्, २३९

प्राणस्य हंसत्वं प्राग्वत् चारे प्राणापानवाहे षष्ठ्यब्दान्तव्याप्तिके नदिति चन्द्रग्रहादिकं । नन्वेवं वस्तुस्थ्येन तद्व्याप्तिवत्त्वं प्राणस्य कथं प्रतिभासते इत्याशंक्याह —

'स्वसंवेद्यो भवेच्चारो नाडीचारजयात्स्फुटम्,

नाडिषु चारस्य वाहस्य जयादभ्यासेन संचरणस्वातन्त्र्यलाभात्सर्वप्राणीया व्याप्तिर्मध्यमार्गे व्यक्तीभवत्यतो योगाभ्यासे यत्नः कार्य इति तात्पर्यम् —

योगाभ्यासस्य प्रावीण्ये सति —

'अथवा स जपादेव मन्त्रार्थमुपबृंहितः २४०
मन्त्री योगं विजानाति ज्ञात्वा सर्वज्ञतां व्रजेत्,

जपादिति पञ्चप्रणवाधिकारोक्तसंख्याकाद् उपबृंहितो लब्धोत्कर्षः। मन्त्रीति यथोक्तमन्त्राश्रितः योगं यथारुचि प्राणसंचारस्वातन्त्र्यं सर्वज्ञतां यथोक्तप्राणीयसर्वव्याप्तिसाक्षात्कारित्वं परमेश्वरतां च । उक्तं हि

त्रिगुणेन तु जप्येन स्वच्छन्दसदृशो भवेदिति ।

एतदुपसंहृत्यान्यदवतारयति —

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

'पुनरेव प्रवक्ष्यामि नाडित्रयविभागतः १४१
दक्षिणोत्तरसंक्रान्तो विषुवद्वारतस्तथा
यथा चरत्यसौ हंसो जगत्यस्मिंश्चराचरे १४२
अन्तःस्थः कालरूपेण कलाभिः कलयञ्जगत्,
मध्यमार्गाश्रयेण चारस्थितिरुक्ता इदानीं दक्षवामे तदुभयात्मनि
च विषुवति यथा हंसो जंगमस्थावरात्मनि जगति चरति। जंगमेषु चरन्-
स्थावरेष्वपीन्द्रियप्रसरणयुक्त्या स्फुरति। अत एवान्तःस्थ इति प्रमातृषु
भूतवर्तमानादिकालरूपेण परं च सञ्जगत्सर्वं दलनुटिलवादिरूपाभिः
कलाभिः कलयन्नुन्मादिविकारवद्रूपतया सृजन्संहरंश्च यथा चरं-
स्तथा प्रवक्ष्यामीति संगतिः। अचरस्यापि चान्तःहंसस्य दक्षवाममध्य-
नाडिषु रसयोजनया पुष्पफलपोषणं हंसः करोतीति वृक्षायुर्वेदज्ञाः।
कीदृगसौ चरतीत्याह—
'नाडित्रयकृताधारो मार्गत्रयव्यवस्थितः १४३
गुणत्रयसमाविष्टस्त्रिधावस्था व्यवस्थितः
कारणैः षड्भिराक्रान्तः शक्तित्रितयसंयुतः १४४
इच्छाज्ञानक्रियाविष्टः सोमसूर्याग्निमध्यगः,
एतन्नाडीत्रयादि क्रमेण व्याचष्टे—
'दक्षनासापुटे चैव नाडी वै पिङ्गला स्मृता १४५
इडा चैव तु वामेन सुषुम्णा मध्यतः स्थिता,
एतन्नाडीत्रयमेव मार्गत्रयमित्याह—
'दक्षिणे देवमार्गस्तु पितृमार्गः तथोत्तरे १४६
मध्यतः शिवमार्गस्तु,
का तस्य शिवतेत्याह—
'तत्र गत्वा न जायते,
गत्वेत्युपलम्भेन विश्राम्य।
अत्रैव गुणत्रयमवस्थात्रयं च दर्शयति—
'दक्षिणे सत्त्वजाग्रत्स्थः स्वप्नस्थो वामतो रजः १४७
मध्ये तमस्तु विज्ञेयं सुषुप्तावस्थ एव च,
सत्वरूपत्वं ज्ञानप्राधान्यात्क्रियाशक्तिमयत्वाद्वामे रजः
मध्यत्विच्छाशक्तिमये भेदोपसंहारमार्गरूपत्वात्तमोऽत्र एवमध्यं अत्रो-
भयनाडीसमवाहित्वं समानव्याप्त्या न तु मध्योर्ध्ववाहित्वं।
तस्य तुर्यप्रकाशरूपत्वे सोऽपुप्ततमो योगाभावादत्रैव कारणान्याह—
त

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

'ब्रह्मेश्वरश्च दक्षस्थो वामे विष्णुसदाशिवौ २४९
मध्ये रुद्रशिवौ प्रोक्तौ सर्वातीतः परः शिवः,
ब्रह्मविष्णुरुद्राणां परव्यापका ईश्वरसदाशिवशिवाः दक्षवाममध्या-
धिष्ठातृत्वेन स्थिताः। अत एव जाग्रदादित्रयमपीश्वराद्यधिष्ठानानुर्य-
व्याप्तिरप्यस्तीति मन्तव्यं। सर्वातीत इत्यनेन तु परमकारणस्वरूपमुक्तम्।
कारणत्वपरापरभेदेन शक्तित्रयस्थितिमाह—
'ज्येष्ठा ज्ञानी च दक्षे च क्रिया वामा तथोत्तरे २०२
रौद्री चेच्छा च मध्यस्था,
ज्ञानाद्या अपराः ज्येष्ठाद्यास्तु पराः।
कारणानुसारेण परकारणस्वरूपवत्परशक्तिस्वरूपमप्याह—
'पराशक्तिः परापरा,
सर्वमेव परमपरं च व्याप्य स्थितेत्यर्थः।
अत्रैव सोमसूर्याग्नीनाह—
'दक्षिणे तु स्थितः सूर्यो वामे सोमो विराजते २५०
पाके प्रकाशकत्वे च मध्यस्थश्चैव पावकः,
पाके प्रकाशकत्वे चेति तन्निमित्तं पावकोऽग्निः सोमसूर्ययोस्तु
"पाचयति तपति सूर्यः सोमो वर्षति चामृतम्" इति कार्यं वक्ष्यति।
पाकप्रकाशौ विवरद्वारेण व्याचष्टे—
'पाचयेत्सर्वपापं हि,
पाचयेत्सर्वं।
'सोमादि गुणसम्भवम् २५१
प्रकाशयेत्स्वसामर्थ्यात्परतत्त्वमनामयम्,
स्वसामर्थ्यादिति गुणीकृतप्राणादिवृत्तिवशोन्मग्नसंवित्स्वभाव-
तया। पूर्वं मध्यमार्गाश्रयदिनोदयानुसारं ग्रहादीनां स्थितिरुक्ता
इदानीं तु दक्षवामतनुमध्याश्रयेणाह— पा/
'राशयश्च ग्रहाः सर्वे नक्षत्रयोगादयश्च ये २५२
चन्द्रसूर्यपथेनैव ते चरन्त्यनुपूर्वशः
सूर्यसोमौ च ते सर्वे भुञ्जन्ति क्रमशः प्रिये, २५३
ते सर्वे भैरवाष्टकपर्यन्ताः सोमसूर्याविति पृथगाह पृथक्समवाये
युगपद्भुञ्जतेऽपीति।
इत्थं च—
'सोमसूर्यात्मकास्ते वै पथिद्वयव्यवस्थिताः,

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

दक्षे प्राणसूर्यात्मानो वामेऽपानसोमात्मकाः मध्ये तूभयात्मकाः एतच्च द्वितीयपटले आत्मत्रिविधविभागावसर एव विभक्तम् ।

सोमसूर्यात्मकत्वे च सति तेऽपि तत्फलप्रदा इत्याह —

'वायति तपति सूर्यः सोमो वर्षति चामृतम् १५४
सोमसूर्यात्मकं यस्माज्जगत्स्थावरजङ्गमम्,

यतः प्रोक्तव्याप्त्या सूर्यसोमवाहसम्बद्धत्वात्सर्वं जगत्सूर्यसोमात्मकं । हिममपि दहति वह्निरपि वाप्याययति स्पर्शेनेत्यनेन न्यायेन तत्तत्प्रमातृदेशकालन्यायेनेदं न विस्मयस्य ह्लादतापकारित्वमायलम्बनात्ततः सूर्य इति दक्षवाहो वायति शोषयति सन्तापयति च सोम इति वामवाहस्त्वमृतं वर्षत्याप्याययत्यतः क्रूरसौम्यसिद्धिसाधनपरेण तदौचित्येनैव प्रवर्तनीयमिति परमार्थः ।

किञ्च —

सौरो दक्षिणवाहस्थो उत्तरायणसंज्ञितः १५५
वामस्तु सौम्यो यः प्रोक्तः तत्र वै दक्षिणायनम्
सोमसूर्यात्मविषुवत्प्राणद्वयविनिःसृतम्, १५६ १५.३ पुर

ऊर्ध्वाधोवाहवदत्राप्युत्तरायणादि विभागोऽस्तीत्यर्थः ।

अत्र संक्रान्तिमेदं दर्शयति —

'उदक्संक्रान्तयः पञ्च पञ्च वै दक्षिणायने
दक्षिणोत्तरयोर्मध्ये संक्रान्त्या विषुवद्द्वयम्, १५७

अहनि द्वादश प्रोक्ता इति

वक्ष्यमाणस्थित्या बाह्येऽह्नि द्वादशवामदक्षमध्यसंक्रान्तयो नवशतप्राणपानवाहात्मनो भवन्ति ।

अत्र फलं दर्शयति —

'सौरस्य दक्षिणो मार्गः त्वभिचारप्रसिद्धिदः
आप्यायते तथा पुष्टौ शान्तिके सौम्य उत्तरः, १५८

अथ संक्रान्तिदृष्टौ क्रममाह —

'दक्षिणादुत्तरं याति उत्तराद्दक्षिणं यदा
दक्षिणोत्तरसंक्रान्तिः सा चैवं संविधीयते, १५९

बाह्ये दक्षिणविषुवद्दिने वक्ष्यमाणनुसारं प्रातरान्तरं दक्षिणविषुवत्काले समवाहेन स्थित्वा दक्षिणमार्गादुदेत्य उत्तरमार्गं याति । पुनरुत्तराद्दक्षिणं यदा याति तदा सा दक्षिणसंक्रान्तिरुत्तरसंक्रान्तिश्चोच्यते एवं संविधीयते । अनेनैव क्रमेणैव पुनरुत्तराद्दक्षिणं यातीति संविधीयते निश्चीयते तेन दक्षिणोत्तरदेशेषु पञ्च संक्रान्ती वहतीत्यर्थः ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अथ षष्ठीमुत्तरविषुवत्संक्रान्तिमाह —

'दक्षिणस्यां यदा नाड्यां संक्रमेत्तु वरोत्तरम्
यावदर्धं तु तत्रस्थं मध्येनोत्तरतो वहेत् १८०
तावत्तद्विषुवत्प्रोक्तमुत्तरं तूत्तरायणे'

दक्षिणनाड्यां पञ्चसंक्रान्त्यात्मिकायां स्थित्वा यदा वरोत्तरं मार्गं संक्रमेत्तदा मध्येनेत्युभाभ्यामुत्तरं विषुवद्भवति तदुत्तरायण इति दक्षिणवायोरुत्तरायणस्थत्वात् । कथमित्याह मध्येति दक्षिणस्यमर्धं प्राणीयं कृत्वोभाभ्यां पुटाभ्यां वहतीत्यर्थः । यावदुत्तर इति च यद्याख्यानुभवसिद्धं तस्यायमर्थः ततोनन्तरमुत्तरत उत्तरात्प्रभृति वहेद्यावदुत्तरा पञ्चमी संक्रान्तिं यावत्तेनोत्तरदशोत्तरदशोत्तराः पञ्चसंक्रान्तीर्वहेदिति तात्पर्यार्थः । उत्तर इति सीत्वं छिरावर्तनीयं । टीकाकारैस्तु दक्षिणमुत्तरमित्यायुत्तरायणमित्यन्तमुत्तरविषुवद्विषयमेव व्याख्यातौ : संक्रान्तीनां विभागो न, दर्शितो ग्रन्थयोनरूक्यं चाश्रितमत ।

अथ दक्षिणविषुवमाह —

'उत्तराद्दक्षिणायां तु संक्रमेत्तु वरानने १८१
यावदर्धं वहेत्तत्र अर्धं दक्षिणे भवेत् ८१
विषुवद्दक्षिणं तावद्दक्षिणायनगं प्रिये, १८२'

पञ्चसंक्रान्तिरूपादुत्तरान्मार्गाद्दक्षिणस्यां नाड्यां संक्रमन्नर्धं प्राणीयं तत्रैवोत्तरेऽर्धं च दक्षिणे यावद्वहत्युभाभ्यां पुटाभ्यां समं वाहाद्दक्षिणविषुवदेतद्दक्षिणायनकालगतं भवतीत्यर्थः ।

अथ विषुवद्द्वये फलमाह —

'तत्र पूजा जपो होमो यत्कृतं,

तत्

'मुक्तिदं भवेत्,

किं च —

'ध्यानयोगेन वीताचं तत्स्यो वै भोक्षयेद्गुरुः, १८३

ध्यानमत्र परतत्त्वचिन्तनं ।

तदित्यत्र —

'बाह्ये चैव त्वहोराते अध्यात्मं तु वरानने
चतुर्विंशतिसंक्रान्तेः प्राणैस्तु संक्रमेत्, १८४'

चतुर्विंशति संक्रान्तीः — प्राणैः प्राणैरहर्वादलायकस्य प्रधाननाडीत्रयस्पर्शदेवामिति व्याप्तिका : प्राणैरिह इति प्राक्तन ।

अथ विभागः

'अहानि द्वादश प्रोक्ता रात्रौ वै द्वादश स्मृताः,

अत्रापि विषुवत्संक्रान्तीनां विभागमाह —

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

'पूर्वाह्ने विषुवच्चैकं मध्याह्ने तु द्वितीयकम् २६५

तृतीयं चापराह्णे वै अर्धरात्रे चतुर्थकम्

चतुर्थी विषुवत्प्रोक्तमहोरात्रेण मुक्तिदम् , २६६

तेन बाह्ये विषुवद्दिने पश्चिमरात्रिशेषघटिका सपादा दिनोदयात्घटिका सपादा इत्येकं विषुवत्। ततः पञ्च क्रमेण संक्रान्तयः प्रत्येकमर्धतृतीया घटिका एवेति दिनारम्भात्प्रभृति पादोना एकादशचतुर्दश घटिका भवन्ति। ततो द्वितीयं विषुवदर्धतृतीयघटिका ततोपि पञ्च संक्रान्तयः तथैवेत्येवमित्यहन्तं पादोना एकोना त्रिंशन्नालिका भवन्ति। ततोपि दिनान्तप्रविष्टात्सपादा घटिका सपादा च रात्रिप्रारम्भे घटिकेति तृतीयं विषुवदित्यनेन क्रमेणार्धरात्रे विषुवच्चतुर्थं यथा यथा दिनानि यो यो ह्रासो वृद्धिर्वा भवति तथा संक्रान्तीनामपि स मन्तव्य इति तत्त्वार्थः

यदुक्तमस्मद्गुरुभिरप्रेषागमोपनिषदालोके तन्त्रालोके।

विषुवद्वासरे प्रातः सांप्राणालीसमध्यगः

वामे तत्रोदयस्याध्यान्तेऽपि च संक्रान्तिपञ्चकम्।

'एवं दीर्णासु पादोनचतुर्दशासु नालिषु, मध्याह्ने द्वितीयविषुवत्तत्र प्राणशमीर्वहेत्॥ दक्षोदगन्यादन्ते ह्नेः पञ्चसंक्रान्तिपञ्चकम् नवासु प्रातमेकैकं ततो विषुवदुत्तरम्॥

पञ्चके पञ्चकेऽतीते संक्रान्ते विषुवद्बहिः

यद्वत्तथान्तः संक्रान्तिर्न्नव प्राणशतानि सा ॥

एवं रात्रावपीत्येवं विषुवद्दिवसात्समारभ्याहर्निशा वृद्धिह्रासः संक्रान्तिकोप्युक्तावित्यादि कालतत्त्वप्रकाशाने षष्ठ आह्निके

यत्तु तत्र मध्याह्ने विषुवदित्युक्तं॥

तद्बाह्योत्तरायणे विषुवद्दिने प्रातस्तत्र विषुवद्भवतीत्यभिप्रायात्

इह तु बाह्यदक्षिणायनविषुद्दिने प्रातर्दक्षिणविषुवद्भवतीत्याभिप्रायात् अन्यथोक्तम् ॥

अथाध्यात्मसंक्रान्तीनां बाह्यकालस्थितिमाह प्राति

'चतुर्विंशतिसंक्रान्त्यः समधातोः स्वभावतः

शतानि नव वै हंस एकामेकां वहेत्सदा, २६७

समधातोः पूर्णिमाम्यनुपहतस्यात्र च शुक्लप्रतिपदः प्रभृति दिनत्रयमादौ वामे मार्गे प्रथममर्धतृतीया घटिका हंसो वहति ततोऽन्यद्दिनत्रयं दक्षिणे ततोप्यन्यद्वामे इत्यादिः क्रमः श्रीकालोत्तरादिशास्त्रोक्त एतदुपपत्त्यर्थं स्मर्तव्यः।

यदुक्तं कालोत्तरे —

तत्र तावदयं प्राप्य दर्शप्रतिपदं महत्

समुदेति दिशो तावद्द्वादशो चन्द्रदिनत्रयम्

ततः संक्रमते सूर्ये तत्राप्युदयते त्र्यहम्

संक्रम्य त्रयमेतस्मात्पुनरेति हिमद्युताविद्यादि ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

उपसंहरति —
'एतन्मानं समाख्यातम्,
संक्रान्तीनामिति प्रिये: ।
अन्यथान्यथा प्रवहनमिहेतर सूचकमित्याह —
'अन्यथा प्रवहेद्वायु
इष्टं चेवाप्यनिष्टं च तदा संसूचयेत् मः, २५८
समधातोरित्येव ।
यत्तत्तं
आत्मार्थं वा परार्थं वा तस्माद्योगी निरूपयेत्,
आत्मार्थं निरूपयेत् आत्मना परीक्षेत परार्थं निरूपयेदिति परं निरूपणायां परीक्षायां नियुञ्जीत अत्र निरूपयेदिति द्वौ रितौ ।
अथात्र परीक्षाकालमाह —
'पूर्वोदये तु सम्प्राप्ते भास्करस्य वरानने २५९
जीवितं मरणं चैव तदारभ्य विचारयेत्,
जीवितमरणत्वात्सुखदुःखादि भोगस्य प्रथमं तत्परीक्षेव प्राधान्याद्विहोपक्रान्ता भास्करस्य दक्षिणप्राणस्य पूर्वोदय इति प्रोक्तोभयवाहात्मकप्रातस्तनविषुवत्कालानन्तरं यदोदयो भवति ततः प्रभृति विचारयेत् । अत्र च बाह्योत्तरायणे विषुवद्वासरप्रातस्तनकालात्प्रभृति परीक्षेतेति कालावलीकारः । सर्वदैव प्राभातिकप्रोक्तान्तर्विषुवत्कालोत्तरभाविदक्षवाहात्प्रभृतीति गुरवः ।
तत्र —
'स्वसंयतमना योगी वीरो योगासनस्थितः २६०
संस्मृत्यात्मनं प्राणं सुषुम्णान्तर्गतं प्रिये,
स्वसंयतत्वं मनसो विषयाकलुषितत्वं वीरः प्राणवाहनिभालनैकाग्रः योगासनः पद्मासनादि आत्मजं प्राणमिति व्याख्यातावरोहक्रमेण चित्स्वरूपाद्वेोत्थितं सम्यक्स्मरन्निव्यकारणवन्यक्रमेण पूर्वोक्तानुप्रवेशयुक्त्या परामृशन् ।
अतश्च
'उपशान्तस्तदा तिष्ठेत्प्राणैकगतमानसः, २६१
मध्यप्राणवाहावधानेन प्रत्याहारप्रधानात्सुप्रशान्तः ।
एवं सर्वप्रत्यभिज्ञाभूतनिभालितसुषुम्णामार्गस्य योगिनो यदा —
'प्राणसंक्रान्तिकालो वै पिंगलेकस्थितो वहेत
प्रवहे विषुवद्वेपि ज्ञात्वा कालं समाविशेत् २६२
ज्ञात्वेत्यतोनन्तरं तदेतदध्याहार्यं तेनायमर्थः मध्यपथनिभालनेत्यनन्तरं पिंगलपुरः सरं प्रभातकालमुभयवाहात्मके निभाल्य तदनन्तरं पिंग-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ले दक्षिणमार्गे एवैकस्मिन्यथोक्तदक्षिणवामक्रमवाहोल्लङ्घनात्स्थितं
चिरकालं समवस्थानमुपलक्ष्य तादृशे प्रवाहे कालमिति स्वस्य पर-
स्य वा मृत्युमादिशेत् ।

एतद्विभजति—

एकाहं जीवितं ज्ञेयमहोरात्रेण सवते
अहर्द्वयं स जीवेत् अहोरात्रद्वयेन तु २७३
त्र्यहं तु त्रिभिरेवात्र चतुर्भिस्तुरहकम्
पञ्चाहं पञ्चदिवसैः षड्भिः षडहमेव च २७४
सप्तभिः सप्त वर्षाणि वेदवेसाष्टभिर्दिनैः
नवभिर्नव वर्षाणि दशभिर्दश एव च २७५
दिनैकादशकेनैव वर्षैकादशकं प्रिये
दिनैर्द्वादशभिर्योगी जीवेद्वर्षाणि द्वादश २७६
तत्रयामप्रवाहेण षण्मासानथ जीवति
प्रहरान्षड् वहेद्यस्य मासांस्त्रीन्वै स जीवति २७७
पञ्चप्रहरवाहेण ह्यर्धमासायुरेव च
चतुर्भिः प्रहरैर्देवि मासमेकं स जीवति २७८
प्रहरत्रयवाहेन मासार्धं चैव जीवति
प्रहरद्वयं वहेद्यस्य दिनान्यष्टौ स जीवति २७९
चतुरः प्रहराज्जीवेत्प्रहरं तु वहेद्यदा
प्रहरार्धं वहेद्यस्य स जीवेत्प्रहरद्वयम् २८०

अत्र प्रोक्तनवशतप्राणवाहातिरेकेण यदि द्वादशसंख्याके
कालानि वाह्यन्ति दिनानि समभागः प्राणपिङ्गलायामेव
एकस्यां स्थितौ वाममार्गसंस्पर्शो वहेत् तत्तावत्संख्यान्येव
वर्षाणि जीवितं भवति सप्तप्रहराद्यर्धप्रहरान्ते तु स्वबाह्या-
भ्यधिके वाहे षड्ढ्यानवर्षैकमासतदर्धदिनाष्टकचतुर्दिनैकदि-
नार्धमायुर्भवति । कश्चित्तु नवशतिकावाहानन्तरं प्राणापान-
वाहात्मकान्तरदिनस्थित्या दिनविभागं स्वपरपरीक्षार्थं त्रुटिच-
तुष्टयात्मकान्तप्रवहनस्थित्या च प्रहरविभागं स्वपरीक्षार्थमेव
व्याकृतवान्, अनुभवार्थं च बाह्यदिनादिवाहं प्रोक्तवान् ।
सप्तप्रहरादिवाहं तु बाह्यमभ्युपपन्नमेव यतः यदि बाह्या-
नि द्वादशापि दिनान्यायातमन्योः प्राणो वहति तत्कोऽत्रानुभव-
बाधः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

न तथोपलम्भोऽस्तीत्यनायासमनुष्ठानव धानेन नद्वैतदुक्तं प्राकम् ।
१ इत्युक्य नु तथा चोपलम्भो भवत्यव नुष्टिचतुष्टया कप्रहरस्थित्या ना
च सप्तादि प्रहरवाह्नोऽत्यन्तासम्बद्ध एव न हि कस्य चिदपि तानुदिन—
प्राणचारवाहः स्वाभाविकी द्वादशात्यंगुलतामुल्लङ्घ्य वहति चतु—
प्प्रहरवाहे च षड्विंशत्यंगुलान्तरे अपानस्याप्रवेशो मरणप्रसंगः । नद्वैताधिक पाठः
किं च तथाविधांशांशिकावाहो योगिना महता प्रयत्नेन साधितः
तत्तत्सिद्धिप्रदः इत्यभावस्या प्रयत्नेन घटितः सिद्धिप्रद एव भव—
न नु जीवितावसानसूचकः। पिंगलेकांस्थित इति चोत्राश्लिष्टं यदि
तु योगिभिरत्र पदे वाग्भेदो दीयते तवेयार्थमध्येनत्साध्येवे नास्मा—
कं ग्रहः कश्चिनदपि तु दिनवाहः स्वपरपरीक्षार्थः यामवाहस्तु
स्वपरपरीक्षार्थः इत्यत्र न वचनं किञ्चिदस्ति प्रहरादिवाहव्यव—
स्था च वास्याप्यभ्युपगम्यते इति स्फुटमिदं स्वमनीषामा—
त्रकल्पित इत्यलं पूर्वैः सह विवादेन विपर्यस्तत्वागमा—
र्थबोधोऽनुष्ठानविपर्यासहेतुर्माभूदित्याशयेनैतदुक्तम् ।

किञ्च—

'सद्यो मृत्युर्भवेत्तस्य यस्य हंसस्त्रिमार्गगः,
सद्य इति तस्मिन्नेवार्धप्रहरे त्रयो मार्गाः नासारन्ध्र
मुखं च । अत्रापि जीवितं च

एतत्परीक्षाकालात्प्रभृति गणयेदित्याह—

'यदारभ्य निरूप्येत प्राणो वै कालमीदृशम् २८१
मासः पक्षो दिनं वर्षं तदहः प्रभृति प्रिये
हंसस्यैवं प्रयत्नेन तत्काले निश्चयो भवेत्, २८२
यतो बाह्यात्कालादारभ्य सकलकालव्यवस्थापकत्वा—
त्कालं प्रभविष्णुतया विश्वस्याक्रमणक्षमं स्वरं प्राणप्रकृ—
ष्टेन निभालनात्मना यत्नेनैवमुक्तयुक्त्या निरूपयेत् परीक्षयेत्
ततः प्रभृति मासपक्षदिनवर्षादि सम्यग्लक्षयित्वा तत्काले
निश्चयो भवेद्योगी जीवितस्येति सम्बन्धः ।

उपसंहृति—

अगाधमाने ~~व~~ ... यमने काले एवं ते कथितं मया,
एवंविधलक्षणमत्र द्विविधमाश्रयहावः तस्य संहारप्रधान—
त्वादन्यथाभावे सत्येव मृत्युसूचकत्वमुक्तमित्यर्थः बाहुल्या—
शयेन चैतदुक्तम् ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

(प्रधानत्वात्)

त्रिमार्गवाहस्यापि प्रतिपादितत्वात् प्रसंगात् प्रकारान्तरं
मृत्युज्ञानार्थं प्रतिज्ञास्यते —
'अयुक्तस्यापि च प्राप्ते मृत्युज्ञानं निबोधमे, २८३
तदाह —
कर्णरन्ध्रं कृतांगुष्ठो घोषं न शृणुते यदा
मरणं तस्य देवेशि षण्मासेन विनिर्दिशेत् २८४
घोषं द्रुततरिकवादानुकारं न शृणोति तदनोऽस्य चीरवाणा-
व्यप्राप्तिकार्यचिञ्चिनीतुल्यं शब्दं शृणोत्येव ।
यदा तु तमपि —
'घोषमध्ये परं शब्दं चीरवाचिञ्चिनीरवम्
मासमेकं स जीवेत्तु न शृणोति यदा प्रिये, २८५
कर्णरन्ध्रकृतांगुष्ठ इत्यनुवर्तते ।
प्रसंगादन्यदप्याह —
'उत्पादं चैव कालं च मृत्युभेदं च मे शृणु,
तत्र —
'संक्रान्तिपञ्चकं प्राणे मुखरन्ध्रे वहेद्यदा २८६
तमुत्पादं वदेद्योगं,
प्राणस्य स्वस्थानान्नासापथादुत्पादनादयमुत्पादः ।
यदाह —
'स्थानात्स्थानान्तरं व्रजेत्,
अतश्चेडगपिङ्गलतत्पथुक्तोऽपि स्थानात्स्थानान्तरमुक्रा-
न्तपद्मवद्भ्रमतीत्यप्यत्रार्थः ।
किञ्चेदृशोत्पादवतः —
'वित्तनाशः तथोद्वेगो रोगवृद्धिश्च जायते २८७
सुहृद्दुहविनाशश्च तेजोहानिश्च जायते,
कालमाह —
'दक्षिणे पुट एकस्मिन्दक्षिणायनवर्जिते २८८
संक्रान्त्येकवाहेन कालयोगो भवेद्धि सः,
दक्षिणायनेन वामपुटवाहेन वर्जिते मध्यमध्ये तद्रहिते ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

एवं वामेदक्षत्रिंशन्मासान्तरोदयेति मृत्युयोगे तदुक्तिरू-
रूपं वक्ष्यति तदिहापि सम्बन्धमिति सूचयति दक्षिणोदये प्रा-
प्त्यभावाद्वर्जनानुपपत्तेः। अतश्च वामनाडीनिमीलनेन दक्षिणो-
दयाद्वाम एव कालः।

अतश्च —

भगन्दरोऽतिसारश्च नेत्ररोगश्च कामला १८९
शूलं विस्फोटिकादुःखमुरोदोषा भवन्ति च

भगन्दरः पायुरोगः, अतिसारः सशूलोऽतीसारः, नेत्ररोगस्तिमिरादयः, विस्फोटिका पिटिका उरोदोषा उरःस्तनाद्याः।

वामकालमुक्त्वा दक्षिणकालमाह —

वामनासापुटेनैव सङ्क्रान्तौ च त्रयोदश १९०

यदि प्राणो वहेत्तदा दक्षिणनाडीनिमीलनादयमपि कालः।

ततोऽस्मात् —

ज्वरः शिरोऽतिशूलं च अर्शांसि स्तम्भ एव च
मूत्रकृच्छ्रं प्रमेहश्च पाण्डुरोगश्च जायते १९१

प्रमेहः शुक्रादिप्रस्रावः।

तदित्थं प्राणः —

इडास्थं सुषुम्णा व्याधिं प्रकोपयति सुव्रते

व्याधिमिति ज्वरादिपाण्डुरोगान्तमस्य व्याधिम्।

ज्ञानस्योदयकालं निरूपयति —

यस्मिंश्चारे निरुध्येत तत्कालदिवसे परे १९२
व्याधिभिः पीड्यते सर्वैर्वामयामेतरेतरे

यामे तदितरस्मिन्दक्षिणे च वामयोगः इतरत्र च सूत्रे उक्तादौ यत्र वारकाले रुध्यते ततः परत्र दिवसे तत्काल एव उक्तव्याधिभिः पीड्यत इत्यर्थः।

एवमुत्पातकालौ द्वौ निर्णीय मृत्युयोगमध्याहृत्य प्रसङ्गान्नासापुटभागस्पर्शं शुभादिलक्षणं निरूपयति —

अथान्यत्स्पर्शविज्ञानं नासाधस्तात्तथोपरि १९३

वक्ष्यामीति शेषः।

पं ३ ख० पु० वहुतानुपपत्ते रिति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तत्र —

ऊर्ध्वेन स्फुरतश्चोर्ध्वं तयोर्वा: प्राश्चोदिता:

स्फुरिति शेषः ऊर्ध्वेनेति ऊर्ध्ववाहिना प्राणेनोर्ध्वमि-
ति नासायाः अत्र च दक्षिणेनोत्तरस्यां संचरणे

ऊर्ध्वेनाप्यथ स्यात् —

ग्रामाक्रोशाभिभवनं दक्षिणेन वहेद्यदा १९४

दक्षिणेन स्फुरेदिति पाठे पूर्वेण संदेहाभावतया व्या-
ख्येयम् ।

किञ्च —

मध्ये मध्यपुटस्पर्शी पराभिभवनं व्रजेत्

मध्य इति सर्वपार्श्वस्पर्शवर्जी मध्यपुटो मध्यदेशगतस्प-
र्शी च ।

किञ्च —

उत्क्षिप्तश्च बहुधा सङ्क्रान्त्येकां वहेद्यदा १९५
पूजनं बहुमानं लाभस्तत्र भवेत्तदा

सङ्क्रान्तिगतानि नव प्राणगतानि उत्क्षिप्तश्चेति वाम-
दक्षिणवाहयोर्यदि पर्यायेण बहुशो वहेत् प्राणस्तदा
पूजादिकं भवति । यत्तु कश्चिद्यदेत्यत्र नदेति पठित्वा
पूर्वेण पराभिभवेन फलेन श्लोकार्धं योजितवान्
पूजनं बहुत्वर्थं चोत्तरश्लोकेन तदसारत्वादुपेक्ष्य-
म् ।

किञ्च —

मन्त्रचारे तु कुम्भाख्यां प्राणाहंसो वहेद्यदा १९६
फलाभो धर्मिमेवं भवेत्तत्र प्रियागमः

कुम्भाख्यामिति मध्यमार्गे स्थस्तत एव यदा वहेदि-
ति यावत्तिष्ठत् न तु यथा इडापिङ्गलाकारेण याहतं नासापुट-
मध्य इति ।

एवं प्रासङ्गिकमुक्त्वा वशिष्टं कालयोगं निरूपयितुमाह —

वामदक्षेण तु सङ्क्रान्तौ वहेद्दिवसत्रैकमः १९७
तदेकवत्सरे लोके मरणं तु समादिशेत्
दक्षिणसङ्क्रान्तिरेकैका मास एको वहेत्तदा १९८

न/ दिवसमेति नक्षत्रो निपीन इति प्रयोगदर्शनाद दक्षिणवत्स्यन्तस्य
नयवचनान्नीया तेन वामदक्षिणयोर्गुणपदवस्थित्या यदि वार
७ प्रसङ्क्रान्तिः समनन्तरवत्समाशान्तिशान्त्याणाचारात्मकैकै-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सङ्क्रान्तिकलनया षष्ठ्यधिकत्रिंशतिशतात्मिकां नवशतिकं स्वाभाविकं वाह्यमपास्यैकत्र कृत्यैकपञ्चकेन वहेत्तदा मासेन मरणं सूचयति, एवैका तु सङ्क्रान्तिर्यदि दृसे दित्यैकादशदशादिसङ्क्रान्तीर्वा वहेत्तदा नौवधिकीसेमिरणं यावत्स्वाभाविकनवशतिकविश्ववद्वाहोल्लङ्घने षष्ठ्येकां त्रिंशत्प्राणाचारात्मिकां सङ्क्रान्तिं वहेत्तदा मा षष्ठेन मरणं निश्चयं पूर्व शतानि नवषे दंत एवैकां वहेदिति यत्सङ्क्रान्तेर्मीनयुक्तं तदेवोत्पादकाकायोगसङ्क्रान्तीनां दक्षिणार्धनवर्त्तिन इत्यभिधानादिति निर्णीतम् ।

मृत्युयोगे त्वन्यदप्याह –

सङ्क्रान्त्येकां वरारोहे त्रिंशत्प्राणात्मिकां यदा

प्राणायामं वाहस्यादौ रात्रौ तेनैव तावता त्रिंशता इह सङ्क्रान्तिमित्यन्वयः ।

इत्यपीह तद्वैव सङ्क्रान्तिर्यदि स्वाभाविकं विश्ववद्वाह्यमपास्य तत्स्थाने –

दिने दिने वहेद्वाहे यावत्त्रिंशद्दिनानि तु १९९

तदा –

मासान्ते तु भवेन्मृत्युः सत्य एव वरानने

तदित्थं –

मृत्युयोगः समाख्यातो मया ते वरवर्णिनि २००

अत्रापि पूर्ववत्परीक्षाकालात्प्रभृति प्रोक्ताशुभसूचककालगणना कार्येत्याह –

वर्षं मासं तथा पक्षं तिथिं वेलां यदाभ्यसेत्

यत्कालात्तु समारभ्य तत्कालं तु समादिशेत् २०१

यत्कालादभ्यसेद्वा परीक्षितुमुपक्रमते ततः कालादारभ्य वर्षमासादि मरणादिसूचकं यत्रैकपञ्चमेण स्वात्मनः परस्य वा कथयेदित्यर्थः ।

तदीदृशमेवंविधं शुभाशुभसूचकं –

इडासुषुम्णामार्गेण प्राणचारं विदुर्बुधाः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सावधाना एव योगिनो यथा जानीयुः । तत्रान्य इत्यर्थः
इडा सुषुम्णे पिङ्गलां विषुवं चोपलक्षयतः ।

उपसंहरति –

दक्षिणायनजे काले एवं ते कथितं शुभम् १०२

दक्षिणायनजः कालो वामनुत्पादः एतदपि पूर्ववदु-
पलक्षणपरमेव ।

यदर्थमिदमुक्तं तदुपसंहरति –

एवं शरीरजे काले शुभं चाशुभमेव च
ज्ञात्वा योगी जयेन्मृत्युमशुभान्यपरोधतः १०३

स्वस्य परस्य वा ।

कथमित्याह –

ध्यात्वा कालेश्वरं सूक्ष्मं हंसं वा सकलेश्वरम्

कालस्य स्थूलसूक्ष्मादिभेदभिन्नस्य बाह्यान्तरादिरूपस्य स-
ईश्वरं यथारुचि निर्भासकं हंसं वा ध्यानपरनिष्कलस्वरू-
पं श्रीसूक्ष्मं सकलस्य जगतः ईश्वरं ध्यात्वा तत्प्रविश्य त-
तया स्फुटीकृत्य योगी मृत्युं जयेदिति पूर्वेण सङ्गतिः ।

अन्यस्थोऽसौ कीदृगवस्थ इत्याह –

नासिकारन्ध्रमार्गस्थः सृजेत्संहरेज्जगत् १०४
तत्रस्थः कलयेत्सर्वं सर्वभूतेष्ववस्थितः

यः सर्वभूतेषु स्थावरजङ्गमरूपेषु –

नादाख्यं परं बीजं सर्वभूतेष्ववस्थितमिति त-
न्त्रान्तरेऽत्रोक्तत्वादवस्थितः । न तत्र कौटिल्येन गच्छती-
ति नासिका मध्यगतिकाद्रन्ध्रमार्गे सौषुम्णाधामनि स्थि-
तो यथोक्तावरोहक्रमेण प्राणरूपतां प्राप्य नासाया र-
न्ध्रमार्गेषु चक्षुरादिषु निरभूमिषु स्थितः सम्यगेव निमे
षोन्मेषतया बाह्यान्तररूपं जगत्सृजेत्संहरेच्च । यतस्तत्रस्थः
सन्सर्वं कलयेदन्तरवस्थिते बहिः क्षिपेद्विरामासितं या-
तः क्षिपेत् । अपि च कलयेत्तत्तद्देहे विष्णो वा स्थापयेत्

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

जानीयात् यतामृतेशः कलनैः तेषस्पृष्टानगतित्वार्थी-
त्वात् ।

तेनेदृशं स्वच्छन्दनाथं कालेश्वरम् -
तमेव ध्यात्वा जपेन्मन्त्रं

मध्यधाम्नः प्रभृत्यपरपरन्ध्रयावस्थावस्थितं परत्वेनत्व
विमर्शसारमकालकलितं ध्यात्वेति स्वात्मरूपत्वेन प्रत्य-
भिज्ञाय तदवष्टम्भेनावस्थितः मन्त्रं जपन्नेव ।

यतः -

नाकालस्थं कलेत्प्रभुः २०५

अकालं कालातीतं परमेश्वरात्मनि यस्तिष्ठति तदभेद
न स्फुरति तं प्रभुः परमेश्वरो न कलयेत्स्वात्मनि विकार
रोधात् ।

यदि चाचैव पदे योगीन्द्रः सततावहितो भव-
ति तदास्य -

ध्यानयुक्तस्य षण्मासात्त्रैकाल्यं प्रवर्तते
कालत्रयं विजानाति कालयुक्तस्तु योगवित् २०६

परस्वच्छन्दस्वरूपसमावेशरसेन धीसन्तानो तर्जना-
त्वा षाण्मासिकान्तरं कालत्र्यादि शिवान्तं जानाति यदा तु
तत्समावेशरसाकुलित एव काले प्रयाचारे युक्तोऽवहि-
तो भवति तदातीतवर्तमानानागतं सर्वं जानाति योगिवरः ।

किं च -

कालहंसं तु जपन्ध्यायन्वापि महेश्वरि
स भवेत्कालरूपी वै स्वच्छन्दः कालवच्चरेत् २०७
हतमृत्युजरो त्यक्तो रोगैः सर्वभयोज्झितः

कर्णनिलीनो यः परनिष्कलभट्टारकात्मा हंसः स एव
निलीनतत्ताननसमादानधर्मतया विश्वं कलयन्कालहंस इत्यु-
क्तस्तं जपन्ध्यायन्वेति पञ्चप्रणवाधिकारयोजना ग्रन्थो
तत/ तोयादिविन्नचतया श्रेयो भवत्यभिज्ञाभित्तिपरत्वेन यत्कुल योजनिका
भट्टारकस्वभावाचारवर्तिनेन जपन्तु कालरूपीत्यशेषविश्वक-
लनात्मकं कालरूपं प्रशस्तं विद्यते यस्य श्रीस्वच्छन्दभट्टा-
रक एवासौ स्यात्तदेव च चिरतत्परतेव पञ्चविधकृत्यका

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शिवया प्रसरेत् योगैरेतैस्त्रिभिः समं वद्ध्रुवं तेनोज्झितः ।

किंचास्य—

विज्ञानं श्रवणं दूरान्मननं चावलोकनम् २०८

सर्वैश्वर्यगुणं व्याप्तिर्भवेत्कालजयात्मता ।

दूरादिति सर्वत्र योज्यं विज्ञानं बुद्धेर्मननं मनसो व्यापारः अवलोकनं चक्षुषः एतच्च सर्वान्तर्बहिष्करणव्यापारोपलक्षणम् ॥

तदेवं सर्वरन्ध्रव्यापकदेशकालातीतसच्चिदानन्दस्वात्मकहंसस्वरूपताव्याप्तौ प्राणेन्द्रियादिसम्पन्नानामुत्पन्नस्य परतन्त्रत्वमेव तदाश्रयणात्तु मृत्युंजयमिति विषयज्ञानानैश्वर्याद्यभावोऽपीति हि त्रिवृत्त्वमिति दक्षिणवामसमध्यवाहेषु क्रमेण हंसध्याने तदुचितं मृत्युंजयमादिशति ।

दक्षनामाण्डे ध्यात्वा ब्रह्मैश्वर्यमवाप्नुयात् २०९॥
तदायुस्तत्समं वीर्यं भूतकालं च वेत्त्यतः ।
भविष्यन्तो भवेद्वामे विष्णुतुल्यो भवेच्च सः २१०॥
तत्समं चैतदैश्वर्यं तदायुर्योगिराड्भवेत् ।
भूतं भव्यं भविष्यं च सर्वं जानाति मध्यतः २११॥
नित्यं वै ज्ञानयोगेन रुद्रस्य समतां व्रजेत् ।
आयुषा बलवीर्येण ह्यैश्वर्येण तत्समः २१२॥
ब्रह्मणः परभावेन ऐश्वर्यं परमाप्नुयात् ।
विष्णोः सदाप्यैश्वर्यं परभावादवाप्नुयात् २१३॥
रुद्रस्य यः परो भावो ध्यात्वा तं तु शिवो भवेत् ।

सं० ४ दि० सद्रूपात्मता

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

इह ब्रह्मेशौ च दक्षे वामे विष्णुसदाशिवौ मध्ये ह-
द्रीशौ प्रोक्ताविति नाडित्रये एव षट्चक्रस्यावस्थितिः । एत-
त्प्रभेदेन षट्चक्रता तेन दक्षवामता । किंतु यदि हंसं ब्रह्मादि-
षट्कतद्रूपमपरया धारणया ध्यायन्विहरति तदा तद्बलवी-
र्यैश्वर्यभोगी भवति अतीतभाविवर्तमानरूपत्रैकालिकं विश्वं
जानाति । अत्र च ब्रह्मादीननया धारणया ईश्वरसदाशिवान्त
स्वरूपान्ध्यात्वा तद्रूपतां लभते ।

उपसंहरति —

एवं मृत्युजयः ख्यातः

अथ —

स्वरूपं ध्यायतो जयः २१४

मृत्योरेवेति शेषः ।

कथमित्याह —

नाडीभिर्नालरन्ध्रस्थं हृत्पद्मं षोडशच्छदम्
ध्यात्वा सितं तु विकचं कलाषोडशकान्वितम् २१५
सम्पूर्णावयवं चन्द्रं कर्णिकाकारविग्रहम्
तन्मध्ये चिन्त्यमात्मानं शुद्धस्फटिकनिर्मलम् २१६
क्षीरामृतार्णवावस्थकल्लोलामृतपूरितम्
उपरिष्टाद्द्वितीयाब्जं शाकामृतमहोदधौ २१७
तन्मध्ये शुक्लपद्मं तु परिपूर्णेन्दुकर्णिकम्
तन्मध्ये चिन्तयेद्धंसमधो बिन्दुशिखान्वितम् २१८
वर्धन्तमहनं दिव्यं समन्तात्तं विचिन्तयेत्
आत्मोर्ध्वरन्ध्रमार्गेण प्रविष्टं तं विचिन्तयेत् २१९
सितं शुक्लतुलं सान्द्रमच्छं मृत्युनाशनम्
तेनाप्लावितमात्मानं पूर्णमात्रं विचिन्तयेत् २२०
पद्मनालनिबद्धैश्च नाडीरन्ध्रमुखैः सदा
अमृतापूरितं देहं सर्वमेव विचिन्तयेत् २२१
एवं वै नित्ययुक्तात्मा अमृतेशसमो भवेत्
व्याधीन्मृत्युं जरां त्यक्त्वा क्रीडते वशिमादिभिः २२२
एवं तस्यामृतध्यानात्कालमृत्युजयो भवेत्

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

द्वादशान्तोर्ध्वाधः स्थितं श्रीदेवीमुक्तामुक्तादिरेचनावाख्या-
काराद्विवलीषोडशकलितनादचन्द्रबिन्दुशिरसितं सितकमलमध्य-
स्थमधःकमलकर्णिकापूर्णेन्दुत्रिभुवनेशं ऊर्ध्वकर्णिकापूर्णे-
न्दुमध्यस्याधोमुखसितचतुष्कुलविद्युत्प्रकाशप्रसरत्सुधारसप्लु-
रितं ब्रह्मरन्ध्रविसृतकल्लोलप्लावितमसृणराशिमध्यगतात्मानं
स्फटिकप्रभं विचिन्त्य तदमृतं तदधः स्थं सिताब्जनालरन्ध्रना-
नानाडीमुखैः उत्कलन्तमस्तदेहव्यापकं यः षण्मासान्त-
तं चिन्तयति स गतव्याधिजरामरणोऽणिमादिसिद्धिभागमृते
शभैरवतुल्यो भवति, इतिदिग्पार्थः, नाडिरूपतया भिद्यन्ते
नानारूपत्वेन स्फुरन्ति यानि नालरन्ध्राणि पद्मादधोऽग्रगतानि
तत्स्थमिति तैरन्यस्थानगतैः सम्बद्धं, नालमत्र मध्यनाडी
रूपं क्षीरं क्षीरोदाद्युद्भूतममृतं तद्रूपोऽपीव इति तट्टनिः। स्पष्ट-
तं चात्र परशक्तयानन्तोरम्।

एवं सर्वनाडीमार्गत्रयाग्रपरहंसध्यानादमृतध्या-
नाच्च मृत्युञ्जयमभिधाय नाविकमनुत्तरसाररूपमादेहमुपक्र-
मते।

अथवा परतत्त्वस्थः सर्वकालेन जायते २२३

अथवेत्यनेनेदं ध्वनति कतिपयकालशरीरस्थैर्यादि मृत्यु-
जयप्रकारेभ्योऽयमन्य एवातिविरसमहायोगीन्द्रहृदयङ्गम-
स्त्वकारो यत्र देहावस्थित एव श्रीस्वच्छन्दभैरवतां सर्वदैव
समाविशति कोऽप्यपश्चिमजन्मा जन इति।

तत्र यादृशपरं तत्त्वं यथा च तन्मयीभावस्तदा
देशमाह-

चिन्तयेत्परमं तत्त्वं कालचारविवर्जितम्

कलाकलङ्कनिर्मुक्तं निष्कलं परमं पदम् २२४

चिन्तयेत्स्वाभेदेन, विशेषात्परं तत्त्वं द्वादशान्तस्फुरितं
चिदानन्दघनात्मकं कालचारेण बोध्येनानन्तेन वर्जि-
तं कला-

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

कलङ्केन कल्पनामलेन शून्यमत एव चतुष्कलवदकारादि
कलायोगाभावान्निष्कलं परमं परमनुत्तरं धाम ।

न केवलं परमं धामेत्युच्यात्तु –

'निष्कलं चात्मतत्त्वं तु ,

आत्मतत्त्वं समनोपरि शुद्धात्म निष्कलं त्यक्तसमना
न्तभेदकल्पनम् ।

यतः –

'कलङ्को देह उच्यते

संयुक्तः करणैः षड्भिः सर्वतत्त्वसमन्वितः २२५
वर्णो बिन्दुस्तथा नादो व्यापिनीशक्तिसंयुतः
समनावधिपर्यन्तः कलङ्कस्तथ उच्यते, २२६

एतदुक्तं भवति यथायं स्थूलतत्त्वादिरूपो देहः कल
ङ्कः तथा करणाश्रयः प्राणात्मा सूक्ष्मः समनान्तमात्म
मेयरूपः परोऽपि देहः कलङ्क एव, परमेयरूपो हि परत्वा
द्यावमात्मनि यथा स्थूलदृष्ट्या देहप्राणादिधियः कलङ्कः
तथा परदृष्ट्या समनान्ता प्रमेयमाला कलङ्क एव वर्णोङ्का
र उकारो मकारश्च कलङ्करूपश्चासावाधार इति समासः
कलङ्कत्वं चास्य सर्वस्य परमितत्वमेव प्रथनात् ।

यस्य चायमाधारः सः –

आधेयः परमो ह्यात्मा

यः पूर्वं शुद्धविज्ञानकेवलो भेदवादिनां मोक्षभूरित्यु
क्तः ।

अथ –

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तत्परा ह्युन्मना स्मृता
तस्याश्चान्ते परं तत्त्वं सकलाकलवर्जितम् २२७
व्यापकं सर्वतोभद्रं सर्वान्तः सर्वतोऽन्तरम्
पञ्चपञ्चकतत्त्वस्य महादशगुणान्वितम् २२८

सकलः समनान्तः साकारः अकलः शुद्धात्मा ताभ्यां वर्जितं तयोः परस्पर[illegible]देन सङ्गविनत्वात् तत्तु व्यापकं दिक्कालासङ्गवितं सर्वतश्च भद्रं चिदानन्दघनं सर्वस्य चान्तर्गतं जीवितभूतत्वेन स्थितं वृत्तिपरमध्यकोटिमध्यगतं च सर्वतः सर्वेषां गुरुत्वमेव ज्ञानप्रत्यभिज्ञारूपं पञ्च पञ्चकानि तथा तच्चान्यद्दशगुणांश्च स्वरूपमेव व्याख्यास्यते पञ्चपञ्चकेषु तत्त्वेषु च स्थितं तदभिन्नस्य मूर्त्तिगुणेषु चान्वितं अनुगततया स्थितम् ।

तदित्थं भूतमेतत् –

यदास्मिंस्तु परं वेत्ति तदा मुच्येत बन्धनात्

कलङ्को देह उच्यते इत्युपक्रान्तत्वादस्मिन्देहमात्रावशेषे एव स्थितो यदुक्तरूपं परं तत्त्वं वेत्ति तदा बन्धनान्मुच्यत एव जीवन्नेव स्वानुभवेन परमेश्वरतामाविशतीत्यर्थः ।

अथ पञ्चपञ्चकं दर्शयति –

कारणानि च मन्त्राश्च निवृत्याद्याः कलास्तथा
बिन्दुश्चैवार्धचन्द्रश्च निरोधी नाद ऊर्ध्वगः
शक्तिश्च व्यापिनी चैव समनात्मा तथोन्मना २३०
पञ्चपञ्चकमेतद्धि कथितं ते वरानने

कारणानि ब्रह्मादीनि षट् मन्त्रा इति अकारोकारमकाराः ब्रह्मविष्णुरुद्रवाचकास्त्रयः बिन्दुनादशक्तीनामीशसदाशिवशिववाचकानां सर्वमन्त्रसाधारणावि

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्वायम्भुवनान्तप्रमेयदशकमध्ये कथनात्। अतो मन्त्रशब्देन साधारणप्रमेयदशकावशिष्टा असाधारणा एव प्रोक्ताः। तथा च वक्ष्यति "मन्त्रैकादशिकावर्णश्चतुर्थी" इत्येन दश ब्रह्मादिकारणाधिष्ठिताश्च निवृत्त्याद्याः कलाः पञ्च प्राग्व्याख्याताः तत्त्वं च बिन्द्वादिप्रमेयदशकमित्येतत्पञ्चदशकम्।

तत्त्वान्याह —

तत्त्वान्येव तु षट्त्रिंशत्

पृथिव्यादीनि षट्त्रिंशत्पूर्वमेवोक्तानि अत्र सर्वत्र परतत्त्वभेदेन स्थितमिति सर्वैरस्य सम्बन्धः।

अथ

गुणांश्चैव निबोध मे २३१

गुणाः परमेश्वरस्य गृहीतमायाप्रमातृधर्मिकस्य परापरदशोचित्येनावस्थिता धर्माः शक्तयः।

तानाह —

अहङ्कारो धीर्मनश्च इन्द्रियार्थास्तथैव च

ग्रहणं स्पर्श आधारः शक्तिश्चैवाष्टमी स्मृता २३२

एते चाष्टौ गुणाः

अन्तःकरणत्रयमिन्द्रियार्थसन्निकर्षो वर्णश्चतुर्थः ग्रहणं च तद्विषयज्ञानं स्पर्श आन्तरसुखाद्युपलम्भः आधारः शरीरं शक्तिर्ज्ञानक्रियात्मा प्रवृत्तश्चेत्येवमपररूपस्यात्मनो धर्माः शक्तयः। यतो यत्किञ्चित्प्रकाशते विषयशरीरादि तत्प्रकाशरूपत्वेनादभिन्नमन्यथास्य प्रकाशनायोगादित्यस्य धर्मरूपमेव सर्वमस्यैव परं चाष्टिमाविष्टस्य

अष्टौ भैरवा भैरवाष्टकम्

ये पूर्वं कपालीशादयोऽष्टौ भैरवा उक्तास्तदात्मनः परमात्मा भैरवस्य सनाष्टकं गुणानामित्यर्थः।

किं चास्य —

प्राणहंसकला शक्तिः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अपरपरावस्थायाः क्रमेण धर्मीः यथाहि परमेश्वरः स्वा तन्त्र्याद्भुलीनात्मभूमिरूपा तदीयस्वातन्त्र्यात्माधि शक्तिः सङ्कुचितत्वया भान्ती प्राण इत्युक्तप्रायम् ।

तदित्थं –

पुनः स्रष्टादृश त्रिके २३३

अन्यच्च –

एतेषु तत्त्वं तत्त्वोच्चारलक्षणादृते

उच्चारः शरतत्त्वाद्यर्द्धं मन्त्रोदीरणं आलम्बनं ध्यानाद्याश्रयणं तद्विना एतेषु सर्वेषु भेदाभेदेन स्थितमिति शिवः उपायाभिमतानामपि स्वप्रकाशचिद्वैचित्र्येकेन प्रकाशनात् । तदुक्तमस्मत्परमगुरुपादैः

उपायजालं न शिवं प्रकाशयेत् –
घटेन किं भाति सहस्रदीधितिः
विवेचयन्नित्थमुदारदर्शनः
स्वयंप्रकाशं शिवमाविशेत्क्षणात् इति ।

तदेव विशिनष्टि –

अक्षरातीतनिर्वृत्तं परं तत्त्वमनक्षरम् २३४

अक्षरेणाविमलेन जीवात्मना रूपेण आसमन्तात्सर्वेषु तेषु निर्वृत्तं परचिन्मात्रमित्यर्थः अथवाक्षरैर्वर्णैरक्षरैः तत्सम्बन्धिभिर्वाच्यैरकारैर्निर्वृत्तं मकारोकारादिवाचकमन्त्रशक्त्या तद्वाच्यरूपं न भवतीत्यर्थः उक्तं चैतत् ।

यतः –

अक्षरेषु ज्ञानं मोक्ष आकाशे ब्रह्म गतः

सत्यतत्त्वासम्भाव्यमेतद्धूत्स्थानप्रयत्नाद्युच्चार्यत्वात्सोपाधिषु मन्त्रादि स्वरूपेष्वक्षरेष्वक्षरत्वं निरुपाधि चिद्घनतत्त्वसमावेशात्मा मोक्षो भवतीति परं तत्त्वस्य यतिनूहाक्यरूपत्वाभावात् । उक्तं चैतत्प्राक् तस्य वर्णः शरीरं च नास्ति वर्णः क्रिया तथा इति किञ्चाक्षरेषु भिन्नेषु वस्तुषु मुक्तात्मस्विष्यमाणेषु ज्ञानं मोक्षो न आत्मोपासका इत्यभिहितत्वात् ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अत एव—

यावदुच्चारयेत् वाचं यावल्लेखेऽपि तिष्ठति २३५

तावत्स सकलो ज्ञेयो निष्कलो भेदवर्जितः

पश्यन्तीपर्यन्ताभिर्वाग्भिः तद्वाच्यमालम्बनतदाकारादिक लाकल्पात्मत्वः सकल एव भवति लिपिध्यानक्रमेऽप्याद्या यादि ऊर्ध्वन्तर्यष्टा ज्येष्ठा रौद्री वामाख्यलिपिकलायोगाद् पि सकल एव यस्तु सर्वभेदप्रत्यस्तमयात्मप्रकाशानाहत परामर्शमयः स निष्कलः। एतच्च वितत्य पञ्चप्रणवा धिकारादौ निर्णीतं। उक्तं च विज्ञानभट्टारके न हि वर्णविभेदेन देहभेदेन वा भवेत् परत्वं निष्कलत्वेन सकलत्वेन तद्भवेत् ।

अतश्चायं —

सृष्टिसंहारनिर्मुक्तः क्रियाकालविवर्जितः २३६

नायं मन्त्रान्तरवदुत्पद्यते संह्रियते वा नाप्यस्योच्चार ध्यानादिक्रियाकालोऽस्ति। यथोक्तं नास्योच्चारयिता कश्चिदित्यादि ।

एतद्व्यनक्ति —

अधश्चारे भवेत्सृष्टिरूर्ध्वे संहार उच्यते

अधश्चारेण जातोऽसौ ऊर्ध्वे चैव हतो भवेत् २३७

सृजनं हननं त्यक्त्वा तिष्ठेद्वै तत्त्वदर्शितः

अधश्चारोऽपानः ऊर्ध्वचारस्तु प्राणः सृष्टिसंहार इति विविधस्य देहस्य प्रमातुः अस्ताविति देहप्रमाता, इत्थं प्रति मुहुः जननमरणकारित्वमयः। यदा तु देहप्रमातृ ताभिमानं प्रशमय्य सत्यां चित्प्रमातृतामवलम्बते तदा दलकल्पदेहप्राणादिपरवर्त्यपि अयं चिदामोदसुन्दर दर्शितः स्थित एवेति का जननमरणादिसंभावनापी ति। इत्यमेतद्व्याकार्यम् न तु प्राणापानप्रशमपदे सत तमवस्थापनाभिमात योगिनां व्युत्थानदशासम्भवेन तत्र सततावस्थानाघटनात्। एतदुक्तं तत्परं तत्त्वदर्शिलक्ष

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

नादुक्ते इत्युक्तेन वक्ष्यमाणेन च ग्रन्थेन विरोधापत्तेः। यदि चाभियुक्ते प्राणापानप्रशमपदनिभालनं तत्त्वइत्यनुभवे भवत्युपायस्तथापि तदुपायपूर्वं सर्वदा सर्वत्र व्याप्य सर्वत्र चिदानन्दघनपरमशिवतामयतत्त्वज्ञानमेव तत्त्वइत्यवस्थितत्वम्। वक्ष्यति सर्वं शिवमयं स्मरेदित्यादि।

तदित्यभिदं —

तत्त्वज्ञप्तिश्च व्याख्याता सर्वबाधाविवर्जिता २३८

यद्विधस्याध्वनः पारमार्थिकसत्तया चिन्मयापरिज्ञातत्वेन नास्तुपद्धतिं व्यतिरेकाभावे विशेषेण व्याप्ता तत्र तत्र शास्त्रनिराकारावधूतनिर्मिथ्यीदस्तौरक्तामहासत्तासमापत्तिसमावेशादिशब्दवद्भूतत्वात्।

अतश्च —

तत्त्वाध्यधर्मनिर्मुक्तः कारणैश्च विवर्जितः
तत्त्वे स्थितो स्थितो योगी सर्वारम्भविवर्जितः २३९
रागद्वेषविनिर्मुक्तो विषादानन्दवर्जितः
न काङ्क्षेन्न च निन्देत विषयांश्च कदा च न
समः शत्रौ च मित्रे च ब्राह्मणे श्वपचे समः २४०
तुल्यदर्शी भवेन्नित्यं सर्वं शिवमयं स्मरेत्

तत्त्वादिभिः शरीरावस्थितोऽस्यादतावच्छिद्यते इत्यर्थः अत एव चायं चित्समापन्नत्वात्सर्वैरारम्भैर्हेयोपादेयविषयादिभिः वस्तुष्वपि विशेषेणाभिनिवेशात्मना वर्जितः यतस्तस्य इष्टानिष्टहेतुभ्यां रागद्वेषदोषाभ्यां रहितस्तद्वदितत्वमप्यस्य विषयसङ्गसम्पाद्यविषादानन्दविरहाद त एवास्याकाङ्क्षाद्यभावो यथोपनतमात्रभोगनिवारकत्वान्नास्य शत्रुमित्रब्राह्मणश्वपचेषूपकार्युपकारिषु शुभाशुचित्वादिधीस्तुल्यत्वेनासौ सर्वं पश्यति केवलं न तु लोकमध्यस्थो लोकस्य स्थितिभङ्गमुत्पादयेत्। इदं च स मुख्यं तत्त्वं यत्सर्वं शिवत्वेन चिन्तयेत्। यदुक्तं श्रीविज्ञानभैरवे।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यत्र यत्राभितो याति तद्वै वाभ्यन्तरे प्रिये
तत्र तत् शिवावस्था व्यापकत्वात् यास्यति इति
तथा सर्वं इदं चिन्मयं हि जगद्वा परिभावयेदिति ॥
सर्वं शिवमयं स्मरेदिति उक्तं तत्र सर्वमध्ये यद्यप्यात्मा
प्रविष्टस्तथाप्यसावनादिशिवाद्भिन्न इति भेदवादिनां भ्रमो
मा भूदित्याह –
आत्मानं च तथैवैकं सर्वथैव सदा स्मरेत् २८१
तथैवैकमिति विश्वात्मकपरमशिवैक्येन ।
अतश्च –
सर्वतत्त्वानि भूतानि वर्णा मन्त्राश्च ये स्मृताः
नित्यं तस्य वशा ते वै शिवभावनयानया २८२
सर्वस्य शिवाभिन्नस्यात्मैक्येन दर्शनात् भूतानि च तु
ईशावर्णाः शब्दराशिशरीरस्थाः ।
ईदृङ्नात्र यतिनिवृत्तादेव –
न चासौ कुरुते पापं नैव पुण्यं च कुरुते
बुद्धिपूर्वं शुभमशुभं वा न किञ्चित्करोति ।
यतोऽसौ –
कृतकृत्यः प्रसन्नात्मा
कृतं निष्पन्नं कृत्यं परमेणात्मा शान्तसमापत्त्यात्मकं य
स्य प्रसन्नोऽमलोऽकलङ्कितः ।
अत एव –
कृत्यं चास्य न विद्यते २८३
च एवार्थो भिन्नक्रमः यतोऽस्य कृत्यं नैव विद्यते तेन
नवं पुण्यं पापं वा कुर्यात् ।
जीवन्नप्यसौ मुक्त इत्याह –
इह लोके परस्मिंश्च परिमुक्तस्तु सर्वदा
इहेति व्युत्थानाभिमतावस्थायामित्यर्थः ।
यदि बुद्धिपूर्वं धर्मादि नाचरति तत्प्रसादसम्पन्नं परोपका
रादिकमस्यार्थकं नेत्याह –

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

धर्माधर्मविनिर्मुक्तः

अभिसन्धिं विना कर्मणां बन्धकाभावात् ।

स्थूलशरीरार्जितमप्यस्य पुण्यादिकमावरकं नेत्याह —

पुण्यपापविवर्जितः २४४

प्रोक्तज्ञानाग्निना तयोर्भस्मीकृतत्वादित्यर्थः ।

अत एवेदृशस्य ज्ञानयोगिनः —

न चास्य भक्ष्याभक्ष्यं हि न पेयापेयमेव च
नापवित्रं हि तस्यास्ति न पवित्रं हि कुत्रचित् २४५
निरपेक्षो ह्यसौ नित्यं सर्वोपेक्षाविवर्जितः

सर्वस्य शिवैक्येन प्रतीतत्वात् । तदुक्तं श्रीविज्ञानभैरवे

किंचिज्ज्ञैर्या स्मृता शुद्धिः साशुद्धिः शम्भुदर्शने
न शुचिर्ह्यशुचिस्तस्मान्निर्विकल्पो भवेत्सदा

श्रीमदुच्छुष्मभैरवेऽपि —

यावन्न वेदका एते तावद्वेद्याः कथं प्रिये
वेदकं वेद्यमेकं तु तत्त्वं नास्त्यशुचिस्ततः इति ।

ईदृशस्य च —

नास्य क्षेत्रं नास्य तीर्थं नियमो यम एव च २४६

नियमो जटाभस्मादिपरिग्रहः परमेश्वरस्फारत्वस्य नास्य कश्चित्सङ्कोच इत्यर्थः । तदुक्तं श्री[illegible]ख्ये रहस्यशक्तिपादिन्यां द्वादशपटले नात्र शुद्धिर्न चाशुद्धिरित्यादिना महता ग्रन्थेन ।

एवंविधस्य योगिनो लोकोत्तरं क्षेत्रादि निरूपयति —

क्षेत्रं तस्य पराशक्तिर्यतः सर्वं प्रसूयते
तपोधाम्नो यतो देवि तत्रस्थाः प्रचरन्ति वै २४७
तीर्थं वै परं शाक्तं नित्यं चानन्दविग्रहम्
येन व्याप्तमिदं विश्वमनन्तं विश्वशक्तिभिः २४८
नित्यं विरक्तिः संसाराद्योगोऽयं परिकीर्तितः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

नियमो भावना नित्यं परमाद्वैतभावना २४९
देवं तदुच्यते यत्र देवताचक्रमध्यगः
तनुदभीह भ्राम्येतीत्यनेनास्य परयोगिनः २५०
पराद्वयमयाद्भुतश्रीदेवताचक्रमध्यगता पराशक्तिरे-
व सर्वप्रसवभूमिः सैवं तीर्थं सर्वमलघ्नं तदन्तस्तास्य
प्रशान्तभेदकल्लोलमानन्दरसमयं शिवपदापि परं सा-
तन्मयेश्वरशक्तिरचितं शक्तिमन्तं परमाद्वैतभावना त-
दभेदविमर्शमयी भावना तस्य नियमो भवतु ।

एव च योगी –

नात्मनो भावयेज्जातिं न कुलं न च नान्यथान्
देहात्मनो हि जात्यादिकलङ्कयोगो न चिदात्मनः ।

इत्युक्तेऽपि च –

आचेरत्सर्ववर्णीतं
सर्वेषां ब्राह्मणादिवर्णानां भावमाचरेत् । यस्य यादृ-
क्स्वलमाचारो वा तस्य तदेव ध्यायेत् ।

न चात्मनि वर्णाश्रमनियमं शङ्कीयादित्यनस्या-
ह –

न च वर्णेषु वर्तेत २५१

किन्तु –

परभावनया नित्यं परधर्मेण वर्तयेत्
वर्तेतेत्यर्थः ।

तामेव परधर्मवृत्तिं सामानाधिकरण्येनाऽस्य
दर्शयति –

सर्वज्ञः परितृप्तश्च परिपूर्णः स्वभावतः २५२
स्वतन्त्रोऽलुप्तसामर्थ्यस्त्वनादिनिधनाश्रितः
अनादिबोधो ह्यतुलः कालवेलाविवर्जितः २५३
चारोच्चारविनिर्मुक्तः स्वदोरनविवर्जितः
परिपूर्णोऽनन्तशक्तिः सर्वज्ञत्वादयः [illegible] एते गु-
णाः षड्गुणनिकायान्येषामभिधाकृता एव अतुल
इति वैविक्त्येनास्य स्मरणात् द्वितीयस्याभावात्को-

वर्तेत

[श्रि]

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

लवेलाविवर्जितः इति भिन्नयोगिवदस्य प्राणीयसुषुम्णां-
शकानिभालनानुप्रवेशादत एव चास्य प्राणवाहस्य
व उर्ध्वप्रेरणात्मा उच्चारः नोप्यस्यानुपपत्तेः । अतश्च
नित्यमेव शिवैकात्म्यभावनाविष्टत्वान्नास्य उपत्युपत्त
वहोरात्रोपयोगः कश्चित् ।

नाप्यस्य तत्त्वविभागोऽस्तीत्याह-

न दिवा जागरं यस्य न च रात्रौ स्वपनं पुनः २७४
स्वभावेनैव सन्तिष्ठेद्दिनरात्रिविवर्जितः

यथा लौकिको दिवा जागर्ति भेदव्यवहारमेव परिशी-
लयति निशायां मायायां स्वपिति न प्रबोधमेति तथाया-
रम् अपितु भेदनिद्र एव तथा मायया नाभिभूयते जाग्र-
नः स्वपतोऽपि चास्य न जागरस्वप्नौ यः सदा तुरीयप्रकाश
विशेषात् । यथोक्तम् ।

तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी
नित्यं स्यात्सुप्रबुद्धस्येति ।

श्रीस्पन्दे । तस्य परतत्त्वस्य सम्बन्धिन्युप-
लब्धिस्तन्मयः प्रकाशः सुप्रबुद्धस्य त्रिषु जाग्रदादिपदे-
षु सततमित्यादौ मध्येऽन्ते च नित्यमित्यवच्छेदेन भवती-
ति मयैवैतत् स्पन्दनिर्णये । व्याख्यातमेतत् ।

एतच्च यः-

एवं यो वर्तते योगी

सः-

परेशं समतां व्रजेत् २७५
न च तं कलयेत्कालः कल्पकोटिशतैरपि

अकालकलितपरमेश्वरैकरूपत्वात् ।

एतदेव स्पष्टयति-

जीवन्नेव विमुक्तोऽसौ यस्यैषा भावना सदा २७६
शिवे हि भाविते नित्यं

ततश्च तम् ।

न कालः कलयेत्किञ्चित्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शिवं शिवैकरूपं महायोगिनं कथं कालः कलयेत्।
अथास्य महायोगिज्ञानस्य सकलोपनिषदु-
पदेशं सारतमतामेतत्तन्त्रोपास्यदेवतां नामोपपदप्रद-
र्शनपूर्वं निरूपयति—

योगी स्वच्छन्दयोगेन स्वच्छन्दगतिचारिणा २१७
स स्वच्छन्दपदे युक्तः स्वच्छन्दसमतां व्रजेत्

योगोऽनन्तसर्वस्थित्यात्मना स्वात्मनिष्ठया स्वच्छन्द-
गत्या परं स्वरूपं योऽयं परतत्त्वैक्यप्रतीतिमयत्वात्
स्वच्छन्दशब्दवाच्यो महायोगः तेन श्रीस्वच्छन्दभैरवस्य
पदे धाम्नि युक्तोऽभिनिविष्टः स तत्साम्यमेति।

योगप्रकर्षात्तु—

स्वच्छन्दश्चैव स्वच्छन्दः स्वच्छन्दो विचरेत्सदा २१८

नित्यमादिमध्यान्तकोटिषु श्रीस्वच्छन्दभैरव एव
स्फुरन्स्थित इति यावत्।

स्वतं देहो भेदित्वारो नाडीचारजयात्स्फुटम्
अथ वा स जयादेवमन्त्यपीयूषबृंहितः
मन्त्री योगं विजानाति ज्ञात्वा सर्वततां व्रजेदिति

षडुपक्रान्तं तन्मध्ये नाडिचक्रवाहनिरूपणात् अन्य-
था वाह्यग्रुक्तोरिहतानन्तजयादि वहुप्रमेयव्यव-
हितं जानन्मत एतदुपसंहरन्नाउक्तमेयोन्नुवध्नाति—

एवं वै मन्त्रलिङ्गानि रिष्टान्यन्यानि यानि च
योगाज्जानाति योगीन्द्रो नादजातानि तानि च २१९
निर्जित्यैतानि योगेन एवमुक्तक्रमेण तु

एवमिति यथोक्तप्रकारं विमर्शात्मकानि यान्यन्या-
नि च कर्णरन्ध्रं स्थगयित्वा घोषं न शृणुते इत्यादीन्य-
रिष्टानि नादजातानि तान्युक्तानि च शब्दान्तयोगान्या-
टादीनि च तानि योगात्संतोरूपोऽग्रीवधानादेव योगी
जानाति। ज्ञात्वा च हंसध्यानामृतध्यानतत्त्वव्यव-
स्थानरूपेण परापरपरमयात्मना मृत्युजिता योगेन

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

निर्जित्य पुनरपि नाडीचारजयाद्भ्यासाद्योगी विजा-
नाति ज्ञात्वा च सर्वत्र व्रजेदिति सम्बन्धः ।

अथेदानीम् —

अयोगी यानि जानाति अयुक्तो वापि युञ्जते २६०
उत्कलिङ्गानि तान्यत्र अङ्गारिष्टानि मे शृणु

अयोगीत्यत्रायोगः अयुक्तोऽपि योगयाद्यष्टमा-
नो लौकिक एवेत्यर्थः ।

तान्याह —

शुक्तालोचकण्ठैर्दृश्यमाद्भूतरश्मयः २६१
स्नैन्यां च भङ्गमायातः षण्मासान्मृत्युमाप्नुयात्

षण्मासादिति केचिद्धि निमित्तं विना एतच्च सर्वत्र
योज्यम् ।

सुनीलं मण्डलं योऽग्निः पश्यति दिने दिने २६२
सितं हरितवर्णं च वत्सरार्धान्म्रियेत सः

षण्मासादित्येव मण्डलमिति सूर्यबिम्बस्य बाह्यपरि-
वेषो ।

शिरश्छिन्नं पश्यति रविं सोमं वै लक्षवर्जितम् २६३
नाराज्योत्स्नां च छायां वै पश्येत्षण्मासजीवितः

रविमण्डलान्तःस्थं बिम्बम् ।

हिरण्यवर्णं पुरुषं पिङ्गलं छायामेव च २६४
स्वप्ने संपश्यते यो वै षण्मासान्सोऽपि जीवति

षण्मासान्पित्रादिभ्यो पाभावादिति स्थितमेव ।

आत्मनो तु शिरश्छायां पश्येत्षण्मासजीवितः २६५

छायापुरुषपरीक्षायामित्यर्थात् ।

तैलाभ्यङ्गं तथा पादे रक्तचन्दनलेपनम्
रक्ताम्बराणि छायामानि स्वप्ने पश्यति वै यदा २६६
प्रेतैः पिशाचै-रक्षोभिः श्वगोमायुकसूकरैः
युक्तं यानं गृध्रकाकैर्महिषैस्तृणदर्भैः २६७

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अङ्गभङ्गस्तथाङ्गानां नग्नं चातीव विह्वलम्
स्वप्ने पश्यति यो वै च वर्षमेकं स जीवति २६८
अत्र यथायोगमात्मन आत्मानमिति च योज्यं एवमादि भीतमिति पाठान्तरेऽपीदमानम्।
शङ्खावर्ते भ्रुजामध्ये गुल्फयोर्मर्मसन्धिषु
स्तोकत्वं वयमायाति यस्यैतत्स्यान्तरं न हि २६९
शङ्खावर्ते ललाटकपालसन्धौ नेत्रप्रान्तस्थौ भ्रुजामध्ये मन्त्रस्थानमिति प्रसिद्धं मर्मसन्धयो धमन्यादयः सिराः।
किंच—
सोमार्कमण्डलं देहे ध्रुवं चैव त्वरुन्धतीम्
न पश्यति महायानं सोऽवश्यं म्रियते नरः २७०
एतानि प्रातिलोम्येन व्याचष्टे—
तालुरन्ध्रगतो धूमो महायानं तदुच्यते
जिह्वा त्वरुन्धतीत्युक्ता नासाग्रं ध्रुव उच्यते २७१
तालुरन्ध्रं ब्रह्मबिलं पश्चात्तत्स्थं तदुत्थां धूमलेखां छायां न पश्यति नासाग्रं त्रिकुटिकाप्रान्तः।
किं च—
नेत्रान्ते कज्जलाक्रान्ते मण्डलं सोमसूर्ययोः
वामदक्षिणनेत्रप्रान्ते यदा नखेन पीड्येते तदा ज्योतिर्दृश्यते तत्सोमसूर्ययोर्मण्डलम्।
तदेतत्सर्वम्—
न पश्येद्गगनेऽपि सोऽवश्यं म्रियते नरः २७२
ऋतुकालादनन्तरमेव वह्निहीनमाकाशगङ्गापथः अरुन्धती सप्तर्षिमध्यस्था ध्रुवश्चतुर्दशतारात्मकशिशुमारशरीरः सोमसूर्ययोर्मण्डलं बिम्बबाह्यः परिवेशः।
स्थूलोऽकस्माच्च जायेत अकस्माद्वै भवेत्कृशः
अतिक्रुद्धोऽतिभीतश्च वर्षमेकं स जीवति २७३
पुनः स्वप्नविषयमाह—
कृष्णाम्बरधरं कृष्णं लोहदण्डकरोद्यतम्
नरं चाभिमुखं स्वप्ने दृष्ट्वा मासत्रयायुषम् २७४

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

आत्मानं निश्चिनुयात् ।

हृदयं शुष्यते यस्य स्नानमात्रस्य तत्क्षणात्
गात्रं वैवर्ण्यतृष्णां च ऋतुमेकं स जीवति २७५
धनुर्निशि दिवा चोल्का यस्य विद्युत्प्रदर्शनम्
दिग्दाहो मुख्यदेशे च मासमेकं स जीवति

धनुरैन्द्रमनुष्ठे अन्यतमा दिग्दाहेऽपि यस्य दिग्दाहो भाति स मासं जीवति धनुर्निशि दिवा चोल्कादर्शनम् ।

चक्षुषी स्रवतो यस्य यश्च शब्दं न शृणुयात्
स्फुटं नाघ्राति गन्धं वा

आघ्रातीति शेषः पाठः

तस्य—

मासमेकं गतायुषः २७६

जीवितमिति सम्बन्धः ।

अकस्मादेव च—

रक्तपद्मोपमं वक्त्रं जिह्वा कृष्णा च यस्य वै
गात्रे वर्णान्यनेकानि हृदयं यस्य रोदिति २७७
तालुकम्पोऽथ नाभेश्च अर्धमासं स जीवति

रोदिति निर्निमित्तं पुनः पुनः क्षिद्यति रोदनमनुभवतीति ।

अन्ये च—

यस्य तु काकनासीरो धूमधूमं न जिघ्रति २७८
सर्वदुःखं न जानाति चतुर्मासं स जीवति

अत्र निहिता अपि काका नासीराः षड्गाश्च ये न अन्यदाः पुरोऽपि दृश्यन्ते ।

बिन्दुं यस्तु न पश्येत्तु नित्यं चक्रानुगं हितम् २७९
नित्यं वहति हिक्कान्तं वर्षमेकं स जीवति

षडङ्गं पश्यन् ज्ञात्वापि यो बिन्दुं न पश्यति चक्रानुगं धूमध्वंसं हिक्कां क्रियाम् ।

उपसंहरति—

उद्दिष्टलिङ्गानि चैतानि अङ्गारिष्टानि यानि च
उक्तानीति शेषः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अथैतानि —

पूजया जपहोमेन ध्यानधारणया प्रिये २८१
इतरत्तद्विधानेन जीवन्ते नात्र संशयः

पूजादिधारणान्तं भगवद्विषयं तत्तद्विधानं वक्ष्यमाणा
यू। नदित्यमदिशामनं कृत्वा यतेतो योगाभ्यास एव का
र्यः तत्र नाडिशुद्धि पूर्वकमारुतजयादेव तत्प्रकाशनात्
येन

श्रीदेव्युवाच —

नाडीनां शोधनं चैव वायूनां च जयः कथम् २८२
तेषां साम्यभक्तानां वायूनाम्।

स्थानं रूपं च शब्दं च सर्वं ब्रूहि मम प्रभो
एतत्प्रश्नषट्कं निर्णीतुः। श्रीभैरव उवाच —

परमो योगसद्भावो गुह्याद्गुह्यतरः प्रिये २८३
यो न कस्यचिदाख्यातस्तं योगं शृणु तत्त्वतः

यत्त्वया पृष्टं तद्योगरहस्यं तद्विना योगाभ्यासायोगा
त्।

तत्र तावत् —

सुभशस्ते समदेशे नाग्निनोदसमीपतः २८४
बालुकाशर्करादीने शुद्धरत्नविवर्जिते
निःशब्दकीटवल्मीके ईतिभिः परिवर्जिते २८५
उत्यधर्मिष्ठसंवासे तत्र योगं समभ्यसेत्

ईतयोऽतिवृष्ट्यादयः उपये सतीर्थादिभुक्तो धर्मिष्ठसंवा-
से तुल्याश्रये।

तदा सो —

देवदेवं समभ्यर्च्य भैरवं सविनायकम् २८६
पूर्वाचार्यान्नमस्कृत्य युक्तो ध्यानपरायणः

विघ्नशमनाय गणपतिपूजा पूर्वमाताग्रहणाय गुरून्पूज
यित्वा भैरवमभ्यर्च्य ध्यानपरायणो युक्तः स्यादिति सम्बन्धः।

कथमित्याह —

आसनं स्वस्तिकं बद्ध्वा पद्मकं भद्रमेव च २८७
सापाश्रयं सार्धचन्द्रं योगपट्टं यथासुखम्
दहनोत्प्लवने कृत्वा प्लावयेदमृतेन च २८८

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

सत्त्वाद्याभ्यन्तरे चैव सकलीकरणं ततः
अन्तर्यागं यथापूर्वं मुद्रार्घं च परं तथा १८९
दशधा योगमार्गेण हंसस्वच्छन्दमभ्यसेत्

पद्मकं कृत्वेत्युत्तानपादतलं पद्मासनाख्यं पर्यङ्कस-
जङ्घायत्यासा स्वस्तिकं । समपादस्थित्या भद्रं भित्त्यां प्रपा-
त्सोपाश्रयमेतत्त्वर्धचन्द्र विशेषणं भूमिष्ठैकचरणोत्तमाङ्ग-
न्यकोत्तानं द्वितीयमर्धचन्द्रं योगार्थं पट्टं परिकरबन्धाय ब-
द्ध्वा एतदन्यतममासनमन्यदपि वा यत्सुखं शरीरपरि-
क्लेशकृन्न भवति । यथोक्तं स्थिरं सुखमासनमिति । ततः
पूर्वोक्तो दशाद्युद्धारान्तं यत्ना दशधा योगमार्गेणेति बाह्या-
भ्यन्तरचनादिषट्प्रणाल्यम्भकप्रत्याहारधारणाध्यानात्म-
ना भाविता । अथ च भाविप्राणादिवायुदशकजयपूर्वं सुधी-
नो हंसस्वच्छन्दं परं निष्कलमक्षरकमभ्यसेदनुप्रविशेत् ।

तदनुप्रवेशं सूक्ष्मोऽयावत्सारेणा स्फुटयति —
सत्त्वं बिन्दुमतीतं तु नादान्तं ज्योतिराकृतिम् १९०
सङ्कल्पकल्पनात्यक्तं ध्यायेद्धि तेन सर्वगम्

यत्तु स्थूलेनाथमकारादिकलोङ्कारस्वरूपं बिन्दुमतीतमिति
तदुल्लङ्घ्य नादर्धचन्द्रनिरोधिकापरमूर्ध्नास्य नादनादान्तक्रमे-
ण ज्योतिराकृतिमिति शक्त्यादिप्रकाशरूपं सङ्कल्पविक-
ल्प[उहं] पूर्वमविकल्पकेनासङ्कल्पनाभिरलक्ष्यं स-
प्रकाशचिदानन्दघनं सर्वगं हंसस्वच्छन्दं ध्यायेदिति सम-
नान्तं विलाप्याकृतकविमर्शीरूपेण समा[illegible]विशेत् ।

तदेतन्नाडिशुद्धिप्राणजयपूर्वकं सुघटं स्यादित्या-
शयेन नाडिजयं तावदित्याह —

अपसव्येन पूर्येत सव्येनैव विरेचयेत् १९१
नाडीसंशोधनं चैतन्मोक्षमार्गपथस्य च

सव्येन दक्षनासापुटेन रेचयेद्रेचकं कुर्यात् अपसव्येन
वामेन पूर्येत वायुपूरणं कुर्यात् एवमनवरतं क्रियमाणे-
मेतन्नाडीनां मोक्षमार्गपथस्य वा मध्यधाम्नः शोधनं मारुत-
प्रशमनं भवति ।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्राणजयं वक्तुमुपक्रमते —

रेचनात्पूरणाद्वापि प्राणायामस्त्रिधा स्मृतः २९२

प्राणस्यायमनं [illegible]नत्यजनेन स्वायत्तीकरणं त्रय एते प्राणायामाः सर्वसाधारणेन नासिकापथग्रमेण निबध्यमानाः ।

साधारणप्राणायाममाह —

सामान्या त्रिविधेन तु

एतदभ्यास [illegible] भुजङ्गमाने:

पुनरभ्यासो [illegible]

नाडीमाह —

आभ्यन्तरेण [illegible] शनैरभ्यन्तरेण तु २९३

निरुध्य [illegible] [illegible] प्राभ्यन्तरास्तथा:

अभ्यन्तरेण [illegible] रेचनं बाह्यान्ते [illegible] रि, निरुध्य [illegible] [illegible] प्राणाग्रमेण [illegible]धेः कार्यो इति [illegible] भवति ।

सूत्र —

नाभ्यां हृदयकण्ठादारभ्य [illegible] त्रिपथेभ्यस्तु

प्राणायामप्रवर्तिनु [illegible] इति स्मृतः २९४

निरुध्य प्राणायामान्तं हृदय कण्ठादाविति शनैः शनैर्हृदयादयः [illegible] कण्ठाद्युत्तरा प्राणं नाभ्यामेव निरुध्येत्यपी तु तथा [illegible] त्रिपथाविति तत्प्रत्याहारयुक्तया नाभ्यामेव [illegible] [illegible] प्राणं नाभौ निरुद्ध्य तः [illegible] [illegible] भवति ।

तदिति —

प्राणोऽयं तु [illegible] नाभौ गत्वा सम्भ्रूसना

[illegible] —

[illegible] वामनासापुटेन तु २९५

निरुद्ध [illegible]हाराय ।

एवं [illegible] प्राणायामप्रत्याहारावभिधाय

धारणां निरूपयति —

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वायवी धारणाङ्गुष्ठे आग्नेयी नाभिमध्यतः
माहेन्द्री कण्ठदेशे तु वारुणी घण्टिकाग्रगा २९६
आकाशधारणा मूर्ध्नि सर्वसिद्धिकरी स्मृता

पाददेशे निःश्वसिते, नाभौ जाठराग्नेः, कण्ठे क्षितिपदे धारणयः, घण्टिकायां रसस्य, ब्रह्मरन्ध्रे च व्योम्नः सम्भावनयैव धारणा उक्ताः। अत्र चोद्घातं दीक्षाप्रकारनिर्णीतं सम्भावनललाटस्थनाद्रसात्मकं धारणाध्येयं प्रथमं, कण्ठे पार्थिवीं धारणां बद्ध्वा हृदयादुद्घातपञ्चकेन पञ्चगुणं पार्थिवं तत्त्वं भिन्द्यात्ततोऽनेनैव क्रमेण हृदयादेव चतुर्भिरुद्घातैश्चतुर्गुणमप्तत्त्वं, ततो हृदयादेव नाभिदेशे त्रिभिः त्रिगुणमग्निं, अनन्तरं हृदयादेव द्वाभ्यां पादाङ्गुष्ठगतं द्विगुणं वायुं, ततोऽपि अङ्गुष्ठान्मूर्धपर्यन्तया आकाश निःशब्दमुद्घाट्य, हृदयादेवैकोद्घातयुक्त्या परब्रह्मरन्ध्रस्थमेकगुणं व्योमतत्त्वं भित्त्वा तद्दर्शनात्तस्य सर्वाः सिद्धयो भवन्तीति वाक्यार्थः।

तदेतदाह—
एकद्वित्रिचतुष्पञ्चसङ्ख्योद्घातैः प्रसिद्ध्यति २९७
उद्घातं लक्षयति—
सञ्जित ऊर्ध्वं तु वै प्राणो मूर्ध्नि गत्वा निवर्तते
स उद्घात इति प्रोक्तो तानवो योगिभिः सदा २९८

ऊर्ध्वं त्रिपलतालपरं कण्ठादिदेशाणं, तानव इति तत्तत्स्थानानुसारेणानुभवात्मकोऽयमित्यर्थः अत एव पूर्वमनुभवप्रधान एवासावुक्तः।

अथ प्राणायामादीनां फलं दर्शयति—
रागद्वेषौ प्रहीयेते प्राणायामैः सुधारितैः
धारणाभिर्देहत्यागं प्रत्याहारेऽसंयमः २९९

पापं दहेदित्याचारकपथिप्यादिग्रन्थिभेदात् शुभाशुभकर्मबन्धविच्छेदात्।

अथ तत्प्राणादित्रितयं प्रथितं ध्यानं रूपं च शब्दं च भूतानि तत्क्रमेण निर्दिशन्नाह —
हृद्गुदे नाभिकण्ठे च सर्वसन्धौ तथैव च
प्राणाद्याः संस्थिता ह्येते

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यानान्ताः पञ्चेत्यर्थात् ।
एषां च –
रूपं वर्णं च मे शृणु ३००
तत्र –
इन्द्रनीलनिभो रक्त इन्द्रगोपकसन्निभः
क्षीराभः स्फटिकाभश्च पञ्चानां रूपलक्षणम् ३०१
इन्द्रनीलं मलिनं कृष्णम् ।
घण्टाकांस्याब्दमधुरो गजनादो महाध्वनिः
प्राणादीनां पञ्चानामयं शब्द उदाहृतः ३०२
कंसं कांस्यं, अब्दो मेघः, महाध्वनिः दुन्दुभिघोषोपमः।
एषां कर्माणि दिशति तत्र –
जल्पनं हसितं गीतं नृत्तं गुप्तगतिः कलाः
शिल्पं च सर्वकर्माणि प्राणस्यैव विचेष्टितम् ३०३
कलाश्चित्राद्याः सर्वकर्माण्यन्येनान्येव ।
अवेशयेदन्नपानं तन्मलं स्रावयेदधः
सन्धानं शोषणं च अपानस्तु करिष्यति ३०४
च शब्दान्मूत्रत्यागादि ।
अशितं लीढपीतं च समानः समतां नयेत्
नाडीषु सञ्चारयेत् ।
क्षोभो हिक्का तथा पिक्का उदानस्य विचेष्टितम् ३०५
पिक्का क्षुतम् ।
स्वेदश्च रोमहर्षश्च स्थूलं दाहोऽङ्गभञ्जनम्
व्यानस्यैतानि कर्माणि स्पर्शं चैव स विन्दति ३०६
स एव लभते ।
नागादीनां स्थानान्यादिशति –
अङ्गुष्ठजानुहृदये लोचने मूर्ध्नि संस्थिताः
नागाद्याः ।
क्रमेणोन्नेयः ।
सर्वेषामेषां शबलरूपता शबलशब्दता च
तुल्येत्याह –
बहुरूपाश्च ।
चकाराद्बहुशब्दाः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

99

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कर्म तेषां निबोध मे । ३०७

तत्राविकृतावस्थानां क्रमेण —

आह्लादनोद्वेजनकः शोषणश्वासनस्तथा
नागः कूर्मश्च कृकरो देवदत्तोऽपि पञ्चमः ३०८
अतिनिद्राकरश्चान्यो योजकोऽथ धनञ्जयः ।

अतिनिद्रा तन्द्रा योजको देहान्तरसम्बन्धकृत् ।

एषां विकृत्यवस्थायाम् —

श्वाससङ्कोचनञ्चोद्गमनञ्चोत्क्रमणं तथा ३०९
नागादीनां पञ्चानां मृत्युकाले विवेचितम् ।

उत्क्रमणं देहविश्लेषः ।

धनञ्जयकूर्मयोर्विशेषत्वं यथा —

न चैव याति चोत्क्रान्तो तनुं त्यक्त्वा धनञ्जयः ३१०
कञ्चित्कालं शवशरीरं न मुञ्चति ।
आकुञ्चयति वै कूर्मः शोषयेच्च कलेवरम्

आकुञ्चनं सन्धिसङ्कोचः

शोषणादि स्थानेषु तदेवं दशधा स्थितम् ३११
प्राणमेव जयेत्सर्वं जिते प्राणे जितं मनः
जिते मनसि शान्तस्य परं तत्त्वं प्रकाशते ३१२

तत्र —

प्राणापानं गुदे ध्यायेत्प्राणसमानं नाभितः
प्राणोदानं तु कण्ठे तु प्राणव्यानं तु सर्वगम् ३१३

प्राणशब्दोऽत्र सामान्यप्राणवाच्यपानादीनां विशेषरूपाणां सामानाधिकरण्येन प्रयुक्तः । यस्तु बहिः प्रसरणात्मा विशेषरूपः प्राणस्तं पूर्वोक्तदेशे हृदि ध्यायेदुपेतोवर्णितदाश्रात्मानश्चैते ध्याता वशीकृता भवन्ति ।

एवमेव च —

नागाद्याः प्राणसंयुक्ताः ।
सामान्यप्राणसंबद्धाः ।

एतान्यथोक्तरूपान्सर्वांस्तेषु ।
स्थानेषु निरोधयेत् ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तदेतस्य दशकस्य शाश्वता कालेन निरोधाज्जित-
ता भवति

तत्कालं वक्तुमाह –

निरुद्धस्य च यः कालस्तं वक्ष्यामि निबोध मे ३१४
तालात्प्रभृति तं ध्यायेद्यावत्पञ्चशतं गते
जितो जितो भवत्येव सङ्क्रान्त्युत्क्रान्तिकर्मणि ३१५

स्वाङ्गुल्या जानुभ्रमणं त्वरितं तालकालस्तेषां यावत्पञ्चश-
तं गच्छति तावद्यदि प्राणादीनामविचलं ध्यानं सिध्यति
तदा ते जिता भवन्ति ततश्च परशरीरसङ्क्रान्तौ उत्क्रान्तौ च
सामर्थ्यं भवति।

इदं च तज्जयेऽभिज्ञानं –

दिव्या कान्तिः शुभो गन्धः प्रज्ञा चास्य विवर्धते
दिव्या दृष्टिश्च श्रवणं दिव्या वाक्च प्रवर्तते ३१६
वायुवद्विचरेल्लोकान्सिद्धान्देवांश्च पश्यति
मनसा चिन्तिताप्तिः प्रवर्तेत गुणाष्टकम् ३१७
सर्वकामसुसम्पूर्णः सर्वद्वन्द्वविवर्जितः
संसारबन्धनिर्मुक्तः शिवतुल्यश्च जायते ३१८

गुणाष्टकमणिमादिकं तदियता ग्रन्थेन दशधा योगमा-
र्गेण हंसस्वच्छन्दमध्यत इति यदुपक्रान्तमधुना निर्णीत-
म्।

अथेदानीं स्वर्गभूम्यादिलीधारणाभियोगिनां योगा-वि-
तजापदाद्यवस्था दर्शयन्दर्शनान्तरोक्तवेधसमावेशसरूपज्ञा-
नं शिक्षयति –

प्राणापानौ तु संयोज्य हृत्कोटिसमन्वितौ
नाभ्याधारे च योगीन्द्रः
यदा तिष्ठेत्तदास्य
वेधः सम्यक्च जायते ३१९

हृदये प्राणापानयोस्तरङ्गात्मकविश्रान्त्यनन्तरं यदा मध्य-
स्थितिर्निमिषिता भवति तदा हृदि सामरस्यावस्थितौ प्राणा-
पानौ हृत्कोट्याकारकलाविमर्शनेन अधस्तात् प्रसरणा-
मेण नाभौ संयोज्य योगकाले तिष्ठतः वेधकल्पो भवतः।

पं १३ द्वि॰ पु॰ प्रजायते पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

स्थाने –
पुनरेव तु ह्रस्वौ द्वे प्राणापानौ निरोधयेत्
दीर्घकोटिसमायोगागानन्दताच्च पतेश्रुति ३२०
नाभिपद्मद्वि श्रान्त्यनन्तरमूर्ध्वमातन्त्र ह्रस्वं कृत्वा दीर्घाम-
कमान्त्र द्वितीयकलादिमवानपरौ निरोधयेदिति तन्त्रालोकात्रा-
रस्थाने कण्ठान्ते प्रोक्तकालं तिष्ठते कान्तनाप्रकर्षाच्छ्रुति प-
तेत् ।

ततोऽपि कण्ठे –
कण्ठस्थं च नयेद्दद् प्राणमेव निरोधयेत्
प्लुतकोटिसमायोगान्तमूर्छितवानी भवेत् ३२१
उल्लासे सन्त्यान प्रणमान्त्राणामिनी द्वैतं कालं प्लुतकोटिः
पूर्वोक्ततीन्त्या तालुनोद्वारी मकारकलादिमयीः । तेन जि-
तासितवस्तुप्रणनाला योग्युविनः एवमादिशता कम्पयेद
पानायोगिज्ञाणरे निरूपितं भवति ।

यदा तु –
भ्रूमध्ये बिन्दुयोगेन प्राणरोधं तु कारयेत्
सुषुप्तं जायते तत्र तत्त्वाद्वैव प्रबुध्यते ३२२
प्लुतेनैव तालुनो भेदितवान्मात्वबिन्दुकलायाप्तिवमेशेन
भ्रूमध्ये प्रोक्तकालं तिष्ठतः प्रणान्तमनोवृत्तिः सुषुप्तावस्था
देति तत्त्वा प्रबुध्यते इति न लौकिकवन्मोहरूपेणाभिभूय-
ते तदुक्तं तदन्यत्र तु चिन्मय इति

ततोऽपि –
मूर्धद्वारं समाश्रित्य निष्कलं ध्यानमारभेत्
एवमभ्यसतस्तस्य प्रत्ययस्तु तदा भवेत् ३२३
पिपीलकामुखस्पर्शो मूर्धद्वारं विभिन्दतः
निष्कलमिति वर्णज्योतिर्ध्वनिव्याप्तलक्षणात्स्पर्शनानुभ
वतपं पिपीलकामुखावेध इति सञ्चरन्ति पिपीलस्पर्शतुल्य-
गन्धकस्पर्शितुल्यमङ्ग स्पर्श इत्यर्थः ।

किञ्च –
भित्वा कमल सर्वाणि उन्मन्यन्तानि यानि तु ३२४
सर्वान्तालन्तरौर्देवि

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

लक्षलेशिनि प्रमाणाधिकारोत्तीर्णैरनुभवैरुज्झ्यत इति शेषः
तदा तावदन्यत्र तुर्यातीतदशा ।

अथैतत्सर्वं –

त्यक्त्वा स्वच्छन्दतां व्रजेत्

ताद्रूप्यात्मना पदविश्रान्तिपदप्रकर्षात्तुर्यातीतदशा-
लाभात् चिदानन्दघनपरमेश्वरसमावेशमनुभवति योगीन्द्र
इत्यर्थः ।

न केवलं देहोत्तीर्ण एव परेऽस्य परसमावेशो
घटते यावत् –।

जायते उन्मनत्वं हि देहेनानेन साधके ३२५

देहावस्थायां तु उत्थानेऽपि साधकस्य समावेशप्रकर्षोन्मदान-
न्दरससंस्कारात्तल्लीनेव भवतीत्यर्थः ।

किञ्चायं ध्यानव्यापारनिरोधात् –

सङ्गमेत्य परदेहेषु तत्स्थानाभ्यां न बाध्यते

अतीतानागतं चैव त्रैलोक्ये यत्प्रवर्तते ३२६

प्रत्यक्षं तत्प्रवेशस्य सर्वज्ञत्वं च जायते

यद्यत्प्रवर्तत इति यदपि वर्तमानं किञ्चिदस्ति तदस्य
सर्वं प्रत्यक्षीभवति सर्वज्ञत्वमिति क्रमेणाभ्यासप्रक-
र्षात् ब्रह्मविष्ण्वादितुल्यो भवतीत्यर्थः ।

पाटलिकं प्रमेयमुपसंहरन्पटलान्तरेण सङ्ग-
तिं दर्शयति –

प्रसङ्गाध्यात्मकालस्य ज्ञानं विज्ञानमेव च ३२७

सर्वमेतत्समाख्यातमण्डकोशं निबोध मे

अध्यात्मकालकथनप्रसङ्गेन तदुच्छ्वासज्ञानं मृत्युजय-
योगिज्ञानरूपध्यानात्मकं वेदादिरूपं च विज्ञानमेतदुक्तं
मनुत्तममनुजिघृक्षुर्देवेशानः –

कालाण्डं च देवेश कथयस्व प्रसादतः इति

इति यत्पृष्टं ततः कालस्वरूपं कथितं प्रसङ्गाज्ज्ञानं
विज्ञानं चाध्यादिष्टं । अण्डस्वरूपं निर्णेतुमवशिष्टमतो
ऽनन्तरपटलेन निर्णेष्यमाणं निबोध जानीहीति

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पाटलिकी सङ्गतिरिति शिवम् ॥
संवित्स्फारख्याप्ता
विश्वं प्राणान्तरस्थं सम्यग्ज्ञात्वा
नानाः सिद्धीरेण-
तस्या पूर्णस्थितिं वाप्नातु ॥
इति श्रीमच्छन्दोद्योते कालाधिकारः सप्तमः
पटलः ॥

श्लोकसंख्या २१७६

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

Chapter
V - VII

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यस्य बोधमहाम्भोधे ब्रह्माद्यां भुवनेश्वराः ।
अंशा मिता बुद्बुदवत्ते स्तुमः परभैरवम् ।

अंशकांश्च निबोध मे इति यत्पटलान्ते उपदिष्टं तत् विभक्तुं भैरव उवाच –

'अंशकं षड्विधं देवि कथयाम्यनुपूर्वशः,'

परस्य बोधभैरवस्य शक्तिभिः ब्राह्म्यादिभिरधिष्ठिता ब्रह्माद्यायावभासिता अंशा सततसदनुग्राह्या अपि तदंशा इत्युच्यन्ते एतौ शानाराध्यत्वेन स्थिताम् कान्यर्थं ब्रह्मांशो यं विष्णुश इत्यादिक्रमेण यो वक्ष्यमाणो भावस्वभावादिः सोंऽशक इत्युच्यते स च साधकं प्रति सिद्ध्यनुकूलतया षडंशांशक इत्यभिधीयते ।

तदुद्दिशति –

'भावांशकः स्वभावांशः पुष्पपातांश एव च ।
मन्त्रांशकः स्तनन्यासः संज्ञाकापादनं द्विधा,'

भावः सहजस्तत्तद्भक्तियुक्त आशयः स्वभावस्तदनुगुणो व्यापारो यस्तु सर्वपूजया बद्धनेत्रस्य पुष्पपातानुसारं निश्चीयते तन्मन्त्रवाच्यदेवतात्मानमनुसन्धानं स मन्त्रांशः अंशकापादनत्वमं शास्त्रनिरूपितस्यापि मन्त्रस्यापि वीर्यद्रव्यादिहोमेन साधकदीक्षाक्रमेण वा साधकं प्रति क्रियत इति द्विरूपमिति षोडशांशकाः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

प्रथमभावस्य लक्षणमाह –
'देवानुस्मरणं भावः सहजं तं विजानत'
अदृष्टानुष्ठानस्यापि प्राग्जन्मवासनापरिपाकवशात्तत्तन्नियत देवतानुस्मरणं यत्फलं स भवांशः ।
द्वितीयमाह –
'स्वभावस्य भवेच्चेष्टा'
शोकभावानुगुण एवमेव लिङ्गार्चनाद्यात्मा व्यापारः ।
ते च –
कथयाम्यनुपूर्वशः
ब्रह्मांशो वेदभक्तस्य रुद्रांशं च निबोध मे । ३
रुद्रभक्तः सुशीलस्य शिवशास्त्ररतः सदा ।
विष्ण्वंशो विष्णुभक्तस्य चन्द्रांशः प्रियदर्शनः ४
सर्वदेवरतः शान्तो यक्षांशो धनसङ्ग्रही
लुब्धो गर्वितस्त्वष्ट्रांशी वातांशश्चपलः स्मृतः ५
सर्पविस्रम्भगामी स्यान्नागांशो दीर्घशाय्यथ
दीर्घरोषः सतिवक्रो गुरुतीररुचिः सदा ६
गान्धर्वो गायनो नित्यं शिवभक्तो वरानने
विद्याधरांशकः श्याली दैत्यांशो दैवगणः स्मृतः ७
कामांशो रूपवांश्चैव सुभगो गणिकाप्रियः ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रक्षोंशः क्रूरनिस्त्रिंशो देवद्वेषी द्विजेषु च ८
पिशाचांशो छलान्वेषी वासरे भीरुकातरः
यक्षांशः पुरुषस्त्रीषु उत्सरः पिङ्गलस्तथा ६
सवित्रंशश्च तेजस्वी सर्वधर्मरतः सदा
इष्टानि कुरुते नित्यं दयालुः शिवभावितः॥ ९

इति वक्रो डामरतन्त्रस्थः विद्याधरांशस्य शिवभक्तत्वं शिवशास्त्रोक्तविधानेन गुटिकाञ्जनादिसिद्धिरसिकत्वं क्रोधारुणहृदयो निस्त्रिंशो निर्घृणव्यापारः परुषो वाचालः तीव्रः कर्मणि सूतं वापीकूपादिकरणं इष्टं यतः स्मरसयान । ये च यदंशास्तेषामेते ब्रह्मादयः –

"स्वसिद्धेः फलदाः सर्वे स्वध्यानजपहोमतः॥

यस्य यावदैश्वर्यं तावदेवासावाराधितः साधकेभ्यः प्रयच्छेति एवं चाधिरथदिह्माह यस्य यत्परिमितांशस्य तत्तत्पदप्रापक एव मन्त्रोदयः स च एषां विशेषतः प्रास्तिप्त नास्ति तेषां प्रणव एव तन्नामनमस्कारयुक्तः यदाह –

यो यत्राभिलषेद्भोगान् तत्रैव नियोजितः
सिद्धिभाङ्मन्त्रसामर्थ्यात् इत्युक्तमिहापि मन्त्रैः कृतदीक्षस्य साधकस्यैतन्मन्त्राराधनेनाराधितास्ते देवताविशेषास्तदा सर्वे भैरवरूपा एव इति सर्वसिद्धिसाधका इत्याह –

"भैरवाङ्गसमालब्धाः सर्वे देवा वरानने

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

भैरवास्तु स्मृताः सर्वे सर्वसिद्धिफलप्रदाः) १

भैरवाङ्ग-समालब्धा इत्युक्तेदमाह येषां कपालेशादिमन्त्राणां वक्त्राणि नोक्तानि तेषामाराधकैर्नैष्कलवक्त्राङ्गानि प्रयोक्तव्यानि कस्मिंश्चित् सर्वशास्त्रस्य द्विःस्थितस्य वाक्यद्वयविषयां योजनाम-सहमानः सर्वे देवा इत्यत्र सर्वदैवेति सर्वसिद्धिफलप्रदा इत्यत्र च सर्वकामसमन्विता इति पठिते तन्मन्त्रदीक्षिताः साधकास्तदारा-धनाद्भैरवा एव सर्वसिद्धिभाजनं भवन्तीति व्याख्यातवान् पुराण-पुस्तकेषु तद्विभागेनाथ एव पाठो दृश्यते ।

एवं –

स्वभावांशः समाख्यातः साधकानां हिताय वै) १२

साधकपदेन मुमुक्षूणां नायं नियम इत्यादिशति ।

पुष्पपातांशं लक्षयति –

(पुष्पपातवशान्नाम कर्तव्यं सुरसुन्दरि)

अनिश्चितभावस्वभावांशस्य मुमुक्षोर्बद्धनेत्रस्य शान्तिसर्वावर-णे भगवन्मण्डले स्वीकृतस्थिता एकं पुष्पं क्षिपतो यत्र तत्पते-न्मन्त्रवाच्यदेवतानुसारेण नाम कार्यम् ।

अनन्तश्च तान्त्रिकेणाचार्येणोपदिष्टमन्त्रस्य –

(स मन्त्रः सिद्ध्यते तस्य तमेवाराधयेद्धृदि) १५

पुष्पक्षेपविधानेनेत्यर्थात् ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

क्रमप्राप्ते मन्त्रांशकमधिकृत्य वक्तव्यत्वात्सम्प्रत्यनुक्तांशका-
पादनं प्राप्नोति -

"अंशकापादनं देवि कथयामि समासतः ।
कथमित्याह -
"वैहायसं ध्वजं चैव होमयेद्यस्तु साधकः ।
स मन्त्रः सिध्यते तस्य वर्यन्तोपि हि सुव्रते ॥

तत्प्रमाणस्थितार्थन्तोऽपि मन्त्रस्याराधनायैव वैहायसमित्युत्पन्न-नरमांसं ध्वजं च शूलारोपितनरमांसमशीतरश्मि सहस्रं वा-यथासम्भवयथावसायं यः साधक इत्याराधक आचार्यस्तत्पुत्रो-न्योऽपि वा साधको होमयेत् जुहुयात्तस्यासावेवमाराधितः सिध्यति साधकानुकूलो भवति यस्य तु श्रोक्तक्रमेणापि विविधांशकोपि प्रभावातिशयश्रवणात्कश्चिन्मन्त्र आराधयितुं नो भवति न च वीर्यद्रव्यक्रमे योग्यतास्ति तस्याराधयितुं सजपहोमादिनादौ तर्पयित्वा शास्त्रोक्तसाधकदीक्षाभिषेकविधानेनैव तन्मन्त्रांशक-त्वापादनं कर्तव्यं इत्यभिप्रायं द्वितीयमंशकापादनं लक्षयति -

"अनंशकोऽपि यो मन्त्रो ज्ञानविज्ञैर्वरानने ।
तदा यागं पुरा कृत्वा अग्नौ होमं तु कारयेत् ॥

श्रोक्तप्रकारेण परिकल्पित अंशक आराधकः शिष्यो यस्य सा वनंशकः यागहोमौ तं शिष्यं प्रति तस्य मन्त्रस्याभिमुखीकरणाय ततः -

पं ६ स्व० प्र० मन्त्रोऽपि इति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

'शिष्यस्य सर्ववत्कर्म कृत्वा तु विधिपूर्वकम् ।६
सवर्णीकृतिप्रयोगेण योजयेच्छाश्वते पदे ॥'

कर्मेति भगवद्वचादिपूर्वं साधकाभिषेकान्तं योजयेदिति तमेव-
शिष्यं मन्त्रेण सह शाश्वत इति परमशिवपदे भिसाधकाभिमते
च शाश्वतभोगपदे सदाशिवादिधाम्नि शाश्वतपदयोजनादेवाचार्य
साधारितवीर्योन्मेशकत्वाद्युत्कृष्ट सदंशकत्वमिति ।

इत्थमासादितांशकोऽसौ -

'परतत्त्वमभिध्यायन्साधयेत्परमेप्सितम् ॥ ७

एवमंशकापादनं द्विधोक्त्वा मन्त्रांशकमाह -

'मन्त्रांशं गणयित्वा तु गृह्णीयात्सुविचारितम् ।

मन्त्ररूपमंशकाक्षरभेदक्रमेणांशीकृतं मन्त्रं
साधकस्य चानुरूपांशकरूपत्वाभिदध्यंशो ।

'हीनमध्यसमुत्कृष्टं कथयामि समासतः ॥ ८

तत्र

हीनं शाक्तं विजानीयान्मध्यमं साध्यरूपिणम्
सिद्धं चैव सुसिद्धं च उत्तमं परिकीर्तितम् ॥ ९

कथमित्याह —

'मन्त्रान्तरं तु विश्लिष्य मात्राबिन्दुसमन्वितम्
आत्मनामान्तरं तद्वद्योभागेषु योजयेत् ॥ १०

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

ॐ शिवाय नम इत्यादिके मन्त्रे ॐकारादिमन्त्राक्षरं मात्राभिरकारौकारादिभिर्बिन्दुनादसमन्वितं विश्लेषेति अकारौकारादिमात्रा बिन्दुं च मकारमात्राकल्पनयास्य पृथक्कृत्यैव शिकारवकाराभ्यां इकारमकारं च विश्लेषयेत् अकारमात्रा त्वत्रारणार्थं न कश्चिद्विश्लेषयेत् अतस्तत्र वर्णान्तरं विश्लेषितं तस्याकारमुच्चारणार्थं कल्पयेत् तथोच्चारयोगादेवमात्मनः शिष्यस्य च यन्नाम विष्णुमित्र इत्यादिकं तत्र एकैकमक्षरं तद्धलोऽक्षमात्राभेदेन विश्लेषेति विभक्तमन्त्रस्याधोभागे योजयेत् अ उ म श इ व आ य नम इति दशानामक्षराणामधो विभक्तानि विष्णुमित्रनामाक्षराणि व इ ष ण उ म इ त त र इति स्यात् यत्र मन्त्राक्षराणि बहूनि भवन्ति तत्र नामाक्षराणि पुनः पुनर्योजयेत् मन्त्राक्षरसमाप्तिं योजयेत् ।

एवं स्थिते सति –

८ आत्मवर्णात्समारभ्य यावन्मन्त्रार्णमागतम्
यस्मिन् निपतेद्देवि तमाद्यं परिकल्पयेत् ॥ २२ ॥

शिष्यनामाक्षरमेकैकमवधिं कृत्वा मातृकार्णपाठक्रमेण गणनया एकैकनामाक्षरोर्ध्वस्य एकैक मन्त्रवर्णो यावदागच्छति तावद्रूपमाणेन सिद्धसाध्यसुसिद्धारिभेदगणनेन यत्रेत्र-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

स्तम्भे च नामवर्णौ निपतेतां संयुक्तेन तमायमिति शुभाशुभसूच-
कं निश्चिनुयात् यथोक्तं मया सङ्केते

आयान्नीत्येतराशीयभवन्त्यायास्तत्र इति ।

अत्र गणनोपायप्रदर्शनपूर्वमायस्वरूपमादिशति –

(रेखाङ्गुलिगतं तं तु कथयामि समासतः)

रेखोपलक्षिताङ्गुलीगतं अंगुलिरेखासु कथितं तमायम् ।

स च –

(पर्वणि प्रथमे सिद्धः साध्यश्चैव द्वितीयके ऽ
तृतीये तु सुसिद्धः स्यादरिश्चैव तुर्यके)

अनेन क्रमेण नामाक्षराणि मन्त्राक्षराणि यावद्गणयित्वायं प-
रीक्षेत ।

(अरिसाध्यौ परित्यज्य दातव्यः शुभकेन तु २६
सिद्धरूपः सुसिद्धश्च भुक्तिमुक्तिफलप्रदः)

अरिसाध्ययोराद्यन्तस्थितयोर्वङ्कुलयोर्वा परित्यागः सिद्धसुसि-
द्धयोस्तु स्वीकारः क्रमेण भुक्तिमुक्तिप्रदत्वात् यथोक्तं ।

सिद्धान्तो सिध्यते वश्यं साध्यन्ते कष्टसाधनः
सुसिद्धः पूर्वसिद्धस्तु अर्येन्तेव प्रसिध्यति इति तथा

एवं शुद्धौ कृतायां तु सुसिद्धोऽभ्यधिको यदि
सिद्धो न लभ्यते प्राह मूर्तिः साध्योऽपि साधक इति

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

शुद्धे कृतायामित्यंशकविषये तिथिमितायां साध्यप्यधिके त्रि-
चतुर्वा आयाते सति मन्त्रमूर्तिराराध्यत्वेन ग्रहीतव्या इत्यर्थः इयं
चांशकपरीक्षा एकाक्षरमालामन्त्रयोर्न कर्तव्या । यथोक्तम् ।

एकाक्षरेषु कूटेषु मालामन्त्रेषु भामिनि
अंशकं न परीक्षेत परीक्षेतान्यमन्त्रगमिति

कूटेषु द्वैतमन्त्रेषु अत एव नेत्रे च देवेश तथा द्वात्रिंशदक्षरम्
न च तत्रारिशङ्का स्यादित्यप्यत्रोक्तम् । –

तदित्थं विचारात् –

'यस्त्वंशकविशुद्धः स्यात्कोऽरवोऽत्र वरानने २४
तं मध्यसंस्थं संपूज्य तत्स्थाने मध्यमं यजेत्'

यइति कपालीशाद्यन्यतमः मध्यसंस्थमिति आराधनायां प्रधानी
भूतत्वात् तत्स्थान इति तत्सावरणकत्वात्स्य कपालीशादेः
पदे मध्यममिति श्रीस्वच्छन्दं अयं तुर्यादिरूपतया परीक्ष्य
इति दर्शितम् ।

अथ कथं श्रीस्वच्छन्दनाथस्य परिवारं प्रति परिवारत
या न्याय इत्याशङ्कां शमयितुमाह –

'यतः सर्वगतो देवः सर्वैश्वर्यगतः स्मृतः २५
तस्मिन्विमुक्तिदाता सो नवर्णः परमार्थतः'

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यः सर्वगतो व्यापको देवः क्रीडादिशीलश्चिदानन्दघनः श्रीसच्छन्दभट्टारकः सर्वेषु कपालीशादिषु प्रपञ्चव्याख्यावस्थितेष्वन्तर्गतः परमार्थरूपो यतः तत्तस्मात्स एव तत्तत्कपालीशाद्यात्मना स्थितः साधकस्यांशाकग्रुह्या सिद्धिमभेदव्याख्या च मुक्तिं ददाति परमार्थतः न तु व्याप्तिस्थानस्थस्थावर्णाः किञ्चित्कुर्वन्ति उक्तं हि - प्राक्   अन्तरेण कृतो मोक्ष इति तेन स्वस्थावरणभेदस्यामध्या कल्पनेऽपि न तत्त्वभूमेः काचिद्धानिः ।

तदिदमंशकविचारान्ते प्रसङ्गायातं वस्तु -

'कथितं स रहस्यं ते गुह्याद्गुह्यतरं परम्' २६

अथ यत्कथितमित्युक्तं तात्त्विकात्मिकं परमशिवात्मभूतिगुरुपारम्पर्येणेदं रहस्यमन्त्रमवतीर्णमिति दर्शयन्परादिविद्यान्त्र सम्बन्धषट्कं प्रदर्शयति -

'अतस्तन्त्रावतारार्थं कथयामि समासतः'

तत्र -

अष्टधाविग्रहायातं शिवात्परमकारणात् २७
ध्वनिरूपं सुसूक्ष्मं तु सुशुद्धं सुप्रभान्वितम्
तदेवापररूपेण शिवेन परमात्मना २८
मन्त्रसिंहासनस्थेन पञ्चमन्त्रमहात्मना ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

पृष्ठार्थं विचार्यास्तु साधनानि पृथक्पृथक् २९
लौकिकादि शिवान्तानि परापरविभूतये ।
तदनुग्रहयोग्यानां स्वे स्वे विषयगोचरे ३०
अनुष्टुप्छन्दसा बद्धं कोट्यर्बुदसहस्रधा ॥

शिवात्परस्मादद्वयप्रथात्मकश्रेयोरूपात्परमकारणाच्छिवान्तानां कारणानां सर्वेषां स्वभिमावाभासकारतम्यवाह्यः परद्वैकरूपो विग्रहः स्वरूपं यस्य तस्माद्भिन्नमेवतत्परं ज्ञानरसेन पञ्चरश्मेन सृष्टं च । तस्मिन्स्वरूपमेवायातं प्रसरणस्फुरणं यस्य तद्वृत्तिरूपं नादामर्शात्मकं समस्तमप्रमेयं विश्वव्यापकं चाकारादिकलाकलितत्वाभावात्स्पष्टं तत्प्रभान्वितं महाज्ञानरूपं यत्तदेवापररूपेणोत्पन्नाच्छिन्नभट्टारकात्वेन शिवेन दशवक्त्रमध्यव्यवस्थितसद्योजातपञ्चममहामन्त्रशरीरे पृथक्पृथगनुग्रहानुसारं साधनानुष्ठानानि लौकिकादिशिवान्तानि विचार्य तत्त्वसिद्धिसाधनार्थमपररूपेणैव स्थलेनेवेदादिरहस्यान्ततन्त्रतोतो भेदोद्भूतनानाप्रवाहस्वरूपमनन्तग्रन्थसन्दर्भात्मकं निबद्धं मन्त्रसिंहासनस्थेन सार्धत्रिकोटिमन्त्राधिपतिरित्यनेनैव शास्त्रान्तव्याख्यावकाशोऽतः पञ्चमन्त्रमहात्मनेत्यनेन श्रीकण्ठीयसं-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

हितागुरू नानास्तोत्रभेदः सूचितः। तत्र ।

अदृष्टविग्रहाच्छान्ताच्छिवात्परमकारणात्
स्तानरूपं विनिष्क्रान्तमनक्रवदनं महत् ।

इत्यादिनानादिस्वरूपं निरूप्य

ततो जातमिदं सर्वं चतुर्वर्गफलप्रद -

मित्युक्त्वा स्तोत्रभेदेन नानाशास्त्रप्रपञ्चोदयः प्रदर्शितः तदेव माबद्दमित्यनेन तत्तदनुग्राह्याशयपातमित्यनुसारेण भिन्नभिन्नफलान्यपि शास्त्राणि वस्तुतो वाक्यैकतया परिपूर्णभिन्नविमर्शास्फाराण्युत्तमत्वसम्भेदाभेदप्रपञ्चानीति तथाविमर्शात्मितं तत्तत्प्रतिभिन्नचिदानन्दघनतत्त्वविश्रान्तिपरमार्थीत्येवेति भवति तदुक्तं

यतः शिवोद्भवं सर्वं शिवधामफलप्रदं -

इति एवं परसम्बन्धमूलतां शास्त्रप्रसरस्य प्रदर्श्य सम्बन्धान्तरमपि गोचरतामपि प्रदर्शयामीत्याशयेन परशिवेनापीत्यमिदमुत्थाप्यत इत्याह -

(गुरुशिष्यपदे स्थित्वा स्वयं देवः सदाशिवः ३१
पूर्वोत्तरपदैर्वाक्यैस्तन्त्रमाधारभेदतः
तज्ज्ञानमीश्वरे दत्तमीश्वरेण शिवेच्छया ३२
विद्यायाः कथितं सर्वं विद्येशेभ्यस्तथादरात्)

पं०१४ वि०पृ० प्रशत्रिये नेत्यर्थ इति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

देवः परावाक्शक्तिमयः शिवभट्टारक एव सदाशिव इति गृहीततत्त्वभूमिकः स्वयं गुरुशिष्यपदे स्थित्वा इति प्रतिभाभुवि प्रकृष्टप्रतिवक्तृभावासूत्रेण परममहापश्यन्तीवाक्शक्त्यासूत्रितं पूर्वोत्तरपदात्मकैर्वाक्यैरुपलक्षितं तन्त्रमशेषशास्त्रसन्दर्भमयं तज्ज्ञानं चेश्वरेदादिति सङ्क्रमितवान् आधारभेदत इति ईश्वरात्मकमाधारभेदमाश्रित्य स्वयं तदात्मना स्थितेत्यर्थः तज्ज्ञानमीश्वरे दत्तमितीति तु पाठः पूर्वश्लोकान्त आसूत्रेति योजयित्वा तेन चेत्यनुषङ्गेन व्याख्येयः इयता मन्त्रसम्बन्धो दर्शितः शिवेच्छया सदाशिवेच्छये त्यनेनानायातशक्तिपातोनोपदेश्यः इति ध्वनति विद्याया इति

अष्टवर्गविभिन्ना तु विद्या सा मातृका परे ति

वक्ष्यमाणमातृकावाच्याया देव्यास्तथा वेदनरूपतया नत्वादिद्याशब्दवाच्यस्याशेषस्य मन्त्रग्रामस्यानन्तभट्टारकादिभ्यश्च विशेषेभ्यो मन्त्रचक्रवर्तिभ्य ईश्वरेण प्रोक्तं तन्त्रं तज्ज्ञानं च कथितं सङ्क्रमणयुक्त्या प्रदर्शितं विमर्शपदं नीतमादरादिति भङ्ग्युल्लासप्रकर्षात् यद्यपि भगवती मातृका तदुत्थाश्च मन्त्राः परमेश्वरदनेनावभासिता विद्यानन्तधाम्नि तावदशेषविश्वाभेदव्याप्तिरूप निमग्नेव स्थितेति तामुन्मज्जयितुमीश्वरेण विश्वानुजिघृक्षया ज्ञानसङ्क्रान्तिरूप

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

कर्तुमुपपन्नैव इत:प्रभृत्यन्तरालतत्त्वस्य शास्त्रत्रितः मया
पि तव देवेशि साधिकारं समर्पितमित्येतावत्पर्यन्तो भविष्यति।
एवं पश्यन्तीप्रसरपर्यन्तां शास्त्रस्थितिमुक्त्वा मध्यमा
प्रसरणेत्याह –

'मायानियतिपर्यन्तैस्तस्माद्रुद्रैरवापि तत्,'

तस्मादिति विद्यातत्त्वचक्रवर्तिनोऽनन्तभट्टारकादित्यर्थात् माया
नियतिपर्यन्तैरिति मण्डलिप्रभृतिभिः कञ्चुकवासिभिश्च रुद्रै
रवापीति सङ्क्रमणयुक्त्यैव ।

ततोनन्तरं तदेव ज्ञानं तथैव –

'श्रीकण्ठेनेश्वरात्प्राप्तं ज्ञानं परमदुर्लभम्,'

अहं हि भगवानीश्वरात्मनः शिवस्य शिष्यो मण्डल्यास्तत
न्तशिष्याः अष्टमध्ये पुंस्तत्त्वाधिष्ठितारुद्रा वक्ष्यहेतुतया ।
ख्यापिता इति तेषामेतज्ज्ञानशक्तिसङ्क्रान्तिर्न कृता ।

ततोऽपि तथैव–

'तेनापि तरथः प्रोक्तं रुद्राणामीश्वरेच्छया
प्रधानाध्वगरुद्राणां तु दीक्षयित्वा विधानतः
ममापि च पुरा दीक्षा तथा चैवाभिषेचनम्
श्रीकण्ठेन पुरा दत्तं तन्त्रं सर्वार्थसाधनम्,'

यद्यपि गुणतत्त्वे श्रीकण्ठनाथः स्थितः तथाप्यसौ शिवशिष्य
त्वेन प्रभावातिशयवानिति स्वोर्ध्वप्रकृतिवर्तिनः क्रोधाद्यष्ट
कस्य स्वाधारतत्त्वगतानां च शतरुद्रान्तानां रुद्राणामनुगृहीता-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

समापीति कैलासवासिनस्तन्त्रप्रवक्तुर्भगवत उमापतेरुक्तिः तदित्यमनन्ताद्याः श्रीकण्ठेश्वरभट्टारकात्मनः शिवस्य शिष्याः मण्डलिनस्त्वनन्तशिष्याः क्रोधादयः शतरुद्रान्ताः उमापतिश्च श्रीकण्ठशिष्या इत्यादिष्टं भगवता तेन यत्खेटकनन्दनेन मण्डलिनः श्रीकण्ठः क्रोधाद्याः शतभवाः सर्वीरेशाः एते कलादियोगात्मक दीक्षितप्रक्रियाः परेशेन त्वुक्तं तद्यथाक्रमानुसारं कचित्सातात्म रण्यर्येणेति व्याख्येयं न कचि[illegible]नविशेषेण दीक्षयितेति अभिषेचनं कृत्वेति च शाक्तसमावेशसङ्क्रमणयुक्त्या सर्वं शाम्भवसमावेशयुक्त्यैव एवं च नादीक्षितस्य ज्ञानग्रहणे नाप्यनभिषिक्तस्य- तदाने धिकार इत्यादिष्टं भवति ।

अथैतत्तन्त्रं च तज्ज्ञानं च सङ्क्रमणयुक्त्यैव-

(मयापि तव देवेशि साधिकारं समर्पितम्)

इतः प्रभृति वैखर्याः प्रसरः ।

एवमियतान्तरालाव्वें सम्बन्धं प्रकटीकृत्य दिव्यान्तमादिशति-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

(त्वमपि स्कन्दरुद्रेभ्यो ददस्व विधिपूर्वकम्
अष्टविंशिबरुद्रेवाणां वसुमातृदिवाकृताम्
लोके संप्रति नागानां यक्षाणां परमेश्वरि)
विधिर्दीक्षाभिषेकरूपः ।

दिव्यादिव्यसम्बन्धमाह —

(कथयस्व ऋषीणां च)

एवं च देव्या विद्यानुग्रहाधिकारार्पणेन भगवता महाकालिकत्वं परिपोषितम् ।

अदिव्यं सम्बन्धमाह —

(ऋषिभ्यो मनुजेष्वपि)

कथयस्वेति स्थितं देवीति हि पराशक्तिस्वभावा विद्याधिष्ठात्रनुजिहृक्षारसमरसलदया तत्तदाचार्यदेहसमाविष्टानुग्रहं करोत्येवं वादिव्यसम्बन्धः पर एव सम्बन्धः सर्वत्र प्रवृत्त एवेत्यभिहितं भवति। तदुक्तं

सर्वः परकलामयः

महानवान्तरो दिव्यो मिश्रो दिव्यश्च तत्पर इति त्रिकहृदये।

उपसंहरति —

पं० २ ख० पु० छन्दरुद्रेभ्य इति पाठः

पं० ३ ख० पु० लोकेषाग्रहनागानां इति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

(एवं तन्त्रवरं दिव्यं सिद्धरत्नकरण्डकम्
तथा गुप्ततरं कार्यं न देयं यस्य कस्य चित्)

यद्यपि पूर्वोक्ते सर्वतन्त्रे नवाधिकारो दत्त स्तथापि यदेवं नित्यो-न्निर्णीयमाणपटलगतरहस्यार्थपूर्णत्वादरस्तुत्कष्टमिदं इत्यभि-ह्यानः स्वच्छन्दभैरवतन्त्रज्ञानमध्ये प्रधानभूतं दिव्यं सर्वभोगाप-वर्गप्रदं तन्त्रं तन्त्रया गृहणीयं ज्येष्ठा शक्तिपातवतामेव प्रकाश्यं नेतरेषामिति शिवम् ॥

श्री देवेभ्यः क्रमान्तं निखिलमिदमियच्छासनज्ञानरूपं
विश्वं यत्संप्रभूतं परमशिवपदालोकपर्यन्तमेतत्
प्राप्तं वाक्येकवाक्यस्थितमिव विगलद्भेदविश्रान्तिलभ्य
स्वच्छ स्वच्छन्दधामप्रथनपरमिदं शास्त्रमग्र्यस्य जन्तोः

इति श्रीस्वच्छन्दोद्योते ष्टमः पटलः ॥ ॥

पं १ ख० पु० सिद्धरत्नकरण्डकम् इति पा०

पं ५ ख० पु० तन्त्रया गृहणीयमि ति पाठ

पं ८ ख पु प्राप्तं वैश्यम इति पा०

पं ११ ख पु वाक्यस्थिति तयाविगलद्विति पाठ

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

श्रीमन्निष्कलसद्विज्ञानुदङ्क्या सकलस्थितिम् ।
विश्रान्त्यत्यकले तत्त्वे यस्तं भैरवमाश्रये ॥

साधकोद्देशेनाराध्यपञ्चप्रणवनिरूपणानन्तरं तदुपयोगि बहुप्रमेयगर्भं कालस्वरूपमभिधायां प्राक् सतत्त्वमुक्तौ प्रसङ्गा- कु/ न्तरावतारो दर्शितः। अथ विघ्नौघविघातेन झटित्यभीष्टसि-द्धिसाधनं श्रीकोटराक्षविधानं रक्षाचक्रप्रपञ्चमप्रश्नितम-प्यनुजिघृक्षया प्रतिपिपादयिषुः श्रीभैरव उवाच,

'अतः परं प्रवक्ष्यामि रहस्यमिदमुत्तमम्'

अतः शब्दो व्याख्यातक्रमसूचनाय प्रकर्षेण अनुजिघृक्षादरेण प्रवक्ष्यामि उत्तमं रहस्यमिति सर्वविघ्नप्रशमने झटित्यभीष्टसिद्धिप्रदे च

अत एव –

'यन्न कस्यचिदाख्यातं तत्ते वक्ष्यामि सुव्रते'

शोभनं व्रतं परतत्त्वावहितत्वं यस्याः इत्यामन्त्रणेन योग्यतमविरलशिष्यविषयत्वमस्यानुष्ठानस्येति ध्वनति

ग्य/ अतश्च योऽपि देवीव्यतिरेकेनैतदन्यस्याप्युक्तमेतदुद्धरयति – ऽ/

'महाभैरवदेवस्य क्रीडमानस्य भामिनि ।
सृष्टिसंहारकर्तारं हृदयात्तु विनिर्गतः'

महाभैरवदेवः प्रथमपटलदर्शितनिर्वचनस्थित्या स्वकुलेनाथस्तस्य निःशेषविघ्नप्रशमनसर्वसिद्धिसंपादनानु-

ख्या/ जिघृक्षात्मिकां क्रीडां ताच्छील्येन कुर्वतः स्वस्वातन्त्र्यशक्त्यात्मकात् हृदयात्सृष्टिसंहारयोः कर्ता वक्ष्यमाण

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

श्रीकोटराक्षनामा देवः अग्रे शीघ्रं विनिर्गतः समुत्कलित
इत्यर्थः अत एव भगवान् घोर हृदय उच्यते
ते भगवन्तं दर्शयितुमाह—

कल्पान्त वह्नि वपुषं प्रलयाम्बुद निःस्वनम्
तडित्पुञ्ज निभं दंष्ट्रं जटाज्वाला समप्रभम्।
चन्द्र सूर्याग्नि नयनं कोटराख्यं सुभीषणम्
ह्रह्रह्र ठःस्थल्लाभोगं नागयज्ञोपवीतिनम्।
स्फुरन्माणिक्य मुकुटं सर्प कुण्डल भूषितम्
सर्पहार कृतोटोपं सर्प कङ्कण नूपुरम्॥
सिंह चर्म परीधानं सर्प मेखल मण्डितम्
गज चर्मावृत पटं पाशाङ्कुश कृत शेखरम्॥
पञ्चवक्त्रं शवारूढं दशबाहुं त्रिलोचनम्
कपाल माला भरणं खड्ग खेटक धारिणम्॥
पाशाङ्कुश धरं देवं घोर घोरार्णव तारिणम्
कपाल खट्वाङ्ग धरं वरदाभय पाणिकम्॥
भिन्नाञ्जन चयप्रख्यं स्फुरिताधर भास्वरम्
ब्रह्मेन्द्र विष्णु नमितं त्रिदशैरपि दुर्लभम्॥

सर्वमेतत् स्पष्टं व्याख्याभि व्याख्यानस तत्त्वं तडि- ३/
त्पुञ्ज निभ उद्गत दंष्ट्र यस्य जटानां ज्वालानां चाऽ
समा प्रभा दीप्तिर्यस्य कोटरं कुहरं तदाकृतीन्य·

पं ४ ख·पु० कनुषमिति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

त्रीणि यस्य अनेन अनन्लक्ष्यतां बहिर्दीपितृत्वं च दर्शयति मुष्टु भीषणत्वं नाम्नैवोक्तम् - मेखल प्रान्दे हस्व: हेश्वर: त्रिलोचनमिति प्रतिवक्ष भवतारिनं मण्डली कृतं दोर्दण्डं स्फुरिताधरत्वं तद्रूप मनुग्राह्य एतद् दृप्यास्यमित्याह — नि:श्रोबविघ्नभक्षणपरत्वेनै ~~क्षार~~

एतं तं भैरवं देवं स्वच्छन्दं परिकीर्तितम्
स्वच्छन्द नाथमेव बहुरूपत्वादनेन स्वभीषणेन विघ्नसंत्रासनेन रूपेण विनयेदित्यर्थ:

अतस्त्व

स्मरणान्नाशयेद्देव: पापसंघात मुल्बनम्
ध्यायितो व्याध्याद्युद्भावक प्राक्तन महापापप्र-
शमनायैव। तेन एवंविधं रूपं स्वेच्छया गृहीत
मत: स्मरणा देवोल्बनम् दुष्टभोग दानायोन्मुखी
भूत पाप संघातं नाशयत्येवात एव चतुर्वर्ग क्षी
ण्डी व्याधिभक्त महारकादय मन्य एव देवो व्या-
ध्याधिकारण भूत महापाप भक्षण इत्यवगतं

किन्त्व

अस्य मंत्र: पुराख्यातो द्वात्रिंशाक्षर सम्मित:
यस्तं भीषण रूपानुगुणतया,
पञ्च प्रवणे पूर्वान्तं तनु नीनं जय त्मनुम्
प्राग्दर्शितसतन्त्वा: पञ्च प्रणवा: पूर्वान्तयोर्यस्य

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तं पञ्च प्रणवस्वरूपे लीनं विश्वानं तदभिन्नत्यर्थ
तदा क्षुरितं चेमं महामन्त्रं पूजान्ते पूजावसरे (जपावसरो इति पाठः)
जपेत् अतस्त्वेवं वाच्य वाचक क्रमाभ्यां दीक्षणा द
घोरी सर्व युक्तत्वा आवि विपाष्ट देवता परिवृत
त्वतराभ्यां अस्य द्वाविंशद्दक्षरादन्याव भित्यनु
ध्यानान्तर मेवैतत्—

तदीह शास्य

तस्य कल्पं प्रवक्ष्यामि समासान्न तु विस्तरात्
कल्प्यते आराध्यते नेनेति कल्पं विधानम्।

तमाह

पूर्वोक्त भूप्रदेशे च विप्रुद्धे शुभ लक्षणे। ५।
पुष्प प्रकर संकीर्णे गन्ध धूपादि वासिते।
तत्र मण्डलमालिख्य पूर्वोक्ते वर्णकैः शुभैः
एक हस्तं द्विहस्तं वा चतुर्हस्ताष्ट हस्तकम्
सुसूत्रितं समं कृत्वा चतुरस्रं समन्ततः
पूर्ववत्साधयित्वा तु दिग्भागांस्तु वरानने
पूर्वोक्ते रिति धान्या तु रजसा पातः इति वाक्ये
न सूचितैः वर्णकैः सिन्दूरादिभि र्गतार्थमेतत्।
प्राक्तन मण्डलादिप्राष्ट मण्डलमित्याह—
चतुर्द्वार समोपेत मष्टपत्रं सकर्णिकम्
मध्ये पद्मं समालिख्य केसरैरुपलक्षितम्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

द्वात्रिंशद्दलं बाह्ये चक्रमात्रिरथ शोभनम्
एवं हस्तत्रितं कृत्वा बाह्ये चैवतु वर्तुलम्
चतुरस्रं तदासन्नं बाह्ये वीथीं प्रकल्पयन्
मध्य पद्म प्रमाणेन द्वारं कल्पेत पूर्ववत्
एवं भित्ति चक्र परीमाणानुसारेण हस्तत्रित वर्तुलं भ्र-
मं कृत्वा तस्यासन्नं चतुरस्रं कृत्वा वीथीं प्रकल्पयेत्तद्बा-
हेतः पद्मदेवभागं कण्ठ कपोल शोभोपशोभाढ्यं चतु
र्ष्वपि दिक्षु द्वार चतुष्टयं कल्पयेत् —

अथ निष्पन्ने मण्डले साधकः

भस्मोद्धूलितदेहस्तु मुद्रालंकार भूषितः
केशी यज्ञोपवीती तु दिग्वासास्संयतेन्द्रियः
शाक्तार्धपात्रहस्तस्तु सकलीकृत विग्रहः
परितोस्त्रं प्रविन्यस्य भैरवं पूजयेत्प्रिये
प्रणवासन संस्थं तु,

भस्मोद्धूलितत्वादिना साधकस्य मन्त्राराधनावसरे महा-
व्रतित्वमुक्तं मत एव परभैरवानुकारित्वेनापि तमभि-
(विघ्नान) मानिनो विघात ......भावस्या च जलस्थानादिनोक्त
दिग्वासास्तदन्यस्य यत्संयम नापायेनैव कौपीन ग्रह-
णात् शाक्त मत्र प्रकरण सामर्थ्यान्महाशङ्ख परितोस्त्रं
सर्वतोस्त्रप्रकारं प्रणवासनस्थत्वं प्राग्वत् —
कथं पूजयेत्पुनर्भैरवं इत्याह

मूर्तिं हंसात्तरेण तु

पं२२ ख॰पु॰ मूर्तिं त्रात्रिंशकेन तु इति पाठः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तमेव सकलं देवं स्वच्छन्दं परमेश्वरम्
मूर्त्ति हंसादारणेति पूर्वोक्तेन चिन्मूर्त्ति मन्त्रेण हां बिंदु
दक्षरेण च सकल मूर्त्ति रूपेण तमेवेति पूर्वोक्तम् —
किं विशिष्टेनेत्याह
यत्तत्परं भाति भाति अनामय सदूपकम्
तेन चावाहयेद्देवि
परमः सर्वोत्कृष्टो निर्भासो यस्य अनामयं मायासम्ब-
न्धहरं स्वरूपकं अनाकृति यत्पूर्वं निष्कलं तच्च युक्तं तत्
तेन प्रोक्तनीत्याद्य न्तस्थितेन सहित मावाहनमुद्रयाऽ
वाहयेत्पूजनार्थमभिमुखी कुर्यात् —
किञ्च
'हृच्छिरश्च शिखां तथा
वर्म नेत्रं तथास्त्रं च तेनैव परिकल्पयेत्,
तेनैव नैष्कलेन हृदाद्यङ्ग मन्त्रेण तु प्राग्वत्सकलेना
पि ब्रह्मपञ्चक मन्त्राणां ननु सकलादि विभागो स्तीति प्रा-
ग्वत्तन्न्यासानन्तरं भगवदाकृतौ निष्कलाङ्ग न्यासः —
इत्थं च निष्कलसकलात्मकैक रूपे भगवत्याह्वान
समय एव निष्कल सकल मन्त्रा द्वारा निष्कलस्यान
विहित परमीकरणे निष्कलाङ्ग विन्यासे कृते —
स्थापनं सन्निधानं च निरोधाद्यादि पूजनम् ।
सर्वं तेनैव कर्तव्यं मुक्तानुक्तं वरानने ॥
सर्वं तेनैव कर्तव्यं पूर्वं प्रदर्शित मुद्रा बन्ध पूर्वं कर्तव्यं
स्थापनादि सर्वं पूर्वप्रदर्शित मुद्रा बन्ध पूर्वं कर्तव्यं
स्थापनादि सर्वं पूर्वप्रदर्शितेन सकलेनोक्तमिति स्था-
तेनैवेति निष्कल संपुटितेन सकलेनोक्तमिति स्था-

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एनादि अनुक्रान्त स्वागतपाद्यचमनस्नानाद्या
चमनस्नानाद्यात्मनिवेदनपर्यन्तम्
इत्यंच

मध्यस्थं भैरवं मुख्यमङ्कमुद्रासमन्वितम्
मध्यस्थमिति मध्यगतं भैरवमिति भैरवतेज इत्यर्थः

किंचात्र पद्मबाह्ये द्वात्रिंशद्दलं रेचक्रे
~~ततः पत्रस्थिता देवीर्द्वात्रिंशद्दलारे चक्रे~~ -

ततः पत्रस्थिता देवीर्द्वात्रिंशद्यार्णैर्निवेशयेत् पूर्वा
रकात्समारभ्य यावदन्तेऽवस्थिताः

पत्रस्थितेत्यष्टपत्रस्य पद्मस्योक्तत्वात्तत्तदिकपत्रानुसारिण्य
तारम्ब बहिर्येचक्रे सन्निवेशयेदिति द्वात्रिंशद्यार्णैरिति त
कारलोप ऐश्वरस्तेन द्वात्रिंशद्देवीर्द्वात्रिंशानेवर्णैरणाद्वात्रिं
शाद्वर्णैः सम्बन्धिभिर्विभज्य निवेशयेत्

यदाह
तासां नामानि वक्ष्यामि द्वात्रिंशाद्यादिसङ्ख्यया
तानि मन्त्रस्यादक्षरस्फारसारततत्सहस्रा प्रथमनामाक्षराणि
निरूपयति-

अक्षरणायधा देवीच रेवती भोगदायिका | भैरवी
स्थापनी घोरसंज्ञाच रक्ता भयभैरति च | घोरा
घोररूपा रवा, चोरणा रतिस्तारा, यरूपिणी,
भयहानिस्तु चण्डावे सर्वदाच तथा वरा
नरकीच तथाघ्नावी बर्बरा सर्वगातथा
~~रौद्रीच श्यामलीचैव श्यवारूढा प्रकाशिनी~~

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

रौद्रीच भ्रामणीचैव नागिनीच मनोहरी
स्तम्भिनी मोहणीचैव द्राविणी द्रावशासिनी
भया पहारिणी देवी ज्ञेया द्वात्रिंशा तत्क्रमात्

तत्क्रमादिति मन्त्रगताक्षरक्रमानुसारेणेत्यर्थः एवं चाभिदधत्र केवलं मन्त्रस्य पूर्वनिर्णीतवाक्यरूपावी दिव्याप्तिर्या वर्णानुसारेण प्रोक्तदेवता चक्रेण्या प्तिमयत्वमप्याविष्याति देवः

आसां देवीनामावाहनादौ मन्त्रमाह

प्रणवादिस्ततो वर्णो देवीनाम नतिस्तथा
सर्वासां तु विधिर्ह्येष कर्तव्यो विधिवेदिना।

वर्ण इति द्वात्रिंशदक्षरमध्ये क्रमेणैकैकइत्यर्थः नाम्नेति चतुर्थ्यन्तमित्यर्थात् विधिरिति पूजादिविषयी मन्त्रोच्चारणप्रकारः विधिरिति पूजादि विषयो मन्त्रोच्चारणप्रकारः विधिवेदिनेति पद्यावाहनादावा मन्त्रणविभक्त्यन्तं नाम तया तत्क्रमानुसारेण जाति प्रयोग इत्याद्यनुमन्तव्यमिति ध्वनति

अथासां देवीनां प्रतिदिशं चतसृणां पूर्वोक्त नीत्या भैरवीय प्रपञ्चव्याप्ति तत्तल्लोकपालानुसारेण भैरवानुसारेण ध्यानं

हेमाभंप्राच्यातुष्कं तादिन्द्रचापसमप्रभम्
चतुर्मुखं चतुर्बाहुं वज्रहस्तं सगर्विनम्
कमालमौलाभरणं प्रहसन्तं विचिन्तयेत्
प्राच्यातुष्कमिति पद्मप्राग्दलसंश्लिष्टानां चतुष्टय

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

निविष्टम् रूपाख्चित्रबद्धं तद्विकान्ति तुल्यत्वाद्रिमप्रभं
वज्रहस्तं चेन्द्रचापवीतमप्रभमित्यन्तः स्फुरन्नानावर्ण
भास्वरमूर्ध्ववक्त्रस्य निष्प्रपंचत्वात्सिद्धत्रनुगुण्यतानात्तो
ति पञ्चवक्त्रत्वात्तिमदधिष्ठितमपि देवताचक्रनायकत्ति
स्यानुगुण्येन गृहीतंचतमेव चतुर्मुखादिरूपं दर्शित
एकत्र दत्तहस्ते वज्रस्योक्तत्वादनुक्तमपि कपालखट्वाङ्ग
धारित्वमभयकरत्वमंशेन भैरवरूपानुकारादुक्तं अनस्य
कपालमालाभरणत्वमपि सङ्गतमेवेति तदनुसारेण प्र
तिवक्त्रं त्रिनेत्रत्वमपि मन्तव्यं सगर्वितत्वं प्रहसितत्वं च
निर्विघ्नसिद्धिदानानुगुण्येन कियदेतद्भवित्यामाया तत्
एतद्वक्त्रमुखत्वादिप्रहसितत्वान्तं सर्वत्र चतुर्ष्वेन मन्त
व्यं तथा कपालखट्वाङ्ग हस्तत्वादिकं च

आग्नेयं रक्तवर्णाभं नैरृत्यं शक्तिहस्तं सदा
स्मरेत् दण्डहस्तं स्मरेद्याम्यं कृष्णवर्णं सुभीषणम्
नीलमिन्दीवराभासं नैरृत्यं खड्गहस्तकम्
श्यामं वरुणदिग्भागे पाशहस्तं विचिन्तयेत्
धूम्रं समीरदिग्भागे (पाशहस्तं) ध्वजहस्तं सुचञ्च
लम् उत्तरं धवलं त्वेयं गदाखेटकधारि च
स्फटिकाभं तथेशान्यं त्रिशूलायुधपाणिकम्

उत्तरस्मिन्देवी चतुर्मुखे खेटकधारित्वस्य स्वकण्ठेनो
क्तत्वादभयपाणित्वं तथा तत्वं चतुर्मुखादि सर्वमन्य
त्प्रागवत् अत्र ध्याने फलमाह -

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

एवं ध्यानपरो यस्तु चङ्क्रमेन सदाभ्यसेत
वत्सराद्वा वरारोहे तस्य सिद्धिस्त्रिधा भवेत
उत्तममध्यमाधमरूपाः
एवं ध्यानसिद्धिमुक्त्वा तस्यैव जपसिद्धयुचितं देशमादिशति -
महेन्द्रे मलये सह्ये पारियात्रेर्बुदे तथा
विन्ध्ये श्रीपर्वते चैव कोलगिरौ तथैव च
एतान्यष्टौ सिद्धिगुणानि पर्वतस्थानानि
किंच
गङ्गायमुनासम्बाधे
सम्बाधः सङ्कटः संमिश्रयोस्तयोर्यावती प्रवाहभूमिः
कुरुदेशे वरानने
गङ्गाद्वारे प्रयागे च ब्रह्मावर्ते समास्थितः
सरस्वतीदृषद्वत्योर्मध्ये देशो ब्रह्मावर्तः
सपर्याँ च अन्तर्वेद्यां सुपुण्यायां नर्मदायां तथैव च
गङ्गायमुनाप्रवाहयोर्मध्यमन्तर्वेदी नर्मदायामपि तत्तटे
किंच
सुस्निग्धदेशे भूभागे पद्मखण्डे मनोरमे
पद्मखण्डे मनोरमो यः सुस्निग्धो देशस्तत्र भूभागे इति योजना
किंच
येषु येषु प्रदेशेषु स्वयम्भूर्भगवाञ्छिवः

पं० ६ ख॰ पु॰ के तथा कौलगिरौ प्रिये इति पाठ.

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तेषु स्थानेषु देवेशि नियमस्थो जितेन्द्रियः
वाङ्नि रुद्रः प्रसन्नात्मा लक्ष्यान्तरजपे रतः
शाकभक्षः फलाहारी नीवाराद्यशने रतः
त्रिकाल पूजानिरतोऽग्निकार्यपरायणः
भावितात्मा महासत्वो रक्षायाश्च विधानवित्
यः
तस्य मन्त्रः प्रसिद्ध्येत्तु
स्त्व
साधयेत्सचराचरम्

स्वयम्भूनामानुग्रहार्थमेवावतीर्णत्वात्तद्देवस्य तानिशा
यं सिद्धिप्रदत्वं नियमस्थ इति शौचसन्तोषतपः स्वाध्या
येश्वरप्रणिधाननिष्ठः वाङ्नि निःशेषेण रुद्धा जपैकनिष्ठी
कृता येन प्रसन्नस्त्यक्तसङ्कसंस्कार आत्मा मनो यस्य
लक्ष्यान्तरजपेरत इति प्रागवधूर्तिंशता लक्षैः सदशां
शहोमैः नच यथान्ये अक्षरमन्त्रास्य लक्षेणैकेनेति
अक्षरमात्रस्य मन्त्रवाचित्वाभावात् लक्षेणान्तरसङ्ख्य
येति प्राक्तनोक्तविशेष प्रतिभासनात्तस्या उक्तेनैव
प्राणमासिकास्य प्रोक्तचक्रध्यानस्य का चिदनुपपत्ति
स्तस्येतज्जपसंख्याविधिं विना स्वड्गस्येव प्रोक्तफलहे
तुत्वान्न च ध्यानमात्रात्सिद्धिर्भवतीति वाच्यं आगमे
षु ध्यानमात्रात्सिद्धिप्रतिपादनात् जपस्तु तथोचितं ध्या
तु शात शास्त्रप्रतिपादनात् जपेत्तु तथोचितं ध्या
नेनच प्रत्याचक्ष्महे यदि प्रोक्तचक्रध्यानमन्त्रजपेन्न
स्यात्तत्र क्रदेवीनामपि जपनियममभिदध्यादित्यलम्

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

भावितात्मा शान्तस्वहृदय अतएव महासत्वः साधक सोऽत्यन्तशुद्धचित्तः रत्नाया दिग्वन्धस्वप्राकारादिरूपा यास्त्रकारान्क्षेत्रपालबल्यादेर्विधान विदितकर्तव्यता स्वः यदुक्तं साधयेत्सचराचरमिति तत्संक्षेपेण दर्शयन्नादि ले पटलप्रमेयं यत्तत्र कदाचयति।

कालाग्निर्नरकाश्चैव पाताला हाटकेश्वरः
सप्तलोकं सब्रह्माण्डं पञ्चाष्टकमतः परम्
देवयोन्यष्टकं चैव प्रधानपुरुषात्मकम्
नियतिः कालतत्त्वं च रागो विद्या कला तथा
माया विश्वेश्वरं तत्त्वं सादाख्यं शक्तिगोचरम्
सर्वं सिद्ध्यत्यनायासान्मन्त्रराजप्रभावतः

एतत्समनन्तर पटल निर्णीय भागं शान्तितत्त्वान्तं सर्वं साधकस्य वशं भवत्यतश्च शिवरूपः साधको जायते इतियावत्

यच्चैतद्विश्वमस्य वर्तते तत्र दण्डरूपी न्यायो मितबुद्धीनां स्थित एवेत्याह-

पूर्वोक्तं कर्म वेदिश्च मध्यमं मध्यमोत्तमम्
साधयेन्नात्र सन्देहो भैरवस्य वचो यथा

अधमादिप्राग्वत् मारणोच्चाटनवश्याकर्षणशान्तिका प्यायनादि च यदधमादि कर्म पूर्वमुक्तं तदपि यथोक्त द्रव्यशुद्धिसहकृतमयं मन्त्रराजः पूर्वोक्तन्यायेनैव जपलक्षेण

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सहोमेनाराधितः साधयतीति सिद्धमेवार्थं भैरवस्यय
थैव क्वचित्तयानाम्नात्वमाम्नातो ह्यकस्मः सिद्धिलिङ्गम
स्य योगपतमसाधकविषयमेतदेव दर्शनं द्वात्रिंशद्देवता
चक्रपरिवारं विनेकवीरं निरूपयितुमाह -

अथैकवीरमाश्रित्य अङ्गः षड्कसमन्वितम
जातियोगयुतं कृत्वा अष्टपत्रे कणोश्रये
पूजयेत्पूर्वविधिना ,

एकमेव देवीपरिवारादिपरिहृतं वक्राङ्ग षड्मात्रसहि
तं वीरं साधकानां मुक्तिपर्यवसित तत्र सिद्धिसाधानायो
यतं परमेश्वरं पूर्वोक्तविधिनेति भस्मोद्धूलितगात्र
इत्यादिनोक्तेन सर्वेण क्रमेण पूर्वोक्त एव क्षेत्रे आराध
नार्थं होमान्तेन विधिना पूजयेत् ततःप्रोक्तसंख्याकं
जपं होमंच प्रतिज्ञाय तत्संपत्ते -

जपहोमार्चनेरतः
ध्यायन्नेव महादेवि स्वच्छन्दं परमेश्वरम
प्राप्नोति चिन्तितान्कामान्हि विनात्यत्र संशयः ,

एवंप्राप्नोति चिन्ति

एवं साधकसिद्ध्यनुगुणीनाराधनप्रकारानुक्ता रत्नाक
ल्पप्रस्तावयितुमाह -

अथ रत्नाविधानेषु अघोरं योजयेद्यदा ।
तथाहं कथयिष्यामि तदेकाग्रमनाःशृणु ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तत्र
द्वात्रिंशदरसंयुक्तं चक्रमालिख्य भामिनि
ना नाभिकेसरसंयुक्तं स्वसमं तु वरानने .
गोरोचनां तु सङ्गृह्य सिद्धालक्तसंयुताम्
दूर्वाकाण्डेन देवेशि हरितेन समालिखेत्

सिद्धैः सिद्धार्थकैरलक्तकेन च मिश्रां गोरोचनां कृत्वा
दूर्वाकाण्डेन नालोक्तमस्त्रं भूर्जे लिखेत् सिद्धालक्तकम्
प्र लक्तक विशेष इत्यन्ये सिद्धा भगवती चण्डिका तत्पादाद्गृ
हीतेन गङ्गमेनेति त्वमत् -

अथास्य चक्रस्य -

विद्याराजं कर्णिकास्थं बिन्दुनादसमन्वितम्
साध्याक्षरसमानं देवेशि तस्मिन्साध्यं समालिखेत् ॥
ब/ कथमध्ये वरारोहे नयनाद्यन्तरोधितम्
ईकारवेष्टितं कृत्वा , -

विद्याराजं नवात्मकं कर्णिकास्थमिति द्वात्रिंशदरचक्र
नाभिगतकमलकर्णिकागतमिति यावत् बिन्दुनाद
साध्याक्षरयोरत्र लिपिक्रमेण लेखितव्यास्तासां चायं सन्निवे
शः साध्यमिति तन्नामैवं चाभिदधद्वाच्यस्य वाचकाभि
नत्वमीशेच्छया कृतमिति सूचयति कथमध्य इति न घ
वात्मसम्बन्धिनोः हकारस्य यो ककारसकारौ तयोर्म
ध्य इति कादुत्तरस्य सस्य प्रथमभागे नयनेन अन्त
रेण पूर्वोक्तेन नेत्रमन्त्रेण रोधितमिति समुदीकृतम्
तत्र च नेत्रमन्त्राक्षराणां मातावनुलोमक्रमः पश्चा

पं ७ वे·पु· नीतेन तत्क्रं प्रर्थात्

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

त्रितिलोमक्रमः इति सम्प्रदायः ईकारवेष्टितं
कृत्वेति माया बीजमालिख्यादे कोरण नेत्रमन्त्र
सम्पुटितं तत्साध्यनाम त्रिवेष्टितं करमध्ये लिखे
दित्यर्थः अत्र चापं प्रकारः अत्र चतुरस्रं संस्था
नरत्नार्थं न त्वे तदपि लिखनीयमेवमन्यत्रापि
इत्थं कर्णिकायां लिखित्वा ·

अकारस्था निवेश्यायेत्
पूर्वोक्तदेवता देवि ।



पूर्वोक्ता अरुणाद्या यथोक्तैकैकमन्त्राक्षररूपाः
साध्यास्ते भगवत्सम्मुखेन तु तत्पराङ्मुखतये
त्याम्नायोत्र -

अथ

तद्गर्भे साध्यमालिखेत्
साध्यमिति तन्नाम ·



कथं

भवगर्भे तु तत्कृत्वा ईकाराख्येन वेष्टयेत्
त्रीन्वारांस्तु वरारोहे ध्यानयोगसमाश्रितः

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

भव इह प्रणवः तन्मूर्द्धस्य देवीमन्त्रस्याद्यत्वात् तस्य गर्भ मध्ये तदिति साध्यनाम कृत्वा पश्चाद्दुपरिवर्त्तिमायाबीजस मस्ते नैकारेण प्रावृद्वेष्टयेत् तदीदृगितिकर्त्तव्यताविशेष तं साध्यनामैकैका निविष्टदेवीमन्त्राक्षरमध्ये आलिखेदित्य र्थः अत्रैव दर्श्युदाहरणम् एवं चोपाष्टस्य रेखाष्टस्यान्त स्य च प्रथमकुटिलभागात्मनि मध्ये एतल्लिखनीयं तथा भूतं चैतदेकैकं देवीमन्त्राक्षरमध्यकर्णिकागतमन्त्रराज सम्पुटं पूर्वादिक्रमेणाष्टसु निवेशयेत् ध्यानयोगसमा श्रित इति भगवतो देवतानां च सद्रूपं सिद्धिसमुचितय थोक्ताकारं ध्यात्वा तद्व्याप्तिं च भावयित्वा लिखेदित्यादि

तदेवं लिखितमन्त्रस्यैव चक्रम्

ऊर्ध्वं चैव तु संरोध्य क्रोङ्कारेण वरानने ॥

दिगष्टकेऽस्याष्टौ बहिः क्रोङ्काराः दातव्या इत्यर्थः ॥ (प्रवैत)

इन्दुनाङ्कुरितं कृत्वा पुष्पधूपैः प्रपूजयेत् ॥

इन्दुः कर्पूरं पूजनं मध्यमन्त्रात्प्रभृति सर्वमन्त्रैर्यथा स्थानं यथालेखोत्कृष्टतनं न सम्पद्यते ।

अथ

वेष्टयेच्चैव तन्तूर्नं मरन्ध्रं निर्व्रणं समम्
पञ्चरङ्गिकसूत्रेण वेष्टयित्वा वरानने
सिक्तेन मर्दयेत्पश्चाल्लोहमध्ये निधापयेत्

सिक्तं मधूच्छिष्टं लोहं मात्तिकं सर्वौषधिरससारभूत मिति तन्मध्ये स्थापनं साध्यस्याप्यायनाय ।

अस्य रक्षाविधेः फलमाह ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

यदा मृत्युवशाक्रान्तं कालेन कलितं प्रिये
अरिष्टचिह्नितं ज्ञात्वा रक्षामेतां समालिखेत्
तस्य मृत्युर्न जायेत इत्येवं भैरवोऽब्रवीत्

यदा त्वाद्यो भिन्नक्रमः समालिखेदित्यादौ योज्यः अस्य च पश्चान्नदित्याध्याहार्यं तेन कलाधिकारप्रोक्तै रन्यैर्वा रिष्टैः चिह्नितं ततश्च

एकोत्तरं मृत्युशतमस्मिन्देहे प्रतिष्ठितम्
तत्रैव कालमृत्युः स्याच्छेषास्त्वागन्तवः स्मृताः

इति स्थित्यागन्तुशतेनाक्रान्तं कालमृत्युना चैकेनाकलितं साध्यं ज्ञात्वा गुरुरिमां रक्षां यदा समालिखेत्तदा तस्य मृत्युः कोऽपि न स्यादिति भगवतैवोक्तमेतदिति नात्र संशयितव्यं लिपिमात्रात्कथमेतद्भवतीति यतः श्रीसर्ववीरश्रीभर्गशिखादौ निरूपितनीत्या लिपिरपि पराशक्तिप्रसररूपैवातो भगवतैवं प्रतिज्ञातत्वात्सत्यमेवैतन्मन्तव्यम् एवं

मृत्युरक्षणे प्रकारान्तरमाह -

कपालीशस्य गर्भे तु नाम यस्य समालिखेत्
भूर्जपत्रे वरारोहे रोचनायारसेन तु
शेङ्कारपुटमध्यस्थं रोधितं नयनाक्षरैः
बोधङ्गातिप्रयोगेण तस्य मृत्युर्न जायते ।

कपालेशः पूर्वोक्तः तस्य गर्भे प्रणवकथमध्ये कीदृशं नाम शेकारपुटमध्यस्थमाद्यन्तयोरेङ्कारसम्पुटीकृतं तथाहि तं च सत्पूर्वोक्तैर्नयनाक्षरैर्वौषड्जातिप्रयोगेण - प

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon



पश्चाल्लक्तेनोपलक्षितेनेवोधितमिति प्राग्वदनुलोमप्रतिलोमक्रमाभ्यामावृत्तयोः संपुटीकरणं दिग्विभागानुपादानादष्टासु दिक्षितयोस्तदाच्च नयेव सन्निवेशो भवति अत्रच प्राग्वद्दूर्वाकाण्डलिखनपूजनादि दौङ्गमध्ये निधापनपर्यन्तं सर्वमनुमन्तव्यं तदा नस्योद्यन्तरोधितस्योदाहरणम्

एवं परिवारस्य भैरवाष्टकाद्यन्तस्य कपालीयाविद्याराजाग्रेयण रक्षाविधानेन मृत्युञ्जययुक्तो प्रसङ्गात्कर्मान्तराणिमपि यन्त्रक्रमेणादिशति देवः

शिखिवाहेन तु देवेशि साध्यनाम विदर्भयेत्
अनलार्णमधश्चोर्ध्वं साध्यार्णेषु नियोजयेत्

शिखिवाहेन शिखिवाहनमन्त्रेण पूर्वोक्तेन विदर्भयेदिति अभिधेयं भवेत्पूर्वं ततो मन्त्रः सम्पुटं वेदिति प्राग्व्याख्यातरीत्या
[शि] सिन्धान विन्यस्तमन्त्रं कुर्यात् अनलार्णं रेफस्तदेकैकत्र साध्यनामाक्षरस्योर्ध्वाधो नियोजयेदित्यं विदर्भितमेतदाग्नेयमण्डला-
न्तस्थं वायुमण्डलसंस्थितं कुर्यात् ।
आग्नेयमण्डलं त्रिकोणं तद्बहिर्वायुमण्डलं षट्कोणं वर्तुलम् एतद्यन्त्रलिख्यते -

[दा] तस्यैव जायते देहः,

वाह्याधस्तादग्निदीपितत्वादग्निवर्णमध्यगतात्तरवाच्छिखिवाहनविदर्भितत्वाच्च किं शिखिवाहनविदर्भितमात्रेणैव नामाग्नेयमण्डलान्तः क्रियते न तन्मात्रमेव ।

किन्तु -

फट्काराद्यन्तरोधितम्,

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तेनेत्थमेतस्य चक्रस्य सन्निवेशः फट्कारान्तशिखिवाहनबीज
विदर्भितमिति व्याख्यानमसन्नया वाक्यार्थस्याभावात् एत
ल्लेखनानन्तरं च मन्त्रनाथं प्रजपित्वा एतच्चक्रमध्यगतमेव
ज्वलन्तं चिन्तयेत्साध्यं दिनानां सप्तकं यदि ।
ततस्तस्य -

ज्ञा तत्क्षणाज्जायते दाहो भैरवस्य वचो यथा ।
क्रोधराजप्रयोगेण मारणमाह -

क्रोधराजनिरुद्धं तु श्मशानपटमध्यगम्
श्मशानादलिना लेख्यं विषरक्तान्वितेन तु
यस्य नाम वरारोहे हूं फट्कारविदर्भितम्
मारयेति समायोगात् क्रूरजातिसमन्वितम्
म्रियते सप्तरात्रेण यो रक्षाभिः सुरक्षितः ।

सोपीति शेषः श्मशानादलिः श्मशानाङ्गारस्तेन प्रेतरक्त
विषमिश्रेण मषीं कृत्वा प्रेतपटखण्डे यस्य नाम हूं फट्कार
विदर्भितमित्युक्तो विन्यस्य हूंफट्कारं कृत्वा पश्चात्प्रागुक्तेन
क्रोधराजेन निरुद्धमित्याद्युक्तरोधितं ततोपि मारयेत्यने
नयुक्तं ततोपि क्रूरजात्या हूं फडित्यनेन समन्वितं लि
खेत् स रक्षाभी रक्षितोपि सप्तरात्रान्म्रियते अत्र चायं
प्रयोगः अत्रस्थो क्रोधराजरूपं शत्रुसंहारे चिन्तयुग्रं
विन्यसम् ।



अथ शत्रोरुत्सादनाय विकरालप्रयोगमाह -
विकरालो महादेवि ऊर्ध्वाधः पाशसंस्थितः
दंष्ट्र साध्यनामस्तु देवेशि हूंफट्कारविदर्भितः
नत्वामयत्नयत्नेन ।
युक्त्या यस्य साध्यनाम्नः प्रोक्तहूं फट्कारविदर्भितस्य विकरालाख्यो
मन्त्रविशेषस्य चतुर्दिग्गतः प्रोक्तया मष्या लिख्यते ।

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

तस्यासाधयत्नेन हेलयैव न लभते लाभयतीत्यैशः पाठः
किमस्य न लभ्यमित्याह -
‹ तस्याप्राप्योऽर्थं भवेत् ›
अत्र च श्रीविकरालस्वरूपं सम्यक्स्थितस्य चर्वितस्य तु दित्त्व / साधकस्य
त्रासकत्वेनास्थितं चिन्तनीयं अत्र चायं प्रयोगः
अथ मन्मथप्रयोगं वशीकराय तमाह -
‹ मन्मथेन युतं कृत्वा साध्यनामवरानने
ध्रुवाद्यं स्वाहयान्तेन रक्तध्यानसमन्वितम्
अमुकोऽत्र वरारोहे तद्दिशाभिमुखः स्थितः
अमुकस्य वशं यातु जपहोमौ समाचरेत्
सप्ताहाद्वश्यमायाति इति शास्त्रस्य निश्चयः ›

ध्रूं
ध्रूं देवदत्तं त्रासय २
हुं फट् ध्रूं ॥
ध्रूं

पूर्वोक्तेन हकारडौकारसमुदायात्मना सबिन्दुकेन पिण्डाक्षरेण मन्मथेन युक्तं यत्साध्यनाम तदेव विभजति अमुक इति अमुकस्य वशं यातु इत्येतदन्तं स्वाहया स्वाहा शब्देनान्तेनान्तस्थेन युतं कृत्वा च ईदृशेन प्रणव पूर्वेण मन्त्रेण रक्तध्यानसमन्वितं साध्यं रक्तं ध्यायंस्तदवस्थितिदिगभिमुखः साधको यदि सप्ताहं जपं होमं च वशीकरणचितेऽर्थ्यैः करोति तदा साध्योवश्यमायातीत्यर्थः । अत्र च यन्त्रप्रकरणादेतन्निश्चितं यदेवं विधं मन्त्रं लिखित्वा सम्पूज्य जपहोमौ कार्यौ ।

मेघनादप्रयोगमुच्चाटनायाह -

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

"मेघनादावसाने तु नाम यस्य समालिखेत्
यकाराद्यन्तसंरुद्धं मन्त्रं फट् छिन्नयान्वितम्
प्रेतस्थाने निखाप्येन देवं तत्र पूजयेत्
अस्तपुष्पै वरारोहे तद्दिगोभिमुखः स्थितः
तमुच्चाटयते क्षिप्रं देवि नास्त्यत्र संशयः)

मेघनादो ह र य ऊ बिन्दुनादसमुदायात्मा यकारेति सविसर्गयकारं सम्पुटितमित्याम्नायः एतदित्येवं लिखितं भूर्जे निखाप्येति श्मशानभूम्यन्तर्गतं कृत्वा तत्रैतद्रूपी भूर्जे अर्चा विभीतका तदिति सा दिगभिमुखः सप्ताहादिति स्थितमेव स्पष्टमन्यत्।

सोमराजप्रयोगं विभवार्थं वपूरीकारार्थं चाह-

"सोमराजेन देवेशि आदिमध्यान्तसंयुतम्
नाम यस्य समालिख्य वषडन्तिसमन्वितम्
सन्निधाप्य त्रिमधुरे स्थापयेत्तु सुन्दरि
सप्तरात्रप्रयोगेण त्रिकालाभ्युपातेन च
असाध्यं साधयित्वाशु धनं च विपुलं भवेत्"

सोमराजो हूंकारस्तेन साध्यनामादिमध्यान्तसम्बन्धं कृत्वेति नाम्न आदौ मध्येन्ते च त्रिः सोमराजं लिखित्वा ततो वषडन्तं कृत्वा तद्यन्त्रं सन्निधाप्य पूजयित्वा सिक्तसंपुटितं क्षीरक्षौद्रघृतैस्त्र पात्रसंपुटकं कृत्वा सप्तदिनं यत्रिसन्ध्यं तथैव जपेदसाध्यसाध्यं साधयितुं अप्राप्यमपि साधयति वपूरीकरोति श्रियं चाप्नोति।
पुनः प्रोक्तस्य क्रोधराजस्य जपहोमाभ्यां प्रयोगमुन्मादार्थमाह -

"पञ्चाङ्गेन पिप्राचस्य क्रोधराजावसानिकम्
सेनां समुच्चरेद्देवि क्रूरजातिसमन्विताम्
उन्मत्तो जायते साध्यो होमेन च जपेन च)

पिप्राचस्य विभीतकस्य मूलकाण्डपत्रकुसुमफलानि पञ्चाङ्गानि तैर्मिलितं सप्ताहं प्रणवादिक्रोधराजं हूंफट्कां

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

साध्यनामोच्चार्य त्रिसन्ध्यमष्टोत्तरशतं यो जुहुयात्तस्यासौ साध्यः पुत्रकृन्मत्तो भवति

मृत्युजिद्विधिमाह- पुनरपि पुरश्चरणसहितं

(मृत्युञ्जयं प्रवक्ष्यामि तदेकाग्रमनाः शृणु
भूर्जपत्रं समादाय नीरन्ध्रं निर्व्रणं समम्
तस्मिन्समालिखेत्पद्ममष्टपत्रं सकर्णिकम्
तस्मिन्वै कर्णिकामध्ये साध्यनाम समालिखेत्
संवेष्ट्याष्टौ दिशो देवि स्वच्छन्देन कृशोदरि
प्रणवेन तु संवेष्ट्य)

स्वच्छन्देनेति सिद्धिप्रदानेन सकलेन साधनामाष्टौ दिशाम्बुजवदावरणक्रमेण संवेष्ट्य ततः प्रणवेन संवेष्ट्य कर्णिकामध्ये लिखेदिति योजना। श्लो

कर्णिकावत्प्रतिपत्रं लिखेदित्याह-

(पत्रेष्वेवं समालिखेत्)

अष्टस्वपि।

किं च-

(पत्राष्टके च योरस्य नामाथस्तात्समालिखेत्)

पत्रबाह्ये प्रावरणक्रमेण व्योमरेखामित्यर्थः।

एवं लिखित्वा प्राग्वत्कर्पूरादिना पूरयित्वा सम्पूज्य विज्ञप्त्यर्थम्-

(वक्तव्यं देवदेवेश शरणं त्वामुपागतम्)

साध्यमित्यर्थात् तत एषा रक्षा सिक्थकादिना संवेष्ट्य पयसि क्षेप्या पयसि क्षीरे निक्षिप्तमात्रेव सती साध्यस्य सद्यो मृत्युविनाशिनी इति कर्णिकायां लिखित्वा तल्लग्नमष्टसु पत्रेष्वेवमेव लिखेत् तत्रापीदृक्सन्निवेशः एवं पत्राष्टकेऽपि लिखित्वा तद्बहिर्व्योमरेखावदघोरभट्टारकमेव विलिखेत् ततो व्यो-

पं १४ ख-पु० रक्षा हिनस्तीति पाठः
पं २० ख० पु० वक्तव्यं देव संरक्षेति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

मोरवां तद्बाह्ये लिखेदित्यस्य सन्निवेशः।

अथ शान्तिकमाह-

‘आदौ त्र्यक्षरविन्यासं स्वच्छन्दं तदनन्तरम्
जन्मनाम तु साध्यस्य त्र्यक्षरान्तरितं लिखेत्
पुनस्त्र्यक्षरविन्यासं वषडन्तं नियोजयेत्’ ९।

नेत्रमव्याक्षराणि त्रीणि चतुष्कुलं च लिखित्वा जन्मसमपन्नं सा-
ध्यनामाक्षरैरित्यर्थादथोरसत्कैरक्षरैरिन मेकैकनदक्षरव्यवहितं
अदेवदत्तः योदेवदत्तः इत्यादिक्रमेण लिखित्वा पुनर्वषडन्तानि
प्रभवन्ति लिखेत्।

इमां रक्षां च संपूज्य-

मिदित्वा ‘मर्दित्वा सिक्थकेनैव क्षीरमध्ये तु प्रक्षिपेत्’

इत्थं च साध्यस्य-

‘जायते परमा शान्तिः’

किंच-

‘पुनरन्यन्निबोध मे’

कथं-

‘हंसः संपुटमध्यस्थं प्रणवोभयसंयुतम्
नाम कृत्वा वरारोहे प्रक्षिपेन्मधुरत्रये’

हंस इत्यनेन प्राग्वत्प्रागनुलोमं पश्चात् प्रतिलोमं विन्यस्तेन तन्य
सम्पुटीकृतं नाम पश्चात्प्रणवेन संपुटितं कुर्यादित्यर्थः
मधुरत्रयं प्राग्वत्।

इत्थं च-

‘परां शान्तिमवाप्नोति मृत्युरोगैर्न बाध्यते’

साध्य इत्यर्थः चक्रद्वयं स्वस्थानमिति दर्शितम्। ९।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon
CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

पुनर्मृत्युञ्जयप्रकारमाह-

१भूर्जपत्रं समादाय रोचनाया वरानने
मातृकान्तरितं नाम दूर्वाकाण्डेन चालिखेत्
तदभ्यन्तरगर्भे तु स्वरैरन्तरितं कुरु
पुनर्गर्भे समालिख्य साध्यनाम वरानने
ध्रुवेण वेष्टयेत्पश्चाद्वकारेण ततः प्रिये
मकारं च दकारं च लिखेच्च तदनन्तरम्
पुनर्वेष्ट्य ठकारेण मायाबीजेन सुव्रते
अङ्कुशेन निरुद्धेन रक्षां मृत्युविनाशिनीम्
स्वच्छन्दसहितां देवि प्रणवेनादियोजिताम्
वषडन्तसमोपेतां कर्पूरक्षोदचर्चिताम्
गन्धपुष्पादिना पूज्य प्रदीपेन्मधुरत्रये ।

गर्भे साध्यनाम प्रणवेनादियोजितामिति प्रणवान्तर्गर्भीकृतो विधाय स्वच्छन्दसहितां वषडन्तसमोपेतं रक्षां कुर्य्यादिति गर्भीकृतनाम्नः प्रणवस्य बहिरघोरं वषडन्तं परिवेष्टनया लिखेत् तस्य तदभ्यन्तरगर्भे स्वरैरन्तरितं कुर्वीत बहिर्विन्यस्तकादिक्षान्तमातृकाभ्यन्तरे षोडशभिः स्वरैरन्तः कृतैः परिमण्डलेन लिखितैर्व्याप्तं करणीयं यदाह मातृकान्तरितमित्येतस्य सर्वं पुनर्ध्रुवेण वेष्टितं सक्रमेण वकारमकारदकारठकारैर्वेष्टयेत्-

१ ६ ख० पु० पकारेण ततः प्रिये इति पाठः
२ ७ ख० पु० मकारं च दकारं चेति पाठः

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

तदनु मयाबीजसत्तैकारेण त्रिवेष्टयेत् टी० ६
पश्चादष्टसु दिक्षु क्रौङ्कारेण रोधयेदिति
व्यवहितमवाक्यकार्थसङ्गत्यक्षरेण चक्रमेतत्प्र-
दर्शितमर्चयित्वा चैतत्सिक्थकेन संपुटितं मधुर-
त्रये मर्दितं यस्य क्षिपेत् ।

तस्य-

“ जायते परमा सिद्धिर्नात्र कार्या विचारणा ,”
निश्चितमतिर्नैतत्प्रयुक्तमभीष्टं साधयत्येव ।

“ अथवा गुटिकां कृत्वा कण्ठे बाहौ च धारयेत् ,”

यः-

“ तस्य व्याधिर्न जायेत इत्येवं भैरवोऽब्रवीत् ”
गुटिकां कृत्वेति जतुबद्धां कनकादिभूषितां
विधाय कण्ठे बाहौ वा धारयेत् चो वार्थे । चेवार्थे

पं० ७ ख० पु० परमा प्राप्तिरिति पाठः।

पं० २१ ख० पु० यस्य व्याधिर्न जायेतेति पाठः।

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

गुटिका विधिपूर्वमन्त्राभिमन्त्रितभोजनपानक्रमेण सततं क्रियमाणेन मृत्युजिद्विधिमाह—

'त्र्यक्षरं मूलमन्त्रं च वषडन्तसमन्वितम्
भोजनोदकपाने तु मन्त्रयित्वाश्नतः सदा
न तस्य जायते मृत्युर्भैरवस्य वचो यथा'

नेत्रमन्त्रचतुष्कलनाथाभ्यां वषडन्ताभ्यां भोजनपाने द्वे सततमभ्यवहरतो न मृत्युर्भवति ।

अथ विषादिहेतुर्यस्यापि मृत्युस्तं समाधित्सति—

'अथाहिना महादेवि दूषितः साधको यदा'।

तदा—

'मूलमन्त्रसमोपेतमघोरं तत्र योजयेत्'

मूलमन्त्रः श्रीचतुष्कलस्तेन समोपेतं संपुटीकृतं तत्रेति अहिदूषणप्रभृतानि निमित्तस्थाने भगवन्विषं भ्रामय २ हूं फडिति क्रूरजात्यन्तः ऊहः प्रयोक्तव्य इत्यर्थात्प्रयोगावसरे च ॥



'आत्मनो भैरवं रूपं कृत्वा चैव सुदारुणम्
दंष्ट्राकरालविकटं ज्वालामालोपशोभितम्
सर्पैर्ललम्ब्यमानैः खड्गहस्तं सुभीषणम्
पूर्वरूपसमोपेतं सूर्यकोटिसमप्रभम्
तेनाक्रान्तं महादेवि दष्टकं तु विचिन्तयेत्
तज्ज्वालाभिः सुदीप्ताभिर्दग्धं सञ्चिन्तयेद्विषम्
तत्क्षणाद्देवदेवेशि निर्विषः स तु जायते'

इत्येतेन ध्यात्वा सर्पैरिति हारकटकादिस्थैरुपलक्षितम् पूर्वरूपं श्रीकोटराक्षसम्बन्धि अहिदूषितत्वे विषदूषितेरुपलक्षणपरम्। तदो

किं च—

'ग्रहेष्वेवं विधं ध्यानं यः कुर्यात्'।



CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

सः —

'मोचयते क्षणात्' ।

तेभ्यो यस्मात्तादिग्रहेभ्यः साधमित्यर्थादत्र च भगवन्नस्य साध्यस्य ग्रहं धूमाय २ हूं फडित्यन्तपूर्वोक्तमन्त्राभिमन्त्रितेनाम्भः प्रोक्षणादिना साध्यं ताडयेदित्यर्थः ।

ध्यानासमर्थं प्रति विषधूमनं कारुणिकत्वादोषधिप्रयोगैरतस्ताप्याद्याहुः —

'अथ ध्याने त्वकुशलो यदा कश्चिन्नरो भवेत् ।

तदा गर्दैर्महादेवि निर्विषं कुरुते क्षणात्' ।

दष्टं भक्षितविषं च ।

अगदमाह —

'कुमारिद्वितयं गृह्य नागिन्या तु संहेकतः

गोकर्णिका सिते मूले सोमाह्वा मूलसंयुतम्

आमगोक्षीरसंपिष्टं भक्षयेन्निर्विषो भवेत्'

कुमार्योषधिः सफला वन्ध्या चेति द्विरूपा नागिन्या महागोनासाह्वया सह गोक्षीरपिष्टमित्येकः प्रयोगः, गोकर्णिका गिरिकर्णिका सोमाह्वा सोमराजी तयोः सितं मूलं गोक्षीरपिष्टमिति द्वितीयः क्षीरेण पिष्टमध्ये तद्घृतेन सह पानेनास्य प्रयोक्तव्यं। यद्वक्ष्यति 'अगदान्घृतसंयुक्तान्पिबे'दित्यादि ॥

किञ्च —

'गोरम्भस्य च मूलेन निर्विषत्वं प्रजायते'

गोरम्भो भूम्यामलकी क्वचित्तु एरण्डस्य तु मूलेनेति पाठः अत्राप्यामगोक्षीरपिष्टत्वं स्थितमेव ।

'अश्वसारस्य मूलं तु उदकेन तु पेषयेत्

पानेनास्य प्रदातव्यं तदा भवति निर्विषः'

पाने नस्ये

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

अथ क्षारः करवीरकं ।
'आरग्वदस्य मूलं तु उदकेन च पेषयेत् ।
पानेनास्य प्रदातव्यं तदा भवति निर्विषः' ।
आरग्वदमग्त्यादकमिति प्रसिद्धं ।
'मधुकस्य तु सारं यत्नस्य पाने प्रयोजयेत् ।
निर्विषस्तु प्रजायेत भैरवस्य वचो यथा' ।
मधुकस्य मधूकस्य सार आन्तरो भागस्तं दृष्योः प्रक्रान्तत्वादुदकेन क्षीरेण वा पिष्ट्वा तस्य पाने प्रदातव्यं मधुकं मधुयष्टिरित्यन्ये ।
'जम्बुलासिकमूलं तु पाने तस्य प्रदापयेत्
निर्विषस्तु भवेद्देवि नात्र कार्या विचारणा' ।
जम्बुलासिकमूलं जम्बूवृक्षमूलमत्रापि गोक्षीरपिष्टमिति स्थितमेव ।
अथ विषाक्रमणहेतुमगदगुटिकाप्रयोगमाह —
'षड्बिन्दुपटखर्जूरसूक्ष्मचूर्णं तु कारयेत् ।
मयूरपित्तसंयुक्तं गुटिकां कारयेत्प्रिये ॥
त्रिलोहवेष्टितां कृत्वा करे कण्ठे निधारयेत् ।
न विषं क्रमते तस्य यस्य दृष्टो महोरगेः' ॥
षड्बिन्दुः प्रसिद्धा विप्रोषः पटखर्जूरं प्रतीतं गुटिकां कारयेदित्यनन्तरं तत इति प्रिये अनन्तरं चेति धारयेदनन्तरं यत इति चाध्याहार्यं त्रिलोहं हेमरजतताम्रम्
अगदप्रयोगे विधिमाह —
'अगदान्घृतसंयुक्तान्पिबेद्धै विषदूषितः
न विषं क्रमते तस्य इति पुराणेषु निश्चयः'
एतेषु अगदेषु वाक्येषु वा पृथक्पृथक्कुण्डलीयगारुडाक

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

वीरावालामोटादिमूलविषयेषु निष्कम्य प्रतिपत्तिना प्रयु-
ज्यमानेष्वविसंवादिता भवतीति दर्शयन्पटलमुपसंहरति—

१ एवमन्येपि ये योगाः स्वच्छन्देन विनिर्मिताः ।
प्रदद्याद्भावितात्मा च सिद्ध्यन्ते नात्र संशयः २

स्वच्छन्देनेति सर्वं हि परमेश्वरेण प्रवर्तितं यदुक्तं श्रीश्रीकण्ठ्यां—

प्रवर्तितेश्वरात्सर्वं निवर्तते तथेश्वरात्
ईश्वराधिष्ठितं सर्वं जगत्स्थावरजङ्गमम्
महादेवात्परं नास्ति सत्यमेतन्न चान्यथेति, च एवा

र्थे भावितात्मैव प्रयुञ्जीतेत्यर्थः पाटलिकी सङ्गतिरदूर एव
कालाग्निनरकाश्चैव पाताला हाटकेश्वर इत्यादिना पटला-
न्ते कटाक्षयिता ग्रन्थेनेति शिवम् ॥

व्याधीनामगदं दिव्यमाधीनां मूलकर्तनम्
उपद्रवाणां दलनं महादेवमुपास्महे ॥

इति श्रीस्वच्छन्दोद्योते नवमः पटलः ॥

॥ ॥

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

V – IX

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry

Digitized by Sarayu Trust and eGangotri. Equipment: Heritage Foundation, Jalgaon

CC-0. Arthur Avalon Atal Bihari Ghosh Coll. at Sri Aurobindo Library, Pondicherry